॥ अथ चंपू रामायणं प्रारभ्यते ॥

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 23976
Date 22-3-68


वाल्मीकि
सीता
राम
ब्रह्मा
नदी

हंत्री ॥ ५ ॥ गद्यं ॥ तत्र कंचनक्रौंचमिथुनादेकं पंचशरशरानुविद्धमपिव्या-
धेनानुविद्धं निध्यायतो बद्धानुकंपस्य भगवतो वाल्मीकेर्वेदनारविंदाच्छं
दोमयी काचिदेवं निःससार सैरस्वती ॥ प॰ ॥ मा निषाद प्रतिष्ठां त्वमगमः-
शाश्वतीः समाः ॥ यत्क्रौंचमिथुनादेकमवधीः काममोहितं ॥ ६ ॥ ग॰ ॥ त
दनु समयोचितकृत्यं निर्वर्त्य स्वाश्रममुपगतवति सति भगवति वाल्मीको-
॥ पद्यं ॥ वाणीविलासमपरत्र कृतोपलंभमंभोजभूरसहमान इवाविरासी
त् ॥ आभाति यत्कृतिरनेकविधप्रपंचव्याजेंद्रजालविधिसाधकपिच्छिके
व ॥ ७ ॥ ग॰ ॥ ततः परमहर्षेण महर्षिणा विधिवदभ्यर्चितः परमेष्ठी मध्य-
मलोकेपि स्ववृत्तं प्रकाशयितुं किल भवंतमेवोपदिष्टमानया भारत्या राम
चरितं यथाश्रुतं व्याक्रियतामिति व्याहृत्यांतरधात् ॥ प॰ ॥ अथ सरसिज

टिप्पणं ॥ ३ वाणी.

योनेराज्ञयारामवृत्तंकरबदरसमानंप्रेक्ष्यदृष्ट्याप्रतीच्या ॥ शक्रभमतन्नुल-
काव्यंस्वादुरामायणाख्यंमधुमयभणितीनांमार्गदर्शीमहर्षिः ॥ ८ ॥ ग० ॥
एनंप्रबंधंप्रयोक्तुंलोकेकःसमर्थइतिचिंतामुपगतवतिसतिभगवतिवा-
ल्मीकौ ॥ प० ॥ उपागतौमिलितपरस्परोपमौ बद्धुश्रुतौश्रुतिमधुरस्वरा
न्वितौ ॥ विचक्षणौविविधनरेंद्रलक्षणौकुशीलवौकुशलवनामधारिणौ
॥ ९ ॥ ग० ॥ एतौमुनिःपरिगृह्यस्वकृतिंअपाठयत् ॥ तौपुनःइतस्ततोगा
यमानौदृष्ट्वारामःप्रहृष्टमनाःस्वभवनमानीयभ्रातृभिःसहनिजचरि-
रितंगातुमन्वयुंक्त ॥ ततश्च ॥ पद्यं ॥ छंदोमयीनांनिलयस्यवाचामंते-
वसंतौमुनिसत्तमस्य ॥ एतौकुमारौरघुवीरवृत्तंयथाक्रमंगातुमुपक्रमे
तां ॥ १० ॥ अस्तिप्रशस्ताजनलोचनानामानंदसंदायिषुकोसलेषु ॥ आ-
ज्ञासमुत्सारितदानवानांराज्ञामयोध्येतिपुरीरघूणां ॥ ११ ॥ तामावसद्द्

शरथःस्मरवंदितेनसंक्रंदनेनविहितासनसंविभागः॥ वृंदारकारिविज-
येस्मरलोकलब्धमंदारमाल्यमधुवासितवासभूमिः॥१२॥ग॰॥अथा-
स्मिन्ननपत्यतयादूयमानमानसेपुत्रार्थंक्रतुमश्वमेधंविधातुंमंत्रिभिः
सहमंत्रयमाणेदशरथे॥समंत्रःप्रहृष्टमनामहर्षेरंगदेशसंगतावग्रहनि
ग्रहशौंडस्यविभांडकसूनोरवश्यमृष्यशृंगस्यप्रभावात्प्रभ वोभविता
कुमाराणामितिसनत्कुमारोक्तंपुरावृत्तमस्मैदशरथायकथयामास॥
सोपिसमंत्रवचनाच्छांताधिःशांताकुटुंबिनंसंबंधिनंमुनिमानीयव-
सिष्ठादिष्टमश्वमेधाध्वरंसरयूरोधसिविधायतत्रपुत्रीयामिष्टिंविधिव-
त्कर्तुमारभत॥तदनुहविराहरणायधरण्यांकृतावतरणाःसर्वेगीर्वा-
णाःशक्रप्रमुखाश्चतुर्मुखायदशमुखप्रतापानलग्रीष्मोष्मसंशोषण- २
मावेद्यतेनसहशरणमितिशार्ङ्गधन्वानंमन्वानाःकृतनानाविधप्रस्तु

श्रीगणेशायनमः॥ ॥पद्यं॥ ॥लक्ष्मींतनोतुसुकतरामितरानपेक्षमंघ्रि-
द्वयंनिगमशाखिशिखाप्रवालं॥हैरंबमंबुरुहडंबरचौर्यनिघ्नंविघ्नाद्रिभेदशत-
धारधुरंधरंनः॥१॥उच्चैर्गतिर्जगतिसिद्ध्यतिधर्मतश्चेत्तस्यप्रमाचवच-
नैःकृतकेतरैश्चेत्॥तेषांप्रकाशनदशाचमहीसुरैश्चेत्तानंतरेणनिपतेत्कु-
नुमत्प्रणामः॥२॥वाल्मीकिगीतरघुपुंगवकीर्तिलेशैस्तृप्तिंकरोमिकथम-
प्यधुनाबुधानां॥गंगाजलैर्भुविभगीरथयत्नलब्धैःकिंतर्पणंनविदधातिज-
नःपितॄणां॥३॥गद्यानुबद्धरसमिश्रितपद्यसूक्तिर्हृद्याहिवाद्यकलयाक-
लितेवगीतिः॥तस्माद्दधातुकविमार्गविदांसुखायचंपूप्रबंधरचनांरसना
मदीया॥४॥वाचंनिशम्यभगवानथनारदस्यप्राचेतसःप्रवचसांप्रथमः
कवीनां॥माध्यंदिनायनियमायमहर्षिसेव्यांपुण्यामवापतमसांतमसांनि

टिप्पणं॥१ अधीनं॥२वज्रं.

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No 23176
Date 22.3.68

प्रमुखानखिलानमरगणानरुणतामरसविलासचौरैर्लोचनमरीचिवीचि संचारैरानंदयन्नरविंदलोचनः स्फुटमभाषत ॥ प० ॥ अपिकुशलममर्त्याः स्वागतंसांप्रतंवः शमितदनुजदंभाकिंनुदंभोलिकेलिः ॥ अपिधिषणमनीषानिर्मितानीतिमार्गास्त्रिदशनगरयोगक्षेमकृत्येक्षमंते ॥ १७ ॥ ग० ॥ एवं-भगवतः कुशलानुयोगपुरःसरीममृतासारसरसांसरस्वतीमाकर्ण्यसं-पूर्णमनोरथास्कमनसासंसत्पुंसेपरस्मैविज्ञापयामास ॥ देवकथमकुशलमाविर्भवेद्भवताकृतावलंबानामस्माकं ॥ किंतु ॥ प० ॥ अस्तिप्रशस्त विभवैर्विबुधैरलंघ्यालंकेतिनामरजनीचरराजधानी ॥ माणिक्यमंदिर भवांमहसांप्ररोहैस्तेजस्त्रयायदिनदीपदशांदिशंती ॥ १८ ॥ एतांपुराणनगरींनगरीतिसालांसालाभिरामभुजनिर्जितयक्षराजः ॥ हेलाभिभूतज

टिप्पणं ॥ १ बृहस्पतिः ॥ २ अलब्धस्यप्राप्तिःयोगः ३ लब्धस्यपरिपालनंक्षेमः ॥

गतांरजनीचराणांराजाचिरादवतिरावणनामधेयः ॥१९॥ मह्वाहुराहुरस-
नाथितशस्त्रधाराद्विपालकीर्तिमयचंद्रमसंग्रसंते ॥ तद्वैरिणांरणमुखे
शरणप्रदायीनैवास्तिकश्चिदसुमंतकमंतरेण ॥२०॥ अंभोजसंभवममुंब-
हुभिस्तपोभिराराधयन्वरमबापपरैर्दुरापं ॥ तस्मात्समस्तभुवनंनिज-
शासनस्यलक्ष्मीकरोतिरजनीचरचक्रवर्ती ॥२१॥ ग० ॥ तेनवयंपराधी-
नाइवभवामः ॥ तथाहि ॥ सोऽयंकदाचनक्रीडाधराधरमधिरुह्यसावरो-
धवधूजनश्चरणाभ्यांततइतःसंचरेच्चेदागमिष्यत्यागइत्यनाविष्कृता-
तपोभयेनभगवान्सहस्रभानुरपिसंकुचितभानुरेवतत्सानूनिनूनंस-
माश्रयते ॥ एषमृगांकोपिमृगयायासपरिश्रांतिविश्रांत्यैससंभ्रमंन-
मज्जनपरिवृतेमज्जनगृहाभिमुखेनिर्जितशतमखेदशमुखेतत्रत्य-
विचित्रतरशातकुंभस्तंभाग्रप्रस्यग्रप्रत्युप्तस्फटिकशिलाशालभंजिका

पुंजकरतलकलितनिजोपलमयकलशमुखादच्छाच्छामविच्छिन्नपातांबुधारांनिजकराभिमर्शोदापादयन् तस्यप्रसादपिशुनानांशुनासीरचिरकांक्षितानांविंशतिवीक्षणानांक्षणमात्रंपात्रंभवति ॥ तेनपुलस्त्यनंदनेनसंक्रंदननंदनवनात्स्वमंदिरोद्यानमानीतस्यमंदारप्रमुखस्यवृंदारकतरुवृंदस्यबंदीकृतसुरसुंदरीनयनेंदीवरद्वंद्वात्तत्करारविंदकनककलशाच्छमंदोष्णस्पंदमानैरंबुभिर्जंबालितालवालस्यपचेलिमानामपिकुसुमानांपतनभयमाशंकमानाःपवमानाःसंततंपरिस्पंदितुमपिप्रभवोनभवंति ॥ एतेपिपावकारूढिशंकाहुतवहाख्यांवहंतस्तद्गृहेगार्हपत्यपुरःसराःपौरोगवीधुरंदधाति ॥ किंबहुना ॥ सएषमानवादवमानंआगमिष्यतीत्यमन्वानस्तदितरैरवध्यत्वंचतु-

टिप्पणं ॥ १ पुरोगाः ॥

तस्ततयः क्षीरांबुराशिमासेदुः ॥ प० ॥ संतापघ्नं सकलजगतां शार्ङ्गचापा-
भिरामं लक्ष्मीविद्युल्लसितमतसीगुच्छसच्छायकायं ॥ वैकुंठाख्यं मुनिजन
मनश्चातकानां शरण्यं कारुण्यापं त्रिदशपरिषत्कालमेघं ददर्श ॥ १३ ॥-
क्षीरांभोधेर्जठरमभितो देहभासां प्ररोहैः कालोन्मीलत्कुवलयदलाद्वैत
मापादयंतं ॥ आतन्वानं भुजगशयने काममपि क्षोमगौरे निद्रामुद्रां नि
खिलजगतीरक्षणे जागरूकां ॥ १४ ॥ प्रह्लादस्य व्यसनमभितं दैत्यव-
र्गस्य दंभं स्तंभं वक्षःस्थलमपि रिपोर्योगपद्येन भेत्तुं ॥ बन्दुश्च द्वं पुरुषव
पुषा मिश्रिते विश्वदृष्टे दंष्ट्रारोचिर्विशदभुवने रंहसा सिंहवेषे ॥ १५ ॥ ना-
रायणायनलिनायतलोचनाय नामावशोषितमहाबलिवैभवाय ॥ ना
नाचराचरविधायकजन्मदेशनाभीपुटाय पुरुषाय नमः परस्मै ॥ १६
॥ ग० ॥ इति प्रणम्योत्थितानेतान्स्तुतिरवमुखरितहरिन्मुखान्हरिहय-

प्सरः प्रभृतिषु युवतिषु वानरभल्लुगोपुच्छवेषभृतः प्रथितप्रभावाः प्रजाः प्र बा॰ कां॰
जनयेयुरिति ॥ पुरारवल्लुममजृंभारंभेसंभूतोजांबवानिति ॥ ततस्तेगीर्वा- १
णास्तथाकुर्वन् ॥ अथवैतानाद्वैश्वानरान्नरःप्राजापत्यःसहेमपात्रःकश्चि
दुत्थायदशरथायपुत्रीयतेपायसममृतप्रायंप्रायच्छत् ॥ ततः ॥ प॰ ॥ कौ
सल्यायैप्रथममदिशद्भूपतिःपायसार्धंप्रादादर्धंप्रणयमधुरंकेकयेंद्रस्य
पुत्र्यै ॥ एतेदेव्यौतरलमनसःपत्युरालोच्यभावंस्वार्द्धांशाभ्यांस्वयमकुरु
तांपूर्णकामांसुमित्रां ॥ २३ ॥ अवभृथेऽवसितेसरयूतटादथयथायथमु-
च्चलितेजने ॥ दशरथःपरिपूर्णमनोरथःपुरमगात्पुरुहूतपुरोपमां ॥ २४ ॥
अपाटवात्केवलमंगकानांमनोज्ञकांतेर्महिषीजनस्य ॥ शनैःशनैःप्रोषि-
तभूषणानिचकाशिरेदौहृदलक्षणानि ॥ २५ ॥ मंदमंदमपयाद्वलित्रयी- ५
टिप्पणं ॥ १ असामर्थ्यात् ॥ २ प्रोज्झितानि ॥

गाधताविषयनाभिगह्वरा ॥ कोसलेंद्रदुहितुःशनैरभून्मध्ययष्टिरपिदृष्टि-
गोचरा ॥ २६ ॥ न्यग्रोधपत्रसमतांक्रमशःप्रयातामंगीचकारपुनरप्युदरं-
कृशांग्याः ॥ जीवातवेदशमुखोरगपीडितानांगर्भच्छलेनवसतापरमेणपुं-
सा ॥ २७ ॥ अपिच ॥ मध्यंतनुत्वादविभाव्यमानमाकाशमासीदसितायता-
क्ष्याः ॥ गर्भोदयेविष्णुपदापदेशात्कार्श्यंविहायापिविहायएव ॥ २८ ॥ उच्च
स्थेग्रहपंचकेसुरगुरौसेंदौनवम्यांतिथौलग्नेकर्कटकेपुनर्वसुयुतेमेषंग
तेपूषणि ॥ निर्दग्धुंनिखिलाःपलाशसमिधोमेध्यादयोध्यारणेराविर्भूत-
मभूतपूर्वमभवद्यत्किंचिदेकंमहः ॥ २९ ॥ अपिच ॥ अथरामाभिधानेनक
वेःसुरभयन्निरः ॥ अलंचकारकारुण्याद्रघूणामन्वयंहरिः ॥ ३० ॥ तमेव
मन्वजायंतत्रयस्त्रेताग्नितेजसः ॥ अग्रजंतेनुकुर्वंतस्तैस्तैर्लोकोत्तरैर्गुणैः

टिप्पणं ॥ १ वटः गरुडश्च ॥ २ जीवनरक्षणाय ॥ ३ आकाशं.

॥३१॥भरतस्तेषुकैकेय्यास्तनयोविनयोज्ज्वलः॥अन्यौलक्ष्मणशत्रुघ्नौसु-
मित्रायांकृतोदयौ॥३१॥एतेवत्दृधिरेवीराः[1]प्रजाक्षेमायदीक्षिताः॥लोकानं
दामुकुंदस्यचत्वारइवबाहवः॥३२॥ग॰॥अथकदाचिदपरिमेयमायाभ-
यानकयुद्ध[2]समुद्धतदैत्यबलावस्कंदकांदिशीकवृंदारकानीकप्रतिपाल्य
मानमहारथः[3]पंक्तिरथस्तपश्चर्याजातानामाश्चर्याणामायतनंत्रिशंकुया
जिनंभगवंतंपद्यप्रबंधमिवदर्शितसर्गभेदंप्राकृतव्याकरणमिवप्रकटि
तवर्णव्यत्यासंबुधमिवसोमैस्कृतं[4]कौशिकस्कृतमद्राक्षीत्॥तदनुयथा-
विधिपरिगृहीतसपर्येणमर्यादातीतमहिम्ना[5]गाधेतरहृदयेनगाधिनंदने
नसत्रपरित्राणार्थमित्थमभ्यर्थितःपार्थिवोभूत्॥राजन्तवकुमारेणवि
नयाभिरामेणरामेणशरासनमित्रेणसौमित्रिमात्रपरिजनेनक्रियमाण

टि॰ १भयद्रुतः॥२दश॥३चंद्रः वल्लीच॥४विश्वामित्रं॥५अगाधं.॥

राननवराल्लब्ध्वासमुद्भूतःसंप्रतिसंप्रहारसमाक्रांतदिगंतदंतावलदंतकुं-
तव्रणकिणस्थपुटितवक्षःस्थलःस्थलकमलिनींवनवारणइवरावणस्त्रि-
लोकीमभिभवन्भवदीयानित्यस्मान्नजातुकिंचिदपिजानातीति॥अथभ
गवानाकर्ण्यगीर्वाणगणवाणीं॥प०॥इंद्रनीलाचलोदंचच्चंद्रिकाधवलस्मितः
॥वाचमूचेस्रुधाधारामधुरांमधुसूदनः॥२२॥ग०॥भवतामपराधविधायिन-
स्तस्ययातुधानस्यनिधनमधुनैवविधातुंशक्यं॥किंतुसरसिजासनशासन-
मप्यमोघीकुर्वन्नुर्वीतलेपुत्रीयतःसुत्राममित्रस्यदशरथस्यमनोरथमपिपूर
यितुमादृतमानुषवेषःसन्नहमेवतंवधिष्यामीत्युक्त्वांतरधात्॥ततःसापरि
षदनिमिषाणामुन्मिषितहर्षाणांहृषीकेशादेशात्प्रशमितदुर्दशानिनिर्दशा-
ननानिचतुर्दशभुवनानिबुध्वादुग्धसागरान्निरगात्॥ततस्तानमरान्-
प्राहस्मपितामहः॥भवंतस्तावदवतरिष्यतोलक्ष्मीसहायस्यसहायार्थम

काकुस्थविद्येतेवित्तरामिते ॥३७॥ग०॥ ततःपरिगृहीतविद्यस्यदाशरथेःप्रदे-
शमेकंप्रदर्श्यभगवानित्थमकथयत् ॥प०॥अस्मिन्पुरापुरभिदःपरमेश्वरस्य
फालांतरालनयनज्वलनेमनोभूः ॥सद्यःप्रपद्यशलभत्वममुंचदंगंतस्मा
दमुंजनपदंविदुरंगसंज्ञं ॥३८॥ग०॥ तदनुमानससरःप्रसृतांसरयूमति-
क्रम्यवृत्रवधप्रवृन्दवृद्धश्रवःपंकक्षालनलब्धमलदकरूशकनाम्नोर्जन
पदयोःसीम्निकृतपदयोर्दाशरथ्योःपुनरप्येवमब्रवीत् ॥प०॥यक्षःस्वके-
तुर्द्रुहिणप्रसादाल्लेभेसुतांकामपिताटकाख्यां ॥स्कंदःकिलैनांपरिणीयत-
स्यांमारीचनीचंजनयांचकार॥३९॥ग०॥ एकदातुस्कंदेनिहतेमारीचःकुं-
भसंभवमुनिमभिभूयतस्यशापादवापकौणपतांताटकाप्यासीत्पुरुषादि
नी॥सेयमाजन्मसिद्धसिंधुरसहस्रप्राणाजनपदविपदंविदधानाव्यापा-
टि०॥१कपालमध्ये॥२पतंगत्वं॥३ब्रम्हदेवस्य॥४विवाह्य॥५राक्षसतां॥६राक्षसी॥७गजः

दनीयाल्वयेति ॥ किंच ॥ वैरोचनीमंथरांवस्कंधरापराधधुरंधरांपुरंदरेण-
निहतांजनार्दनकृतार्दनांचभार्गवजननीप्रदर्श्यदाशरथेरमंदास्कंदवधूव-
धचिकित्सामुत्सादयामास ॥ प० ॥ आश्रुतःश्रुतवृत्तेनतेनस्कंदप्रियावधः-
॥ तमेवान्वदत्तस्यचापःसिंजारवच्छलात् ॥ ४० ॥ तत्कालेपिशिताशनाशा-
पिशुनासंध्येवकाचिन्मुनेरध्वानंतरसारुरोधरुधिरक्षोदारुणादारुणा ॥-
स्वाधीनेहननेपुरींविदधतीमृत्योःस्वकृत्यात्ययाल्लीडर्लिककरसंघसंकट-
महाशृंगाटकांताटका ॥ ४१ ॥ यथादाशरथेःकर्णमविशत्ताटकागुणः ॥ त-
थाधनुर्गुणस्तूर्णमविशत्तज्जिघांसया ॥ ४२ ॥ ततोभाविनिसंग्रामेबद्ध-
श्रद्धस्यताटका ॥ स्वप्राणैरामबाणस्यवीरपानमकल्पयत् ॥ ४३ ॥ मुनिः
कृशाश्वोपज्ञानिताटकामाथिनेददौ ॥ अस्त्राणिजृंभकादीनिजंभशा-
टि० ॥ ८ मौर्वी ॥ ९ चतुष्पथः ॥ १० आद्यंज्ञानं.

सनशासनात् ॥४४॥ग०॥ तत्रकंचनविरिंचिलोकप्रत्या[1]दृशं प्रदेशमेकंप्रद-
र्श्यावोचदुपचीयमानपरमहर्षोमहर्षिः ॥प०॥ प्रतिदिनमवदातैर्ब्रम्हाभिर्ब्रम्ह
निष्ठैःप्रशमितभवखेदैः सादरं सेव्यमानः ॥ बलिनियमनहे[2]तोर्वामनः कानने
स्मिन्बलिनियमपरः सन्ब्रम्हचारीच्चचार ॥४५॥ अपिच ॥ अपहृतविबुधार्ते[3]
र्वामनव्याजमूर्तेरखिलभुवनभिक्षोराश्रमानो[4]कहानां ॥ ततिरियमतिनी
लाव्याप्तदिग्व्योमसीमास्वयमपिपरिमातुं लोकमभ्युद्यतेव ॥४६॥ इति·
विविधरसाभिः कौशिकव्याहृताभिःश्रुतिपथमधुराभिःपावनीभिःक-
थाभिः॥ गलितगहनकृच्छ्रंगच्छतोर्दाशरथ्योः समकुचदिवसघ्नः स्ताद्द
शंमार्गदैर्घ्यं॥४७॥ग०॥ ततः सिद्धाश्रमं प्रविश्यविश्वामित्रः सत्रमारभ-
त ॥ तदनंतरमंतरिक्षांतरालादापतंतमंतकानीकभयानकंपलाश[5]गण

टि०॥१ निराकृतिः ॥२ विशब्दैः ॥३ दैत्यः ॥४ वृक्षाः ॥५ राक्षससमूहः॥

क्रतुरक्षोरक्षोदुरितमुत्तीर्य कृतावभृथोभवितुमभिलषामीति ॥ एवंविधमाक
र्ण्यकर्णपरुषंमहर्षिभाषितं ॥ अतिमात्रपुत्रवात्सल्यात्कौसल्याजानिःसश-
ल्यांतःकरणोभूत् ॥ ततस्तस्मिन्बहुप्रकारैरपरिहार्यनिश्चयेभगवतिविश्वा
मित्रेदशरथस्तपनकुलहितेनपुरोहितेनैवमभिहितोभूत् ॥ प० ॥ पर्याप्त-
कामायभवानमुष्मैकुर्यात्सपर्यांकुशिकात्मजाय ॥ निर्यातुधानांवसुधां-
विधातुंनिर्यातुरामःसहलक्ष्मणेन ॥ ३४ ॥ ग० ॥ एवंवसिष्ठेनप्रतिष्ठापितधृतिर्द-
शरथःस्कतप्रदानेनकुशिकसुतमनोरथमेवपूरयामास ॥ प० ॥ योगेनल-
भ्योयःपुंसांसंसारापेतचेतसां ॥ नियोगेनपितुःसोयंरामःकौशिकमन्वगा
त् ॥ ३५ ॥ तत्रसत्रंपरित्रातुंविश्वामित्रोमहामुनिः ॥ सौमित्रिसहितंरामंन-
यन्नयमवोचत ॥ ३६ ॥ बलेनतपसांलब्धेबलेत्यतिबलेतिच ॥ विद्येतेमयि-
टी० ॥ ६ दीक्षांतस्नानं ॥ ७ रक्षोहीनां ॥ ८ आज्ञयायोगाभावेनच ॥

रामेरितेनरघुनायकसायकेन॥स्नेहा[1]न्वितेननिरगादनुरागिणीवप्राणावली-
हृदयतःपिशिताशनानां॥५२॥अथनिशिचरघाताच्छांतवैतानविघ्नोमुनिर
वभृथकृत्यंविश्वहृद्यंसमाप्य॥अमनुतजयलक्ष्म्यारामभाजोसमेतंयजन
जनितमूर्त्यायोक्तुमव्याजलक्ष्म्या॥५३॥ग०॥अथमिथिलांप्रतिप्रस्थितो-
विश्वामित्रःकाकुत्स्थयोरित्थमकथयत्॥पुराखलुकुशेशयासनजन्मा-
कुशिकाभिधानोराजर्षिःकुशनाभकुशांबप्रमुखैश्चतुर्भिःकौशांबीमहो-
दयधर्मारण्यगिरिव्रजाख्यानांपुरीणांकर्तृभिःपुत्रैर्बभूव॥कुशनाभस्तु
कन्याशतंघृताच्यामजनयत्॥कन्यास्ताःसन्नद्धयौवनाःकामयमानः
पवमानःप्रत्याख्यानात्प्रत्यापन्नमन्युरासामवयवेष्वै[2]नार्जवमतनुत॥
अथविदितवृत्तांतेनकुशनाभेनतेनक्षमामेवप्रतिक्रियांमन्वानेनचूलि ९

टि०॥१ तैलं प्रेमच.॥२ वक्रतां.॥

सूनवेसोमतेयायराज्ञेब्रम्हदत्ताय प्रदत्तास्ताः प्र[1]कृतिस्थाः बभूवुः ॥ पुनरपि
कुशनाभस्तुपुत्रीयन्पितृप्रसादादगाधसत्वान् गाधिसंज्ञानस्मत्तातपादा
नुदपादयत् ॥ इत्थंदाशरथिः कौशिकोत्पत्तिकथानिशमनेननिरायामया
मिनीमनुभूयबंधूकस्तबकबंधुरेणसंध्यारागेण प्राचीमुखेशोणीकृतेशो
णाभिधानंदधानेनदेप्रवर्तितप्रत्यूष कृत्यः कृतनियमेनमुनिनासहगं-
गामुपतिष्ठमानेन पथाप्रातिष्ठत् ॥ प० ॥ आजानपावनक्षीरांवृषानंदविधा
यिनीं ॥ श्रुतिप्रणयिनींसोयमापगामापगामिव ॥ ५४ ॥ ग० ॥ अथभागीर
थीकथांश्रोतुकामायरामायभगवानित्थमभाषत ॥ प० ॥ पुरातुमेनका-
नामस्कमेरोरभवत्सुता ॥ गृहमेधीतयैवासीच्चक्रवर्तीधराभृतां ॥ ५५ ॥-
कन्याद्वयममुष्यासीदेकामंदाकिनीतयोः ॥ अन्याभगवतीसाक्षाच्चंद्रचू

टि० ॥ १ सरलाः २ उन्नतेन. ३ जन्मपर्यंतंवत्सोच्छिष्टंच. ४ धर्मः बलीवर्दश्च ५ वेदः कर्णश्च ६ गंगां

डकुटुंबिनी ॥५६॥तांनदीं विबुधालब्ध्वानाकलोकमनीनयन् ॥तपस्यंतीं
गिरिगौंरीं देवायमहतेददौ ॥५७॥शिवयोर्युंजतोवीर्यंधृत्वाधात्र्यासमर्पि
तं॥पावकःप्रतिजग्राहदेवतैरनुमोदितः ॥५८॥अनपत्यानथामर्त्यान्ब
हुभार्यांच्चमेदिनीं ॥अकरोदंबिकाकोपःपुत्रालाभसमुद्भवः ॥५९॥अथसे
नान्यमिच्छद्भिरुक्तःसब्रम्हभिःस्मरैः॥ वन्हिर[1]न्हायजान्हव्यांन्यषिंचद्वी
र्यमैश्वरं ॥६०॥सापिसप्तार्चिषाक्षिप्तंतेज[2]स्तत्सोढुमक्षमा ॥हिमवत्प्रांत
कांतारेश्रांताशरवणेजहौ ॥६१॥तत्राभूत्कृत्तिकाप्रीत्यैषोढारूढमुखां
बुजं॥तारकध्वांतविध्वंसिसद्यःषाण्मातुरंमहः ॥६२॥त्रैविध्यंश्रूयतां
वत्ससरितस्त्रिदिवौकसां॥यथोक्तंहव्यमश्नंत्यादेवतायाइवाध्वरे॥६३
॥पुरीमयोध्यामध्यास्तसावित्रःसगरोनृपः ॥केशिनीस्मतिभ्यांच्चलंघि



टि० ॥१ झटिति ॥२ वीर्यं.॥

मवलोक्य पलायमानाः करतलगलितपलाशसमित्कुशाः कुशिकनंदनांते
वासिनः ससंभ्रममभिलषिताहवाय राघवाय न्यवेदयन् ॥ ५० ॥ हत्वाद्रेः शिख
राणि तानि परितः क्षिप्त्वा हसित्वा क्रुधा कृत्वा हस्तविघट्टनं ततइतः स्थित्वा न-
टित्वा मुहुः ॥ सिक्त्वा क्ष्मामसृजास्रजां त्रुटतया बध्वा कचान् खेचरान् दग्ध्वा
ग्नेः सदृशा दृशा निशिचरा रुधंतिरंध्रं दिवः ॥ ४८ ॥ तत्र ॥ संक्रांतवर्णांतरगा-
धिसूनोः संपर्कपुण्यादिव रामभद्रः ॥ क्षात्त्रक्रमासि प्पलदंडयोग्यः पलाश-
दंडाद्दतपाणिरासीत् ॥ ४९ ॥ मारीचनीचमतिराहवमारचय्य क्षिप्तःक्षणेन र
घुनायकसायकेन ॥ मध्येपयोनिधिभयेन निमग्नमूर्तिर्वर्षं पुपोष जलमानु
षनिर्विशेषं ॥ ५० ॥ स्कबाहुराहवोन्मत्तः कृत्तः काकुत्स्थपत्रिणा ॥ मुनीनाम-
नभिप्रेतः प्रेतनाथातिथी कृतः ॥ ५१ ॥ वंशस्पृशा हृदयहारिफलान्वितेन-

टि० ॥ १ विश्वामित्रः ॥ २ राक्षसः किंशुकश्च ॥

स्तेषामेनं तत्रैवमब्रवीत् ॥ गंगामिहानयायुष्मन्नेषामेषा गतिः परा ॥ ७३ ॥ त- | बा॰कां॰
तस्तनयवृत्तांतं श्रुत्वा लब्ध्वतुरंगमः ॥ समाप्य सगरः सत्रं पुत्रशोकाद्दिवं गतः | १
॥ ७४ ॥ अथांशुमानयं राज्यं चिराय परिपालयन् ॥ दिलीपे न्यस्तभूभारस्त-
पस्तेपे हिमालये ॥ ७५ ॥ दिलीपेपि दिवं याते श्रुत्वा वृत्तं भगीरथः ॥ इदमर्धं क्षेपकं ॥
पितॄन्विधातुं सुगती निदधे मतिमान्मतिं ॥ ७६ ॥ अमर्त्यसरितं कर्तुं मेने मर्त्यतरंगिणीं
॥ ततो गोकर्णमासाद्य तपस्यति भगीरथे ॥ ७७ ॥ देवो देवापगां वोढुमन्वमंस्त
दयानिधिः ॥ अथ वीचीचयच्छन्नदिगंतगगनांतरा ॥ ७८ ॥ शशांकशंखवसं
भिन्नतारामौक्तिकदंतुरा ॥ तरंगाकृष्टमार्तंडतुरंगायासितारुणा ॥ ७९ ॥ फे
नच्छन्नस्वमातंगमार्गणव्यग्रवासवा ॥ आविःशाखिशिखोन्नेयनंदनद्रुम
कर्षणा ॥ ८० ॥ एकोदकनभोमार्गदिङ्मूढदिवसेश्वरा ॥ आवर्तगर्तसंक्रांत | ११

टि॰ ॥ १ जलभ्रमः ॥

विमानप्लवविप्लवा ॥८१॥ नीलजीमूतशैवालकुंतलेरवहरित्तटा ॥ अवलेप[1]
भराक्रांतास्फुरल्लोकतरंगिणी ॥८२॥ पपात पार्वतीकांतजटामंडलगह्वरे[2]॥
अलब्धनिर्गमाशंभोःकपर्दोदमरापगा ॥८३॥ ददर्शोदूर्वाशिखालग्नतुषार-
कणिकोपमां ॥ अदृष्ट्वा तान्नदींतत्रतुष्टाव परमेश्वरं ॥८४॥ भगीरथोविधेः
क्रौर्यात्परिक्षीणमनोरथः ॥ गंगासप्ताकृतिर्जातान्यपतद्धरमूर्द्धनि ॥८५॥
तेनस्कत्याप्रसन्नेनक्षिप्ताबिंदुसरस्यपि ॥ तास्रप्राचीं गतास्तिस्रस्तिस्रः
प्रोचेतसींदिशं ॥८६॥ अन्यापितृक्रियोद्युक्तभगीरथरथानुगा ॥ सैषाभा-
गीरथीजन्होःसत्रक्षेत्रंसमावृणोत् ॥८७॥ तांसपीत्वाततःशांतोजह्नोश्श्रो-
त्रेणवर्त्मना ॥ तयातटिन्याजान्हव्याप्रापय्यत्रिदिवंपितॄन् ॥८८॥ भगीर-
थःपुरंप्रापपरिपूर्णमनोरथः ॥८९॥ ग० ॥ अथदाशरथिराकर्णितभागीर-

टि० ॥१ गर्वः ॥२ जटाजूटः ॥३ वारुणीं ॥

थीकथस्तांसरितंविलंघ्यविशालांपुरींविलोकयन् कस्येयमितिगाधिनंदन- बा॰कां
मपृच्छत्॥सोप्येवमवोचत्॥पुराखलुसुरासुराणांसुधानिमित्तंमिथो- १
विरोधेप्रवृत्तेमायांविश्वमोहिनींविश्वरूपःप्रदर्श्यदैतेयनिधनंशतधार-
पाणिनाकारयामास॥तेषांतुजननीदितिरतिवेलमभ्युपगतमन्युः शतम
न्युशासनंकमपिपुत्रंलब्धुकामापत्युर्मरीचेर्वचनात्कुशप्लवनेसुचिरंत-
पश्चचार॥ तांकैतवेनशुश्रूषमाणः शक्रः शतधारपाणिः पादकलितके
शकलापामापन्ननिद्रामपवित्रेतिनिर्वर्ण्यावगाहिततदीयजठरः सप्तधा-
गर्भंनिर्भिद्यनिर्जगाम॥ दितिरपिविदिततनयकदनातान्यपिखंडान्याखं
डलेनसप्तमरुतः कारयित्वात्रिविष्टपंप्रविष्टा॥ततः॥प॰॥अलंबुसायामि
क्ष्वाकोर्जातः कश्चिन्महीपतिः॥विशालःस्वेननाम्नात्रविशालांविदधेपुरीं १२
टि॰॥१विष्णुः २ इंद्रः॥

तप्रथमाश्रमः ॥६४॥ सपुत्रीयन्सपत्नीकस्तपस्तेपेहिमालये ॥ भृगुःप्रीतम
नास्तस्मैददौदायादसंपदं ॥६५॥ असमंजसकतंलेभेवैदर्भीकेशिनीतयोः ॥
षष्टिंपुत्रसहस्राणांस्कमतिश्चयवीयसी ॥६६॥ असमंजसचारित्रमसमंजम-
पास्यसः ॥ आरब्धहयमेधःसन्नमुंचततुरंगमं ॥६७॥ क्रव्यादवपुषासोयम-
हारिहरिणाहयः ॥ ततस्तन्नष्टमन्वेष्टुंसुमतेयाःप्रतस्थिरे ॥६८॥ सर्वेसपर्व
तामुर्वीरवनंतःसगरात्मजाः ॥ चक्रुर्झर्झरितध्वांतंनागलोकंनखांशुभिः ॥
६९॥ तएतेतपसादीप्तेतमस्तोमप्रमाथिनि ॥ कापिलेज्वलनेवीरालेभिरे-
शलभोपमां ॥७०॥ असमंजस्कतंपौत्रमंशुमंतमथाब्रवीत् ॥ सैप्तिंहत्वा
समाधत्तांसप्तंतंतुंभवानिति ॥७१॥ सोपिगत्वाबिलंतत्रदृष्ट्वाभस्मीकृता
न्पितॄन् ॥ साश्रुस्तेभ्योजलंदित्सुश्चिराल्लेभेतुरंगमं ॥७२॥ मातुलोगरुड
टि० ॥ १पुत्रः २निरस्तः ३अश्वं. ४यज्ञं. ५दातुमिच्छुः ॥

पादरजसा प्रकृति[1]ं प्रपेदे॥ ९५ ॥ ग॰॥ तस्मिन्नहल्यया कृतमातिथ्यं विश्वा-
मित्रः सराजपुत्रः प्रतिगृह्य मिथिलो[2]पकंठ क्षविजातं जनकयजनभवनमभ
जत॥ तदनु जनकेन विधिवदभ्यर्थिते तस्मिन्कुशिकसुते निमिकुलपुरो-
धाः शतानंदो रघुनंदनमेवमभाषत॥ प॰॥ तिष्ठन्क्षत्रार्ह वृत्तो मुनिरगम
दसावाश्रमं ब्रह्मसूनोरातिथ्यं तत्र लब्ध्वा निरवधि सुरभिप्राभवादित्यवेत्य
॥ सोनेन प्रार्थितोभूत्तदनु मुनिवरेणाभ्युपेते चकर्षन् क्रोशंतीं तां तथैव प्रचु
रबलजुषा कांदिशीको बभूव॥ ९६ ॥ ग॰॥ बहुशस्त्रतूलचकितस्य तपोबला
धिगतविविधायुधनिर्गमस्य सुरभिनिमित्तं भूयोपि समारब्धसमरस्य दि-
व्यास्त्रपरंपरां ब्रह्मदंडेन निरुंधन्नेरुंधतीजानिरवतस्थे ॥ ततोयं जातव्य-
लीकः क्षात्रतेजसः परं ब्राह्ममेव महो महीय इति निश्चित्य तत्सिद्धये दाक्षिण १३

टि॰॥ १ पूर्वरूपं. २ अंतिकः ३ मृगयाव्यापारः ४ वेदस्य. ५ वसिष्ठः ६ दुःखं.॥

स्यांदिशितीव्रतरंतपश्चचार ॥ अथसावित्रः क्षत्रियस्त्रिशंकुः सशरीरः स्वर्ग
सिद्धिंप्रार्थयमानोवसिष्ठेन प्रत्याख्यातस्तस्यपुत्रैर्महोदयादिभिर्निर्बंधकु
पितैर्दत्तचंडालभावस्तमेनंशरणमभजत ॥ असावपितन्मनोरथपूर्तयेक्र
तुमेकंकर्तुंप्राक्रमत ॥ तत्रसमागतेषुब्राम्हणेषुजिगुप्सयात्रिशंकुयजने
नागतान्वसिष्ठपुत्रानयंशापेनश्वभक्षकानकरोत् ॥ तत्रक्रतुभुजांवर्गे
पिस्वर्गादनवतीर्णे ॥ पू० ॥ अयंमहात्मातपसः प्रभावादारोपयामासदिवं-
त्रिशंकुं ॥ नीलांबरंनिन्हुतराजवेषंवर्षानिशीथादविशेषवेषं ॥ ९७ ॥ ततः
॥ अपातयत्स्वर्गमुपाश्रयंतंसंजातमन्युः शतमन्युरेनं ॥ ततोवलंब्या-
स्यनियोगशंकुंलेभेत्रिशंकुर्गगनेप्रतिष्ठां ॥ ९८ ॥ ग० ॥ ततः सर्वगीर्वाण
गणप्रार्थनयापरित्यक्तफ्रवनांतरनिर्माणकर्माणंतत्रतपः प्रत्यूहः प्र
टि० ॥ १ कुत्सया. २ त्यक्तः ॥

स्युद्भूतइतिपश्चिमायांदिशिपुष्करेपुष्कलंतपश्चरंतममुमंबरीषयज्ञपशु
विनाशप्रायश्चित्तार्थंबह्वीभिर्गोभिःक्रीत्वानरपशुतांनीयमानस्तावदृ-
चीकस्यमध्यमपुत्रःशुनःशेपःशरणमयाचत ॥ अयंभगवान्निजतन-
यविनिमयेनरक्षितुमेनमुन्मुखःपराङ्मुखेभ्यस्तेभ्योहविष्यंदादिभ्यः
शापेनवसिष्ठपुत्रदशांदत्वागाथाद्वयप्रीताभ्यामिंद्रोपेंद्राभ्यामंबरीषंशु
नःशेपंचपरिपूर्णमनोरथौकारयामास ॥ ततः तपस्यंतमेनंमेनकासं
गतस्तपोभंगश्चिरमंगीचकार ॥ ततःपश्चात्तापाभिभूतोयमुत्तरेभूभृ-
तिकौशिकीतीरेघोरंतपश्चचार ॥ तत्रजंभारिप्रहितांरंभांशैलीभवेतिश
प्त्वापूर्वस्यांदिशिनिरस्तनिश्वासंतपश्चरत्यमुष्मिन्नूष्मणातपोग्नेरुद्विज
मानसस्तोमरसासनःसन्निधायजितेंद्रियत्वाद्ब्रह्मर्षिरसिवसिष्ठोप्येवं १४

टि॰ १ ब्रम्हदेवः ॥

॥९०॥ तदनु ॥ग०॥ तद्वास्तव्येनसुमतिनाम्नानृपतिनाकृतातिथ्यः सराज
पुत्रोविश्वामित्रस्तत्रनिशीथिनींनीत्वामिथिलांप्रतिप्रास्थितःप्रत्तपसामु
त्तमस्यगौतमस्याश्रमंप्रदर्श्यतद्द्वारानुषक्तांकथामित्थमकथयत् ॥प०
॥अत्रागमद्गौतमधर्मदारानननार्यजुष्टेनपथामहेंद्रः ॥क्रुद्धस्ततोनिर्वृष
णंवृषोणंभार्यामहृश्यांचमुनिश्चकार ॥९१॥ वनमेतद्गतेरामेशापान्मु-
क्ताभविष्यसि ॥इत्युक्त्वागौतमःपत्नींहिमाद्रिंतपसेययौ ॥९२॥ ततोवि
दितवृत्तांतेदेवतानांगणेतदा ॥पितृणांप्राभवाल्लेभेमेषस्यवृषणंवृषा ॥-
९३॥ तदेनामेनसोमुक्तांप्रतिगृण्हातुगौतमः ॥इतितस्याश्रमंभेजेसाकं
रामेणकौशिकः ॥९४॥ ततः ॥दुःखेसुखेचरजएवबभूवहेतुस्ताहग्वि-
धेमहतिगौतमधर्मपत्न्याः ॥यस्माद्गुणेनरजसाविकृतिंगतासारामस्य-

टि० १संबद्धां. २निरंडं. ३इंद्रं. ४शिलां. ५अवेः ॥

तनयस्वर्गमार्गैकबंधुः ॥क्रीडाशैलः परमपुरुषक्रोड[1]दंष्ट्राचतस्याःसीतामातु
र्जगतिमिथिलां[2]सूतिकागेहमाहुः॥१०१॥अत्रसीताविवाहार्थममरैरपिदुष्क
रं॥जनकः कल्पयामासधनुरारोपणंपणं॥१०२॥ ततोमहर्षिर्जनकस्यरा-
ज्ञःसभांस्फधर्मासदृशींप्रपेदे ॥तौचापतुश्चापविलोकलोलौसचापलौको
सलराजपुत्रौ॥१०३॥ग०॥ तत्रविधिवदभ्यर्चितःकथितदशरथतनयवृत्तां
तः कौशिकप्रमुखैरमरैरस्मत्कुलेमहत्तरेदेवरातेनिक्षिप्तंविशेषतःसीताशु
ल्कार्थंमयारक्षितमिदमितिजनकेनप्रदर्शितस्यचापस्यारोपणेराममादिदे
श॥प०॥रामेबाहुबलंवितन्वतिधनुर्वंशेगुणारोपणंनाभूत्केवलमात्मना-
तिलकितेवंशेपिवैकर्तने ॥आकृष्टंनितरांतदेवनपरंसीतामनोपिद्रुतंभंग-
स्तस्यनकेवलंक्षितिभुजांदोस्तंभदंभस्यच॥१०४॥ रामाकर्षणभग्नकार्मु-
टि०॥१वराहः २अरिष्टं. ३सतृष्णौ ॥

कम्बुवाध्मानेनरो[1]दोरुघाद्दसक्षत्रयशःसिते[2]च्छदकुलेजीमू[3]तनादायितं ॥-
वीरश्रीप्रथमप्रवेशसमयेपुण्याहघोषायितंमैथिल्याःकिलमानसेपरिण
येमांगल्यतूर्यायितं ॥१०५॥ रवः कठिणकर्षणत्त्रुटितचापजन्माक्षणाद्दि-
शांद्विरदफीत्कृ[4]तैः कृतहरित्पतिस्वागतः ॥ जगद्भ्रमणकौतुकोच्चलितराम
कीर्त्यंगनाप्रयाणपटहध्वनिंप्रथयतिस्मताराध्वनि ॥१०६॥ग०॥त-
[illegible]सीतापरिणयकृतनियमजनकप्रहितदूताहूतःपुरोहिताभ्युपगमा
न्मिथिलामुपागमद्दशरथः ॥प० ॥ यत्कीर्तिस्त्रिलोकायतनेस्मरवधूसंगीत-
गोष्ठीसुखेयेनाद्यःपितृमान्पुमान्वसुमतीयेनैवराजन्वती ॥ इंद्रःसंगर
संकटेषुविजहौवीरस्ययस्योन्मुखप्रेंखत्स्यंदनकेतनांबरदशासंदर्श-
नाद्दुर्दशां ॥१०७॥ ततः ॥ जनकःस्वक[5]नीयांसमाजुहावकुशध्वजं ॥ हत्वा-

टि० १ द्यावापृथिवी, २ राजहंसः ३ मेघः ४ तज्जातिशब्दैः ५ कनिष्ठं ॥

युधिस्कधन्वानंसांकाश्येस्थापितंपुरे ॥१०८॥ ग० ॥ तदनुताभ्यामभ्यर्चितःस
पुरोहितोदशरथस्तत्रपुत्राणांगोदानमंगलंनिर्वर्तयामास ॥ प० ॥ जग्राहज-
नकात्सीतांतातादेशेनराघवः ॥ आम्नायशासनेनार्चायजमानादिवानलः
॥१०९॥ ग० ॥ आश्चर्यमेतत् ॥ प० ॥ गुणमनिमिषचापेकंचिदारोप्यसीतां-
कुशिकतनयवाक्यादग्रहीद्रामभद्रः ॥ तदनुतदनुजन्मामैथिलेंद्रस्यचि
त्तेनिहितबहुगुणःसन्नूर्मिलांलक्ष्मणोपि ॥११०॥ ततोभरतशत्रुघ्नौकुशध्व
जनियोगतः ॥ मांडवीश्रुतिकीर्तिभ्यामभूतांग्रहमेधिनौ ॥१११॥ ग० ॥ अ-
थदशरथःस्वतनयैःसहकृतविवाहैर्विदेहेभ्यःप्रतिनिवर्तमानोदुर्निमि-
त्तदूयमानांतरंगःसंवर्तसमयसमुज्जृंभितहुतवहदुःसहरोषभीषणंदु-
र्वारपराक्रमंक्षत्रवर्गगर्वसर्वंकषपरश्वधधाराधीनरुधिरधारापरिकल्पि

टि० ॥१ केशांतकर्म ॥ २ वेदः ॥

व्याहरतुभवंतमित्यभाषत ॥ प० ॥ असौवसिष्ठनिर्देशाद्रुह्मर्षित्वमविंदत ॥ यथोपनयसंस्काराद्विजन्माब्रम्हवर्चसं ॥ ९९ ॥ इतिजनकेपुरोधःश्लाघितोगाधिसूनुःसहनृपतनयाभ्यांशर्वरींतत्रनीत्वा ॥ विधिवददिशदर्घ्यंपुष्पदर्भाग्रगर्भंसरसिजदयितायज्योतिषेछांदसाय ॥ १०० ॥ ग० ॥ तदनुजनकराजधानींरामलक्ष्मणनिरीक्षणकौतुकादनवरतपातितेनविकचकुवलयनिचयोपचीयमानमेचकमरीचिवीचिमलिम्लुचेनपौरनारीजनविलोचनरोचिषाकवचितनरपतिपथांविश्वामित्रःप्रविश्यदशरथतनयावित्थमभाषत ॥ अस्यांखलुनगर्यामारब्धयज्ञस्यराज्ञोजनकस्यभागधेयात्सीतानामधेयभाजनमजीजनत्कन्यारत्नंरत्नगर्भाभगवती ॥ तस्याःपुनःकिंपरंकिमपिमाहात्म्यं ॥ यतः ॥ प० ॥ यस्याःपृथ्व्यावसनमुदधिःपीठिकाहाटकाद्रिर्हारःसिंधुःसगर

टि० ॥ १ व्रतबंधः २ पुरोहितः ३ सूर्याय. ४ नीलाः ५ पृथ्वी. ६ हेमाद्रिः ७ गंगा. ॥

योः॥ऋजुतावक्रतांप्रापवक्रतापितथार्जवं॥११५॥ग०॥ततस्तत्क्षण-
ममोघेनराघवःशरेणभार्गवस्यस्वर्गगतिंरुरोध॥स्थानेहितत्॥प०॥नू
नंजनेनपुरुषेमहतिप्रयुक्तमागःपरंतदनुरूपफलंप्रसूते॥कृत्वारघूद्व-
हगतेःक्षणमंतरायंयद्भार्गवःपरगतेर्विहतिंप्रपेदे॥११६॥ग०॥अथसं-
क्रांततयाजामदग्न्यशक्तिसंपदासंपन्नंपन्नगपरिबृढभोगभुजाभिराममम
विरलपुलकमालिंग्यमूर्ध्न्युपाघ्रायदशरथःपरिखयेवपरिसरंस्यासरयू-
सरितानुविद्धामयोध्यांदारकान्सदारान्सादरमवलोकयंतीनांपौरपु
रंध्रीणांनीरंध्रितगवाक्षैःकटाक्षैःसौंदर्यवंचितत्तापिच्छैःपिच्छातपत्राय
माणधवलातपत्रःप्रविवेश॥प०॥तत्र॥लज्जावशादविशदस्मरविक्रि-
याभिस्ताभिर्वधूभिरतिवेलमवाप्तसौख्यान्॥इक्ष्वाकुनाथतनयान्प्र- १७

टि०॥१अपराधः॥२विघातं॥३श्रेष्ठः॥

थमोरसानांतारुण्ययोगच्चतुरश्[1]चतुरःसिषेवे॥११७॥विद्ययेवत्रयीदृष्ट्या
दर्भपत्राग्रधीःसुधीः॥राजपुत्र्यातयारामःप्रपेदेप्रीतिमुत्तमां॥११८॥ ॥
इतिश्रीविदर्भराजविरचितेचंपूरामायणेबालकांडःसमाप्तः॥ ॥अथ-
द्वितीयकांडप्रारंभः॥ ॥प०॥गच्छतादशरथेननिर्वृतिं[2]भूभुजामसुलभां[3]
भुजाबलात्॥मातुलस्यनगरेयुधाजितःस्थापितौभरतलक्ष्मणानुजौ १
अथदशरथःपुत्रंरामंस्वतस्त्रिजगत्पतिंस्वविषयमहीमात्रेकर्तुंपतिंवि-
दधेमतिं॥भुवनभरणे[4]कल्पं[5]कल्याण[6]भूधरमादरात्स्वगृहपटलीधुर्य-
स्तंभंविधातुमनाइव॥२॥ग०॥तदनंतरमसौसंमंत्र्यमंत्रिभिःसहपौर-
वृद्धान्वृद्धश्रवःपुरोधसःसमान्पुरोहितान्समाहूयसमादिदेश॥विदि-
तमेवहिभवतांशिवंतातिमेवमतिंदधानाःसुपार्थिवेषु संचरमाणाःप्राणि-

टि०॥१ चतुःसंख्याकान्. २ सुखं. ३ दुर्लभां. ४ धारणे. ५ समर्थं. ६ कल्याणकरीं.॥

चं॰रा॰ नांद्यमानमानसाःमानधनाःअयशःसं[1]सरणिसंमार्जनजागरूकाःज- अ॰कां॰
१८ नोपतापमार्जनपराःपरांनिर्वृतिमुपेत्यदे[2]वभूयंगताःसर्वेनःपूर्वपुरुषाइ २
ति॥तस्मादस्माभिररण्ये[3]तेषांसरणिमनुसरमाणैरेतावंतंकालंपरिपालि
ताःकिलसकलाःप्रजाःप्रमाणमत्रपरिपालनक्रियामनुभवंतोननुभवं-
तः॥एवंभवतामभ्युगतानांनिगमानांवाप्रतीपगामिनीपदवींनप्रत्ये[4]
तिखलुलोकस्तदस्तिकिंचिदभ्यर्थनीयं॥प॰॥समस्फुरन्नरगीतख्याति
भिर्हेतिभिर्वादिविभ्रकविचसमानप्र[6]क्रमैर्विक्रमैर्वा॥नियतमपरिहार्योप्या-
जरासामदंगेविकचकमलखंडेचंद्रिकेवाविरासीत्॥३॥ग॰॥तस्मात्स[9]म
स्तक्षत्रवर्गगर्वपा[7]टनपटुधारापर[8]श्वधभरणभीषणवेषभार्गवभंगादपरि
च्छिन्नतरशौर्यशालिनिसौजन्यभाजनेजनानुरागनिलयेनिर्मत्सरेमत्स १८

टि॰॥१मार्गं.२देवत्वं.३पूर्वपुरुषाणां.४विश्वसिति.५शस्त्रैः.६आरंभैः.७नाशनं.८कुठारः.९अपरिमितं.

तपित्रृतर्पणंदर्पवतामग्रेसरंसमुदग्रप्रतापंतपःसमुचितवल्कलमयवस-
नंवसानमपिवासनावशादनतिपरिमुषितयुद्धश्रद्धंमध्येमार्गंभार्गवंमु-
निमन्विष्टरामभद्रमद्राक्षीदप्राक्षीच्च ॥ तन्निरीक्षणादेवप्रक्षीणहर्षोपिमह-
र्षिभिःसहविधायसपर्यामार्यशीलःकुशलमन्वयुंक्त ॥ प० ॥ अथदशरथ
वाणींतामश्रृण्वन्प्रसन्नांभृगुपतिरिदमूचेप्रस्थितंरामभद्रं ॥ अवजिगमि
षुरासंजीर्णंचापात्तकीर्त्तेरविदितपरशोस्तेदोर्मदंकार्मुकेस्मिन् ॥ ११२ ॥
आदायतत्सगुणमाशुविधायतत्रसंधायबाणमवधार्यतपोधनत्वं ॥ त-
ज्जीवितायदयमानमनामनीषीसंभूतघोरसमराद्विरराम रामः ॥ ११३ ॥-
तावुभौचभृगुवंशसंभवौचापदंडजमदग्निसंभवौ ॥ प्रह्वभावमवलंब्यके-
वलंराघवार्पितगुणौबभूवतुः ॥ ११४ ॥ युगपत्प्राप्तगुणयोश्चापभार्गवयोस्त
टि० ॥ १नम्रत्वं ॥ २ विनयः मौर्वीच ॥

भागानुन्मुच्यमार्गपरिपालनजागरूकान्॥अम्लानमौग्ध्यमचिरादवलं
ब्यराममेवंविधःकथमुदेतिजनानुरागः॥५॥ग०॥तेपिनियमितनिजम-
नोरथायदशरथायसविनयमेवंव्यजिज्ञपन्॥प०॥देवेस्थितेपितनयंतव-
रामभद्रंलोकःस्वयंभजतुनामकिमत्रचित्रं॥चंद्रंविनातदुपलंभनहेतुभू-
तंक्षीरोदमाश्रयतिकिंतृषितश्चकोरः॥६॥ग०॥तदनंतरंतत्वरेतत्त्ववि-
दांवरस्यवसिष्ठस्यशासनादभिषेकोपकरणाहरणायसामात्यःपौरवर्गः॥
प०॥आहूयरामंविनयाभिराममाविःप्रमोदप्रकरेवमूचे॥तेवोत्तमांगे-
मुकुटंविधातुमन्हायतिष्येदिवसेयतिष्ये॥७॥ग०॥अथदशरथमनोरथं
कौसल्यायैनिवेद्यस्वभवनमुपगतस्यरामस्यभगवान्वसिष्ठःसंजातकौ
तुकःकौतुकमंगलंनिर्वर्तयामास॥प०॥आपूरयन्मंगलतूर्यघोषैराशा

टि०॥१मस्तके·२पुष्पे·३दिग्गजाः॥

वशावल्लभकर्णतालान् ॥ उज्जृंभितः कोपिगिरामभूमिरुन्मस्तकःपौ-
रजनातिमोदः ॥ ८ ॥ तत्र ॥ यामेवाहुर्निशिचरकुलोन्मूलनेमूलहेतुंय-
स्याश्चित्तंप्रकृतिकुटिलंगात्रमित्रंबभूव ॥ अंभोजिन्याःशिशिरसरित्तः-
कोसरीवाच्छमंभः कैकेय्याःसाहृदयमदयंमंथरानिर्ममंथ ॥ ९ ॥ अल-
घुचलितझंझावातनिष्पेषदोषादशनिरिवकठोरःशीतलांभोदपंक्तौ ॥-
अपहृतजनसौख्यान्मंथराभेदवाक्यादपिभरतजनन्यांहंतदौर्जन्यमा-
सीत् ॥ १० ॥ ग० ॥ सैषामंथराभिधानपिशाचिकावेशपरवशनिजाशयापू-
र्वंदंडकेवैजयंतपुरवास्तव्यशंबरासुरसंगरसंगतवेदनापनोदनवेत-
नार्थमात्मनेवितीर्णवरायदशरथायवरद्वयंन्यवेदयत् ॥ प० ॥ तयोरेक-
स्यसंरंभोभरतस्याभिषेचनं ॥ अन्यस्यवन्यवृत्त्यैववनेरामस्यवर्तनं ॥-
टि: ॥ १ महिषी. २ सटृष्टिकवायुः ॥

११॥ तस्मिन्क्षणेवरयुगंक्षणतस्सताम्रनाराच[1]वेधपरुषं[2]श्रवसीविदार्य ॥ स-
त्यप्रहाणचकितस्यनृपस्यकामम[3]ूरीचकारहृदयेपुटपाकरीतिं ॥१२॥ तद
नुतनयवार्तामात्रसंतप्यमानादथदशरथचित्ताच्चेतनानिर्जगाम ॥ दव-
हुतवहरोचिर्ज्वालयालिह्यमानाज्झटितिगहनगुल्मादुज्जिहानामृगीव ॥
१३॥ग०॥ अथदशरथःकथमपिलब्धसंज्ञःकैकेयीमभाषत ॥प०॥ रामः
काममुपाश्रयिष्यतिवनंत्यक्त्वाधृतंकौतुकंलोकस्त्यक्ष्यतिकौतुकंचिर
धृतंतस्याभिषेकेकथं ॥ धर्मापायभयेनवत्सविरहंद्रक्ष्यामिवक्ष्यामिकिं
यावत्कल्पमकीर्तिरार्तिजननीजायेतजायेतव ॥१४॥ वत्सकठोरहृदये-
नयनाभिरामंरामंविनानखलुतिष्ठतिजीवितंमे ॥ धातुर्बलाद[4]ुपयमस्त्वयिं
जातपूर्वःकैकेयि[5]मौमुपयमंनयतीतिमन्ये ॥१५॥ग०॥ तदनुनिजमनोरथै २०

टि०॥१ बाणः २ कर्णौ · ३ अंगीचकार · ४ विवाहः ५ यमसमीपं · ॥

मेववत्सेस्मिन् विश्वंभराभारं चिरकालधार्यमाणमार्यैरमात्यैरनुमतः सन्न
वतार्यविश्रांतिसुखमनुभवितुमभिलषामीति॥ ततः प्रावृषेण्यपयोवाहव्यू
हस्तनितनादाकर्णनसमुदीर्णनिरतिशयाल्हादनिसर्गनिरर्गलनिर्गलत्के-
कालापिनःकलापिनइवजनाः प्रमदभवकलकलरवमुखरितहरिन्मुखा-
बभूवुः॥ प०॥ आनंदबाष्पविसरोनयने प्रजानामाविर्बभूवमकरंदइवार
विंदे॥रामस्यकांतिमभिषेकदिनेभवित्रीं प्रक्षाल्यन्वक्ष्यरिववीक्षितुमादरे-
ण॥४॥ग०॥ राजापितेषांसंपत्स्यमानमहोत्सवोत्सुकजनसंमर्दजनिष्य
माणरजोराजिव्रातपरिजिहीर्षयेवरोमांचप्रपंचेनकंचुकितांगानांप्रमा-
णातीतांप्रीतिंप्रपन्नानांहर्षप्रकर्षेणद्विगुणीकृतमानंदमंतर्नियम्यसुमं
त्रप्रमुखान्मंत्रिमुख्यानेवमाचख्यौ॥प०॥ अस्मानना श्रितनपोवनभूमि-
टि०॥१श्रवणं.२अपरिमितः ३ निष्प्रतिबंधं.४ हर्षः॥

वदतु ॥ अयिकठिनहृदयेकिमुक्तंमुक्तलोकमर्यादयादयापेतयात्वयेति ॥ प॰
॥ नैवाभवस्त्वमिहशीलवतीषुगण्यानैवागमस्त्वमतांगणनांसरामः ॥ नैवा
पमात्मजसुखान्यहमप्यनार्येनैवापमंबुभरतेननमेप्रदेयं ॥ २१ ॥ किंच ॥-
वासस्त्वचांभवतुकिंचन[1]तारवीणांच्छायाद्रुमाश्चभवनानिभवंतुवन्याः ॥
कैकेयितस्यशयनानिकथंभवेयुस्त्वच्चेतसोपिकठिनानिशिलातलानि ॥
२२ ॥ एवंभर्त्राभर्त्सिताप्यार्द्रचित्तानाभूदेषामंथराक्रांतवृत्तिः ॥ [2]राकाचंद्रेरा
जमानेनिशायां[3]वीरुच्छन्नाचंद्रकांतस्थलीव ॥ २३ ॥ ग॰ ॥ तदनुमुहूर्तमात्र
मपिराममुखावलोकनसुखमनुबुभूषुर्दशरथः कुमारमानयेतिसुमंत्र-
मादिदेश ॥ तेनसत्वरंराजभवनंप्रवेशितस्ततोरामः कृतप्रणामः पितर
मयथाभूतमुखविकासमारादालक्ष्यचकितमतिः किमिदमितिकैकेयी-

टि॰ ॥ १ तरुसंबंधिनीनां. २ पूर्णिमा. ३ लता. ॥

मन्वयुंक्त ॥ सापिपापाशया[1]प्रत्यवादीत् ॥ वत्सप्रतिश्रुतवरद्वयनिर्वहणेनिपु[2]
णेतरस्तातस्तेसंप्रतिसोनुशय[2]स्तनयवात्सल्यात्सत्यव्यत्यासत्रासाच्चगाढ-
मगाधशोकसागरेनिमज्जतीति ॥ वरद्वयंतावत्तववन्यवृत्त्यैववनेवर्तनमवे[3]
नेरवनंभरतस्यचेति ॥ रामस्तदाकर्ण्यप्रमुदितहृदयः कृतांजलिरेनांव्य-
जिज्ञपत् ॥ प० ॥ भीतोभूभरतःकिमंबभरतःकिंवावनात्सावनाल्लस्तोहं-
सगरान्वयककुद[4]स्तातःकुतःशोचति ॥ दिव्यायाःसरितोनिवाप[5]करणा
लघ्वींप्रतिज्ञामिमामावाप्यामिहपूरयिष्यतिनचेत्पुत्रीकथंस्यादयं ॥ २४ ॥
वनभ्रूवितनुमात्रत्राणमाज्ञापितंमेसकलभूवनभारःस्थापितोवत्समू-
र्ध्नि ॥ तदिहस्फुकरतायामावयोस्तर्कितायांमयिपततिगरीयानंबतेपक्षपा
तः ॥ २५ ॥ किंच ॥ तातःस्ववाचाव्यवहृत्यहृद्यंवत्साभिषेकोत्सवमंगलंमे

टि० ॥ १ असमर्थः २ पश्चात्तापसहितः ३ पृथ्वीसंरक्षणं. ४ श्रेष्ठः ५ पितृदानं. ॥

॥प्रणामसंज्ञस्यमयार्पितस्यकिंपूर्णपात्रस्यनपात्रमासीत् ॥२६॥ग०॥ त-
त्क्षणमशनिहतइवपर्वतः सर्वतःपरीतदवदहनइववनस्पतिर्दिवस्पतिप
दभ्रंशविधुरइवनहुषःपपातनिःसंज्ञःपंक्तिरथः ॥ततःसापितृनिदेश-
विचारमचिरमाचरेतिराममादिदेशसएषः ॥प०॥ मातुराज्ञांवहन्मूर्ध्नामा
लामिवमहायशाः ॥वनायरामोवव्राजजगतामवनायच ॥२७॥ग०॥अ
सोसमासाद्यकौसल्यासदनमभिषेकप्रतिबंधंकैकेयीनिर्बंधमात्मनश्च
वनवासंप्रणामानंतरंतस्यैन्यवेदयत् ॥एतदाकर्ण्यविदीर्णहृदयाविष
दिग्धमुखशिलीमुखविद्धश्रवणयुगलेवसहसाभूम्यांनिपत्यविललाप
॥पद्यं ॥रेखारथांगसरसीरुहशंखचिन्हेक्षेमंकरेतवकरेजगतांत्रयाणां
॥कांतारकंदरवननंरचयेतिनूनमाबद्धवान्प्रतिसरंभगवान्वसिष्ठः॥२८

टि०॥१ वज्रं.२ दशरथः ३ लिप्तं.४ मंगलसूत्रं.॥

कपूरणे कृतादरा कैकेयी सोपहासमवादीत् ॥प०॥ सत्यविपूलमपत्यसंगतः सं
गतंभृशमपश्यतस्तव॥आश्रुतस्यविफलत्वमस्तिचेदाशु तस्यरचितोयमं
जलिः॥१६॥ किंनागतस्तेश्रवसोः सकाशमरिंदमः सत्यगिरांपुरोगः॥श्येनामि
षीभूतकपोतपोतजीवातवेशस्त्रनिकृत्तगात्रः॥१७॥किंच॥ अभ्यर्च्यकस्मैचि
दुपाश्रितायवितीर्यविप्रायविलोचनेस्वे॥आपूरयत्काश्चिदलर्कसंज्ञः प्राज्ञः प्र
तिज्ञांप्रथितप्रभावः॥१८॥ असुरसमरवेलाजातबाधावसानेवरयुगमदि-
शस्त्वंप्रीतिपूर्वंयथामे॥अशिथिलगुणबंधाः सत्यसंधानरेंद्राजललिपिरि-
तिकामंसंगिरंतां गिरंतां॥१९॥ किंबहुना॥ सत्योद्यांगिरमिहनिर्वहस्वमा-
वासन्मानंभ्रुविनसहेध्यराममातुः॥संस्थास्येविषमुपभुज्यपश्यतस्तेस-
न्नाहंत्यजसिनचेत्प्रवतमानं॥२०॥ग०॥ एवंवादिनीमेनांभूयोपिभूपतिर

टि०॥१ कर्णयोः ॥२ जीवनार्थं.॥

क्ष्मणं रामः सांत्वयन्नेवावोचत् ॥ वत्स सवितृवंशजातानां पितृनिदेश एव-
देशिकः सर्वकर्मसु ॥ बहवः खलु पितृवचनगौरवात् गोहत्यामपि मातृवध
मपि तारुण्यविनिमयमपि मृकुंडुरेणुकेयपूरुप्रभृतयः कुर्वाणास्तेपि नि-
र्विचारमाचारवतामग्रगण्या इति गण्यंते ॥ तस्मादवश्यंवश्य एव पितुरव-
गाहे गहनमिति ॥ तत्र विस्तृतपुत्रवात्सल्यात्कौसल्या तेन सह गंतुमभिल-
षंती कृतप्रणामेन रामेण सविनयमेवमभिहिता ॥ प॰ ॥ कांतारभाजि मयि
केकयराजपुत्र्याः कार्कश्यकंदलितया दलितस्य वाचा ॥ तातस्य शोकदह
नग्लपितं शरीरं मातस्त्वया न तु कदाचिदुपेक्षणीयं ॥ ३० ॥ ग॰ ॥ ततः सा त-
नयस्य स्वस्त्ययनाय समस्तदेवताकीर्तनपुरःसरीमाशिषमाचचक्षे ॥ रा-
मस्तामभिवंद्य निष्क्रांतः प्रक्रांतनेपथ्यायाः सीतायाः प्रासादमाससाद ॥

टि॰ ॥ १ कल्याणाय. ॥

प०॥ कल्याणवाद स्फुरितां सहसैव कांतां कांतारचार कथया कलुषीञ्चका
र॥ अंभोदनाद मुदितां विपिने मयूरीं संत्रासयन्निव धनुर्ध्वनिना पुलिंदः ॥-
३१॥ग०॥ अयमेनामुपगंतुमुपक्रांतामकथयत् ॥प०॥ प्रिये जनकनंदि-
नि प्रकृतिपेशलामीदृशीं कथं ग्लपयितुं सहे तव शिरीषमृद्वीं तनूं ॥ गृहीत-
हरिणीगणत्रिकविसारिनानाशिराक्षतिक्षरितशोणितारुण[4]वृकानने कान
ने॥३२॥ग०॥ तदनु नानाविधभयत्रशतेनाप्यनुन्मिषदनुजिगमिषाशै
थिल्यायां मैथिल्यां लक्ष्मणेप्यनवसितानुगमनव्यवसाये वासिष्ठाय स्फय-
ज्ञाय भूषणमशेषं नागसहस्रेण सह शत्रुंजयाह्वयमतुलं मातुलदत्तं हस्ति
नमगस्त्यकौशिकाभ्यां च महार्हाणि च रत्नानि वितीर्य निर्जराराति वीर्यमु-
षी धनुषी निरपायत्राणकर्मणी वर्मणी निर्मर्यादशिलीमुखकृत्तानुषंगौ-
टि०॥ १ हृष्टां. २ किरातः ३ स्वभावः ४ अनुगमनेच्छा. ५ श्रेष्ठवस्तूनि.॥

चं·रा· निषंगौनिर्वर्तितवीरपाणौकृपाणौवरुणेनजनकसदसिदत्तमेतत्सर्वमादाय अ·का·
२४ मामनुगच्छेतिसौमित्रिमन्वग्रहीत्॥सीतापिनिजाभरणगणंसुयज्ञपत्न्यै २·
विदधे॥सौमित्रिरपिस्वधनेनकंचित्कौसल्याश्रितमुपाध्यायमतोषयत्॥
तत्रसकुटुंबायत्रिजटाभिधायद्विजातयेस्वहस्ततलनिक्षिप्तदंडदेशावधिकं
गोधनंकापिल्यादिभ्योद्विजातिभ्यश्चरघुपतिर्वित्तानिविविधानिवितेतार[1]
॥ततस्तेपौरनारीणांविश्वासान्निश्वासजृंभानिलचलदधरकिसलया-
नामश्रुसलिलासारेणशोकपावकेनचवपूंषिमनांसिचसिक्तादग्धान्च
निषिद्धपरिजनानुगमनतया[प्र]काशितप्रवाससिद्धांताच्छुद्धांतान्[2]निश्चक्र
मुः॥तत्र॥प०॥सीतापुरागगनचारिभिरप्यदृष्टामाभूदियंसकलमानवने[3]-
त्रपात्रं॥इत्याकलय्य[4]नियतंपिदधेविधाताबाष्पोदकेननयनानिशरीरभा २४

टि० १ददौ· २अंतःपुरात्· ३नेत्रगोचरं· ४निश्चित्य·॥

ग०॥ तत्रसौमित्रिरतिमात्रप्रवृद्धमन्युः[1]शतमन्युसमानमेनमग्रजमकथय-
त्॥ आर्यनकार्यमिदंलोकगर्हणीयायाः कैकेय्यावचसाजरसाचसमाक्रांत
स्वांततयाकृत्याकृत्यविवेकमूकस्यराज्ञः प्रज्ञाशैथिल्यान्निसृतेनवचसा-
संत्यज्यराज्यमटवीपर्यटनंविधातुं॥ किंतु॥ तुभ्यमनभ्यर्थ्यमानायप्रथम
मेवपित्राप्रदत्तानन्नुपृथ्वी॥ क्षत्रधर्मोपिसत्यात्पथः प्रमाद्योपिवर्णाश्रम
रक्षणतः समीचीनः प्रायेणपुरुषंनिश्रेयसेनियोजयेत्॥ नियतंनियतेर्बे
लमेतिलंघ्यपौरुषमेवपुरुषस्यधीरस्यपुरुषार्थान्समर्पयेत्॥ प०॥ माभूः
त्वत्पदपद्मयोररुणिमाकांतारसंचारतः पाणौपाटलिमामनाकूप्रसरतु-
ज्याकर्षणादेवमे॥ कैकेयीपरिभूततातवचनेनत्वोभवान्मास्मभूत्किं-
वामामकमार्यशौर्यजलधेनत्वंधनुर्वर्तताम्॥ २७॥ ग०॥ एवमाचक्षाणंल-
टि०॥ १ इंद्रः २ दैवस्य. ३ दुर्गममार्गः॥

न्निजंपतिं॥३५॥तत्र॥सिद्धार्थकोमहामात्यस्तत्परित्यागमब्रवीत्॥सरयू
पतितानेकप्रजामरणकारणात्॥३६॥ग॰॥अथदशरथेनरामःसपरि-
च्छदएवगच्छेतिनिर्दिष्टःकेवलंखनित्रपिटकेवल्कलयुगुलंचप्रार्थयत्॥
प॰॥सुखोचितानांसुव्यक्तदिव्यलावण्यसंपदां॥त्रयाणामपिकैकेयी
वल्कलादीन्युपाहरत्॥३७॥अथरघुकुलनाथोमध्यमांबानियोगाद्दु-
णवतिपरिधानेमंगलार्हेनिराशः॥अधिकुचतटवल्गज्जानकीबाष्प-
सेकादपगतखरभावंवल्कलंपर्यधत्त॥३८॥ग॰॥तत्रयेचित्रीयंतः-
सर्वेनिर्विकारवदनलक्ष्मीकमिक्ष्वाकुकुलाध्यक्षमध्यक्षयंतस्तेषा-
मेवशोकशंकुसंकीलितमानसानामाननेषुपारंपर्येणास्फुरद्धिकारः॥
॥प॰॥सवल्कलेदाशरथौविषादादामीलिताक्षोयदभूद्वसिष्ठः॥तदेव २५
टि॰॥१ बद्धं॥

जातंकरणंमहर्षेः काकुत्स्थयाथार्थ्यविलोकनस्य ॥३९॥ अस्यपीतांब
रत्यागेकिंजाताविक्रियापुरा ॥ इतिप्रत्यक्रुद्दशांश्रेष्ठोवसिष्ठोनातिविव्य
थे॥४०॥ग०॥ सोयंमैथिलीवल्कलधारणमरुणद्रुणसारथिकुलगु-
रुः॥तत्र॥ प्रयाणायप्रणिपतंतीं स्नुषामाश्लिष्यकौसल्यागद्गदमवद-
त्॥प०॥घर्मेनिदाघकिरणस्यकरैः कठोरैः कांतारमध्यपदवीषुनरवं-
पश्चास्त॥त्वांवीक्ष्यनिस्तुलपदांवनदेवताभिर्निर्दिष्यतेनियतमेवनिमे
षहानिः॥४१॥ग०॥ अथमैथिलीनाथःसलक्ष्मणःसप्रदक्षिणंराजा-
नंजननीजनंचप्रणम्यप्रतिषिद्धप्रतिहारचक्रोनिश्चक्राम ॥रथोदश
रथाज्ञापरतंत्रेणसुमंत्रेणद्वारिसमानीतः॥प०॥प्रारब्धयात्रस्यरघू
द्वहस्यप्राग्गेवसीतारथमारुरोह ॥ आनीलरथ्यंरथमारुरुक्षोरन्हांप्र-
टि०॥१सूर्यस्य. २अनुपमे. ३हरितयं.॥

चं॰रा॰ २६ भोरग्रसरीग्रभेव ॥४२॥ग॰॥दाशरथीच्चरस्थमारुरुहतुः॥प॰॥यथा-
यथाराघवराजधानींविहायसीताविपिनोत्सुकाभूत्॥तथातथाजा
यतयातुकामालंकांविनाराक्षसराजलक्ष्मीः॥४३॥आबालवृद्धम-
नुगच्छतिरामभद्रमेषापुरीतदिहमारवलुनिर्गुणास्यात्॥इत्यादरादि
वधराबहुधाविधायधूलिच्छलान्निजतनुंतमनुप्रतस्थे॥४४॥नृपमु-
रवविमुरवेनस्वेनकांतेनसाकंदुहितरिविधिपाकात्काननायव्रजंत्याः
॥अकुशलमितिमत्वानूनमन्होयधात्रीपरिजनमुरवबाष्पंपांसुभिः-
पर्यहार्षीत्॥४५॥रामानुसारसहनिर्गतपोरवर्गासंस्थानमात्रगृह
चत्वरराजमार्गा॥निर्मुक्तभोगभ्रुजगत्वगिवक्षणेनलघ्वीबभूवर-
घुपुंगवराजधानी॥४६॥ग॰॥अथदशरथःसांतःपुरजनःपुरा- २६
टि॰॥१दैवं.२झटिति.॥

अ॰का॰ २

जां ॥ ३३ ॥ रुद्धापियांतमनुगच्छतिमैथिलीमावत्सोजहातिनकदाचन-
लक्ष्मणोपि ॥ इत्येतयोरनुगतिंप्रतिबोध्यगंतुंभूयोपिराजभवनंप्रविवे-
शरामः ॥ ३४ ॥ ग० ॥ तस्मिन्समंत्रेणविज्ञाप्यदर्शितेदाशरथौभूपतिर्भू-
ताविष्टइवविष्टरान्निपत्यसदारःसदारचितपरिदेवनोत्कंठांस्वयमप्यक
रोत् ॥ तदासमंत्रःकैकेयीमब्रवीत् ॥ देविविरमविरमरामाभिषेकसमु-
न्मिषितात्ल्हादांकुरावग्रहादाग्रहात् ॥ पुराखलुब्रम्हणोवरप्रसादादवगत
सकलप्राणिभाषणतयापर्यंकपर्यंतपरिसरात्पिपीलिकालापेकृतहासंत
वपितरंहसनकारणंपृष्ट्वातद्विवरणंपत्युर्मरणहेतुरित्येवेत्यापिभूयसो-
निर्बंधात्कुपितेनराज्ञावज्ञातायाःमातुस्तेमार्गंमाकुर्वीथाइत्ति ॥ नतः ॥-
प० ॥ कृतासमंजनिर्यासंसगरंकेकयात्मजा ॥ निदर्शनेननिर्दिश्यनिरबध्ना
टि० ॥ १ अवर्षणं. २ दृष्टांतेन. ॥

पिहितरथतुरगखुरमुद्रयापदव्यागंगातरंगसंगतमूलंगगनगंगालिंगित-
शृंगंशृंगबेरपुरालंकारमिंगुदीपादपमुपागमत् ॥ तत्र ॥ प॰ ॥ दृष्ट्वा राममनने-
कजन्मरचितैर्दृश्यं शुभैः कर्मभिः श्रुत्वा मातृवरद्रुयादुपगतां वृत्तिं च वै-
खानसीं ॥ अत्युज्जृंभितहर्षशोकजनितैर्बाष्पैर्निषाधाधिपः शीताशीत-
गुणान्वितैरविरलैः संपृक्तवक्त्रोऽभवत् ॥ ४८ ॥ ग॰ ॥ सोयं स्कहृत्समासाद्य गु-
हः कृतांजलिरंजसा रघुनाथमनुनाथितवान् ॥ देवपितृनियोगप्रवणांतः-
करणमपि भवंतं विज्ञापितुमज्ञातजानपदरीतिर्भारती मां मुखरयति ॥-
अस्त्येतदनिवार्यवीर्योद्भटभटवर्गदुर्गयुक्तमनुषक्तभोज्यजातमंथरंमं-
थराहृदयतोदावहमस्मदीयं राज्यं ॥ तदिदमनिशं प्रथमप्रवृत्तं परिगृह्य
किंचिदनुगृह्य परिजनयोग्यभाजनमसुंजनमसुंचन्नेव तातादेशेन देशो-

टि॰ १ तामसीं॰ २ वृद्धिंगतः ३ सिक्तं. ४ वाणी. ५ अथाकर.

स्मिन्विस्मयनीयानुभावमुनिवृंदमंदाकिनीसंदर्शनेनमंदायमानजननी
जनदुर्दशश्चतुर्दशदशरथ्यकथिताःसमाःसमापयतुभवानिति॥प०॥त-
स्मिन्नित्थंप्रार्थनाभाजिसख्योप्रत्याचख्योरामभद्रःप्रियोक्त्या॥मातुर्वा
क्याद्रूल्कलेनावृतंमेगोत्रंक्षात्रप्रक्रियांनार्हतीति॥४९॥ग०॥ततस्तुत-
दनुरोधेनरोधस्तरोरधस्तात्कमंत्रनियंत्रितरथ्ययोर्दाशरथ्योरातिथ्यंस-
मधुपर्ककर्तुमिवमंदमंदमरविंदवृंदस्यंदमानमकरंदबिंदुसंदोहवाहि
निवाहिनीतरंगमरुतिवातिकाननगमनावस्थांकाकुत्स्थस्यप्रेक्षितुमन-
क्षमायामिवक्ष्मोभृतिचरमेतिरोहितायामन्हामधिदेवतायांसंध्यांचरमा
रामःसमाप्यतस्यांतरुमूलभुविलक्ष्मणकल्पितंपर्णतल्पमभजत॥प०॥
रामेविदेहसुतयातरुमूलसद्मंतःपुरंविशतिलक्ष्मणसौविदल्लम्॥नि-
टि०१संवत्सरान्.२वपुः३अस्ताचले.॥

ध्यायतं नियमितामितबाष्पवृष्टिर्निद्रां निरस्य निषसाद निषादनाथः ॥५०
॥ग०॥ व्यतीतायां विभावर्यामर्यममरीचिवीचिमालाहारिणि पूर्वोर्वीध-
रमूर्ध्नि विरचितजटाबंधो सह सीतया दाशरथी भागीरथीकच्छमागच्छ-
तां॥ तत्र रामः प्रहृष्टचेताः सीतामाचष्ट॥ प०॥ मेध्याश्वमार्गपरिमार्ग-
णदुर्नयस्य दिव्यौषधिं कपिलकोपमहाज्वरस्य॥ तातानुतर्पणपचेलिम
भागधेयां भागीरथीं भगवतीं शरणं भजामः॥५१॥ग०॥ तदनंतरं रामः-
सांत्ववचननिवारितसुमंत्रः ससौमित्रिर्मंगलानि प्रार्थयमानया तया मै-
थिल्या सह गुहेनानीतां नावमारुरोह॥ स एष निषिद्ध्य निषादाधिपतेरनुग-
मनमपि तूर्णमेवावतीर्णस्फुरसरित्पुरः संपूर्णसस्ये मत्स्याभिधाने जनप-
दे कृतपदश्चलल्लक्ष्यवेधनचतुरश्चतुरो मृगान्निहत्य कुत्रचिद्वनस्पतिमू-
टि०॥१ मनोहारिणि. २ उदयाचलमस्तके. ३ जलप्रायं. ४ चतुःसंख्याकान्.॥

न्निर्गत्यगत्यंतराभावात्तमेवरामंस्कन्चिरमवलोकयन्नालोकपथमतिक्रां
तेस्कमंत्राक्रांतस्यंदनेरघुनंदनेस्पंदमानबाष्पप्रवाहोमोहमुपगम्यभूम्यां
पपात ॥ ततः परिजनकृताश्वासाल्लब्धसंज्ञायराज्ञेकौसल्यासदनमरोच-
त ॥ दाशरथिरप्यहमहमिकयासंमूर्च्छन्महाजनौघदुरवगाहत्तयामंदाय-
मानस्यंदनवेगः सकलजनविवेककोकनदंमुकुलयन् मोहतमसातम-
सातटमुपागमत् ॥ चरमगिरिशिखरमपिसहस्रदीधितिः ॥ प० ॥ आविःप्र
लापमटवींभजतोजनस्यकाकुत्स्थपादविरहासहमानसस्य ॥ आस्तीर्ण
पर्णशयनान्यभवन्गृहाणिमूलस्थलानितमसातटभूरुहाणां ॥ ४७ ॥ ग० ॥
अथनिशीथेदाशरथिः स्कमंत्रेणसंमंत्र्यवंचितजनसंहतिरतिविनतानं
दनेनस्यंदनेनवेदश्रुतिगोमतिनिष्यंदिनीनामनदी त्रयपरिष्कृतामि
क्ष्वाकवेमनुनादत्तांवस्कमतीमतीत्यविविधवनगहनवीरुत्तृणपटल-

षादवरुह्यरथाद्दशरथंप्रयाणोन्मुखप्राणंप्राणंसीत्[1] ॥ एतद्दर्शनेनविसं-
ज्ञोदशरथः कौसल्यासुमित्राभ्यांसमाश्वासितः कथंप्रयातंरामेणकथं
कथितंमैथिल्याकिंवृत्तःसौमित्रिरितिमुहुर्मुहुरश्रुकुंठितकंठःसुमंत्रम
न्वयुंक्त ॥ सोपिराज्ञेव्यजिज्ञपत् ॥ देवकथंब्रवीमिकठिनहृदयोहं ॥ —
प॰ ॥ सेवारसानुगतपौरमनोरथस्यपारेरथस्यचस्फलौतववर्तमानौ ॥
भूत्वाविदेहदुहितुर्नवसौविदल्लौभागीरथीतटवनेपथिकावभूतां ॥ ५३
॥ किंतु ॥ देवत्वत्तनयस्यकुंतलभरंक्षीरैःस्वधेनूद्भवैःसेक्तुंनालमरुं-
धतीपतिरभूत्तस्याभिषेकोत्सवे ॥ सिक्तोहंतसएषमैथिलसुताबा-
ष्पोदकोत्सादकैर्न्यग्रोधक्षरितैर्जटांरचयितुंक्षीरैर्निषादाहृतैः ॥ ५४ ॥
तस्याविदेहदुहितुःपदयोर्नखेषुलाक्षांविनाप्यरुणिमासहसाबभूव ॥

टि॰ ॥ १ प्रणनाम॰ ॥

वन्येपथिप्रियतमेनसहव्रजंत्यावैवर्ण्यमाविरभवन्नकदापिवक्त्रे॥
५५॥सीतापतेःकिसलयैःपरिकल्प्यतल्पंसंचार्यसत्वदमनायनिशा-
रूदृष्टिं॥धन्वीतदंघ्रिभजनादिवपुण्यलभ्यादस्वप्नएववनवर्त्मनिल-
क्ष्मणोभूत्॥५६॥ग०॥एवंस्कमंत्रनिवेदितपुत्रचरित्रश्श्वरमगिरिशिख
रऊषिनिगमेवपुषिज्योतिषिहृदयलग्नशोकशल्यांकौसल्यामाश्वा-
स्यनरपतिरित्थमकथयत्॥पुराखलुसरयूरोधसिविविधतरुनिवह-
पिहितविवस्वतिवेतस्वति[1]मृगयास्पृहयाकमपिसमयमगमं॥तत्र॥
प०॥तोयादा[2]ननिदानपुष्करेगजभ्रांत्यातपस्वीमयाविद्धःकश्श्वनशब्द
वेधनविदापांथःसख्याहरन्॥तत्पित्रोजरदंधयोरनुमृतिंकर्त्तुंचितां-
चिन्वतोःशापोमय्यपतद्भवानपिस्कृतप्रेम्णाप्रणश्येदिति॥५७॥अहं
टि०॥१वेदः२करिशुंडाग्रं.३जलं.॥

चं॰रा॰ ३०

वैश्यस्यशूद्रायांजातस्तस्मान्नसंभवेत्‌ ॥ ब्रम्हहत्येतिमामुक्त्वास्वर्ग- अ॰कां॰
तोदुर्गतोमुनिः ॥५८॥ग॰॥ तदवश्यंवश्यएवास्मिमृत्योरितिनरपतिः- २
श्रुतिमार्गगतरामएवविरराम ॥प॰॥ मुनिशापच्छलोत्पत्तिर्विपत्तिर्निष्प्र
तिक्रिया ॥यतोदशरथायाशुददिदेशदशामीदृशा ॥५९॥ किंबहुना ॥ ना
क्रांतंत्रिदिवंपरैःस्मनसांकांतानबंदीकृतानाकीर्णंपुरुहूतशासन-
धरैःसाकेतबाह्यांगणं ॥ नादिष्टांसचिवाश्वभूतलपरित्राणायययद्यप्य
सौनाकंशोकवशादगाद्दशरथोनास्थांवहन्वाहने ॥६०॥ग॰॥ अथदशर
थप्रशंसामांसलैःकैकेयीनिंदाकंदलितैःरामगुणकीर्तनद्विगुणितैरव
रोधवधूजनपरिदेवनारवैर्मुखरितेषुदिङ्मुखेषु ॥प॰॥ अभूदराजक-
म्लानसद्गुणंगगनांगणं ॥आलोक्येवतथाशांतमशेषंचमहीतलं ॥६१॥ ३०
टि॰ ॥१ दरिद्रः २ कर्णमार्गः ३ अंत्यां. ४ अयोध्या. ॥

लेनिशामनैषीत् ॥अन्येद्युर्वन्येन पथाप्रयातास्ते प्रभाते प्रतीयमानहोम-
धूमप्राग्भारंभारद्वाजाश्रममाश्रयंतश्चाभिवंद्यतममंदहर्षमहर्षिजने-
नादिष्टवर्त्मनादैकतनीपूरोपप्लवंप्लवेनवेणवेननिस्तीर्यशोभेधनज-
नसंनिधानशमितशात्रवसत्वचारित्रंविचित्रंचित्रकूटमचलमभजंत-
॥प०॥अनुजरचितपर्णागारहृद्यास्कमाद्यत्परभृतकुलचंचत्संचमैर-
जितास्क॥जनकदुहितृयोगाज्जातसौकेतसौख्यश्चिरमरमतराम-
श्चित्रकूटस्थलीषु॥५२॥ग०॥अथमांवनवासवैरस्यादपिरामःसमा-
व्हयेदितिप्रत्याशयोपरलंत्रःस्कमंत्रःकानिचिदहानिगुहसकाशेनीत्वा
निराशस्ततःप्रतिनिवृत्तोनिवृत्तोत्सवामयोध्यामासाद्यनिर्दाशरथिः
सारथिरतिशोकातिरेकात्पौरजनजनितदीनाक्रंदमंदीभूतोनेमीघो
टि०॥१यमुना २मुनिः ३अयोध्या॥

तोरामभद्रः॥तदनुतवपिताभूत्कालधर्मो[1]नुकूलस्त्वमनुभवयथेच्छं
निःसपत्नांधरित्रीं॥ ६४॥मयूरीवमहानागंकेकयीकेकयात्मजा॥-
भारत्याभरतंचक्रेपरिस्फुरितमानसं॥ ६५॥ग०॥तदनुभरतश्चिर-
रतरंविलप्यविलुप्यमानविवेकःकैकेयीमकथयत्॥प०॥परिण-
तिपरुषाणांपाप्मनांसन्निपातान्नहिभवसिचतुर्णांसात्वमस्माकमं-
बा॥तदिहतनयवत्सःसंलपिष्यंतिकामंश्रुतिपुटरचितार्तेस्त्वांसवि-
त्रीमकीर्तेः॥ ६६॥ग०॥तदनुतन्मुखादाकृष्टदृष्टिरनुजमिदमवादीत्
॥प०॥अविकलमिनवंशंदग्धुमाश्रित्यतापंजनमनसिकिरंत्यांहंतस-
त्यांभवत्यां॥अनुसवमनपायैर्दैवतापूज्यमानावहतिकथमिदानीमा
श्रयाशाभिधानं॥ ६७॥अविरतत्तृषितार्तंवत्समालोक्यधेनोरपितनु

टि०॥ १पंचता.॥

जशतानांमातुरस्त्रंबभूव ॥तादेहतनयशोकंसंतरेदेकपुत्राकथमक
थमिदानींकोसलेंद्रस्यपुत्री ॥ ६८॥अपिबदियममंत्रेकालयोगान्नरें
द्रैवरयुगरसनाभ्यांप्राणवायुंतदीयं ॥अपनगरमनुष्यावर्तेनंसुक्त
रूपंपितृवनवसमत्स्यांक्कापिवल्मीकवत्यां ॥६९॥एषानिकृष्टमति
रात्मगुणोचितेषुवंशेषुसत्सुबहुधापिशिताशनानां ॥मौकंदशालि-
निवनेविषवल्लरीवहाहंतकेकयकुलेकथमाविरासीत् ॥७०॥जन-
नीतिविहीनामेजननीतिसधर्मवित् ॥ निरयान्निरयाद्बीरोनिरयादि
वसानुजः ॥७१॥ग०॥ततःसामात्यःपत्युश्चितारोहणमभिलषंतीं-
कौसल्यांभरतःशपथशतैर्निवार्यवसिष्ठाधिष्ठितेनपथादशरथाय-
र्यायजूकाभिप्रेतंप्रेतकृत्यमशेषमकरोत् ॥प०॥ तातेपितृवनंयाते

टि० ॥१ राज्ञिविषवैद्येच.२ राक्षसानां.३ आम्रः ४ इज्याशीलः ५ श्मशानं.॥

यातुंक्त्रातृवनंतथा ॥ भरतःप्रार्थयामासप्रांजलिःप्रकृतीःकृती ॥ ७२ ॥

ग॰ ॥ ताभ्यांसुमित्राकौसल्याभ्यामंतपुरजनेनचसहभरतोभवनमभज
त ॥ अथयथाविधिविहितोर्ध्वदेहिकंगमितचतुर्दशदिवसंदिवसकरकु
लहितकरैर्नगरवृन्दैःसार्धममात्याःसमुपेत्यमुकुटाभरणायभरतंप्रार्थ-
यामासुः ॥ ततस्तान्निर्बध्नतःसोयंप्रत्यवादीत् ॥ प॰ ॥ बहुभिरिहकिमुक्तै
स्त्यक्तसौमित्रिवृत्तिमुकुटमथवहेयंयुष्मदाज्ञाहिपूज्या ॥ ममपरमव-
काशःपर्णशालानुकूलःक्वचिदपिविपुलायांनास्तिचेद्दंडकायां ॥ ७३ ॥-

ग॰ ॥ इत्युक्त्वारामसेवोत्सुकमनानिश्चक्राम ॥ प॰ ॥ अनवधिरचयित्वा-
सत्पथेपांसुलत्वंभ्रमवननयनसौख्यप्रातिकूल्यंचकृत्वा ॥ नरपतिगृह-
मध्यात्तूर्णमुद्घूर्णमानाकुटिलगतिरुदस्थान्मंथरानामवात्या ॥ ७४ ॥

टि॰ ॥ १ सूर्यः ॥ २ अमर्यादं. ३ सदोषत्वंसरजस्कत्वंच. ॥ ४ वक्रगतिः ॥

ग०॥ ततः प्रभाते वसिष्ठवचसा तैलद्रोण्यां[1] नरपतिं निक्षिप्य क्षिप्रमेव
भरतमकथितदशरथकथमेव आनयतेति दूतान्केकयेषु प्रेषयामासुः
॥ तेपि जितपवनजवनयवनहयसंकोचितपथास्तुरगपतिपुरे दुःस्व
प्रदर्शनदूयमानमानसं भरतमभिवंद्य गुरुनिदेशं व्यजिज्ञपन् ॥ सोयं
मातामहेन युधाजिता चानुज्ञातः कतिपयैरेव दिनैररतिनिमित्तसंभूत
सातंकः साकेतमाससाद ॥ प० ॥ अतिचकितमतिः पुरैव पश्यन्पुरमय
थापुरचारपौरवर्गं ॥ न्यविशत भरतः परीतदूतः पितृभवने पितृकानन-
नादनूने ॥ ६२ ॥ स पितरमनवेक्ष्य तत्र मातुः सदनगतः प्रणिपत्य तामपृ
पृच्छत् ॥ क नु मम गतवान्पितेति सैषा परुषतरं भरताय वाचमूचे ॥
६३ ॥ वनचर इव साकं मैथिलीलक्ष्मणाभ्यां पितृविधिमभिरोद्धुं प्रस्थि
टि० ॥ १ कटाहे. २ श्मशानं. ॥

निर्देशेनसर्वेपिचित्रकूटवनोद्देशमविशन् ॥ तत्रसन्यस्तसैन्यस्ततइतोगु-
हेनसहराममन्विष्यन्हव्यगंधिनागंधवहेनहोमधूमेनचदूरादेवविभा
व्यमानमचपलमृगगणमदृश्यरूपाभिर्वनदेवताभिरवकीर्यमाणब-
लिकुसुममशोषितपिशिताशनपिशाचोच्चाटनमंत्रायमाणलक्ष्मणचा-
पघोषश्रवणसमुचितसामीप्यप्रदेशंनूतनपरिकल्पितपर्णशालावास्त-
व्यवैखानसकुटुंबिनीनिबिडितभूभागमनोकहशाखावलंबमानवल्क
लाजिनमसुतरुशाखारचितैरंबरचरपतिसेनागणकरकिसलयविसृ-
ष्टैरभिनवपल्लवभंगशबलैः कुसुमनिकरैरभ्यर्च्यमानजानकीनिवास-
तरुमूलवेदिकमालक्ष्यमाणखड्गकार्मुकनिषंगमतिथिजनसपर्यापर्यु-
त्सुकसौमित्रिसमाहृतकंदमूलफलकल्पितैकदेशमेविनाभूतजनक

टि॰॥ १ तापसः २ अविरहितः ॥

दुहितृचरणनलिनविन्यासमपहसितसाकेतंरामणीयकंरामाश्रमंभर-
तःससंभ्रममभजत ॥ प० ॥ अथावासंशांतेरकृतसकृतानामस्कलभं-
नवांभोदश्यामंनलिननयनंवल्कलधरं ॥ जटाजूटापीडंस्फजगपतिभोगो
पमस्फजंददर्शश्रीमंतंविपिनस्फविसीतासहचरं ॥ ७७ ॥ ततस्तस्योपांते
जनकयजनाधीनजननांववंदेवैदेहींरजनिकररेखामिवनवां ॥ अरण्या
नांपुण्यात्पदकमलमुद्रापरिचयादयोध्यासध्रीचीमविकलमवस्थांविद
धतीं ॥ ७८ ॥ स्वतःसिद्धंयस्मिन्नितरदुरवापंविजयतेस्फमित्रापुत्रत्वाद-
पिजगतिरामानुजपदं ॥ यदीयाक्षिद्वंद्वप्रतिनिधिभवेदंबुजयुगनिशी-
थेनिर्निद्रंयदितमपिसाक्षादकृतसः ॥ ७९ ॥ ग० ॥ तदनंतरंमरुपथेप्र-
थिततरग्रीष्मोष्मणिदैवात्कृतोपलंभमंभोरुहतटाकंस्फधाधारापूरितापं

टि० ॥ १ सदृशीं. २ विकसितं. ॥

भूरितापः सतृष्णाइवकृष्णसारः सरभससमुपेत्यनिपत्यपादयोश्चिर-
तररुदन्दशरथ कथामपिकथित्वामैथिलीसहितायसलक्ष्मणाय
रामायशोकमूर्च्छांप्रायच्छत् ॥ जननीजनोपितत्रनिपत्यसुचिरम-
रोदीत् ॥ प॰ ॥ विलोल्लंघनमेतेषांशोकोदन्वतितन्वति ॥ अगस्त्यायि-
तमेतस्मिन्वसिष्ठेनात्मवेदिना ॥ ८० ॥ ग॰ ॥ ततः प्रपद्यसंज्ञामनुज्ञ-
यागुरोरमरसरितिविरचितसमुचितनिवापकृत्यंप्रणिपत्यराममस-
कृत्प्रवर्तयितुंभरतः प्रार्थयत् ॥ वि कर्तनकुलस्ययदनुकूलंगुणगण
स्ययदनुगुणंयशोरूपस्ययदनुरूपंसमाचारस्ययत्सुमुचितंप्राची-
नभाग्यस्ययद्योग्यंलोकगर्हणीयायययदनर्हंश्रुतस्यवायत्सदृशं-
तादृशमाशयंप्रकाशयंतीभरतोपज्ञाविज्ञापना ॥ तत्क्षणंक्लैणप्र- ३४

टि॰ ॥ १ अगस्त्यवदाचरितं. २ शास्त्रश्रवणस्य. ३ विद्युल्लता. ॥

ततः केशहस्तंस्वहस्तेनगृहीत्वातद्वधोद्यतं ॥ कौसल्यावारयामासक्रुद्धंरा-
मानुजानुजं ॥ ७५ ॥ ग० ॥ ततः ॥ सांतःपुर एवपुरान्निर्गत्यशिशिरवर्गसमी-
कृतसरेणिर्भरतः पुरतः प्रसृतनरगजरथतुरगचरणक्षुण्णक्षोणीतल-
समुत्कीर्णेनरेणुनिकुरंबेनजंबालयन्नंबरगंगांगंगांचस्कमंत्रभणितगु-
णनिवहगुहानुमत्यानिस्तीर्यदूरादेवाश्रमद्वारिनिवेशितबलभारोभरद्वा-
जाभिवंदनमकरोत् ॥ सोयंप्रीतमनामुनिर्भरतंतज्जननीजनमपिप्रत्ये-
कमालोक्यसेनामप्याहूययथोचितमातिथ्यमकुरुत ॥ प० ॥ तथाति-
थ्यंचक्रेभरतबलभाजांतनुभृतांभरद्वाजः सोयंभ्रूकुटिभटकल्पारिविल-
स्करः ॥ तपस्तप्त्वाघोरंदिविस्कमनसस्तत्फलभ्रजोयथातेषांतोषंक्षण
मभिलषेयुर्मुनिकृतं ॥ ७६ ॥ ग० ॥ इतिदिनंदिनशातकल्पंतत्रनीत्वामुने

टि० ॥ १ केशकलापं. २ शत्रुघ्नं. ३ मार्गः ४ चूर्णितं. ॥

यतिसद्मएवाश्रयो[1]शमाश्रित्यप्राणानपिनिंदिष्यामीतिनंदिग्रामसंज्ञमा-
श्रममशिश्रयत् ॥ दाशरथिरपि[2]शमेधनजनकथितनिशिचरगणरचितक
दनपरिहरणायगहनजठरमवजगाहे ॥प०॥ विस्तीर्णाक्षैर्विपिनहरिणै-
र्वीतभीतिप्ररोहैर्दर्भग्रासेप्यकृतरुचिभिः सस्पृहंवीक्ष्यमाणः[3]॥ रामःप्रा[4]
प्य प्रकृतिमहितंस्थानमत्रेर्महर्षेर्जग्राहास्य प्रमुदितधियः प्रेमपेयांसप-
र्यां ॥८५॥ग०॥ सीतामप्यनसूयाभिधानास्यपत्नीस्वभूषणैरतोषयत् ॥
प०॥ खंडूनायवसुधावधूमनःपुंडरीकतुहिनत्विषांद्विषां ॥ दंडकावनमवा
पराघवश्चंडभानुरिवमेघमंडलं ॥८६॥ ॥इतिविदर्भराजविरचितेचंपूरा-
मायणेश्रीमदयोध्याकांडःसमाप्तः॥ ॥अथारण्यकांडः॥ ॥प०॥प्र
विश्यविपिनंमहत्तदनुमैथिलीवल्लभोमहाबलसमन्वितश्चलितनीलशैल

टि० १अग्निं. २मुनिजनः ३युक्तां. ४पूजितं.५सूर्यः ॥

च्छविः ॥निशाचरदवानलप्रशमनं विधातुं शरैश्चचारसशरासनः स्फुरपश्चे
तडित्वानिव ॥१॥ ग० ॥ ततः कंडूलापनयनपटुशंडालकपोलकषणविषमि
तानमितविकटविटपसालखंडनिर्यातनिर्यासगंधानप्यात्तगंधान् विदधानै
श्चाहुतिगंधैर्धूमस्तोमैरनुमीयमानाविनाभूतजलाशयानाश्रमभागानभि
तश्चरतोरातिथ्यश्रमितमार्गश्रमयोर्दाशरथ्योरध्वानंतरसारुरोधविराधाभि
धानोयातुधानः ॥सएषरोषभीषणस्त्रिशिखशिखरावतंसितविविधमृगशव
शतःशतहृदातनयःसीतामपजहारव्याजहारचदाशरथी ॥ कौयुवांयुवानो-
कुतस्त्योवामाचारवसातिभातिमेवामाचारः ॥चीरंवपुषिजटाशिरसिकरे
च चंडकोदंडः कायमाकल्पः क्वचनकल्पलताकल्पेयमनल्पाभरणात-
रुणीति ॥दाशरथिरपिकथितनिजान्वयोविराधांकेवेपमानांविदेहराज-

टि० ॥ १ बाणैः जलैश्च. ॥

दुहितरं विलोक्य सकोपः सौमित्रिणा साकं रक्षोवक्षसि शिलीमुखान्निजघा-
न ॥ ततः ॥ प॰ ॥ विशिखे विशिखे तत्र विधातृवरवर्मणि ॥ सीतां निक्षिप्य चिक्षेप शूलं रक्षो रघूद्वहे ॥ २ ॥ तदनु शूलमखंडयदंजसा शितशिखं रघुनायकसायकः ॥ नियतमेव निराधविरोधिनां हृदयशूलमपि त्रिदिवौकसां ॥ ३ ॥ ग॰
॥ विराधोपि क्रुधा सरभसमभिपत्य स्कंधे निधाय रामलक्ष्मणौ गतिनिरोधापराधपरिहरणायैवमिहिरहिमकरौ प्रस्थैवहन्विध्य इव प्रतस्थे ॥ रामस्तत्र-
विराधवधोद्युक्तं सौमित्रिमेवमभिदधे ॥ प॰ ॥ यातुनः पदवीसेयं यातुनश्वा-
स्य लक्ष्मण ॥ यातुकामं तथैवेदं यातुकामं न हन्यतां ॥ ४ ॥ अयि कवल-
य मामम् विमुंचेत्यतिकरुणं रुदतीमवेक्ष्य सीतां ॥ अरमरन्वयतामुभाव-
सिप्यां पिशितभक्षजंभकजभारहीनमेनं ॥ ५ ॥ ग॰ ॥ ततस्तीक्ष्णतरक्षुरप्र

टि॰ ॥ १ सूर्याचंद्रमसौ. २ सानौ. ॥

भाभंगुरलक्ष्मीसमावेशलक्ष्मणिक्षोणीपतिशतधृतोज्झितेमुकुटेविघटिता
शंराममप्रणिपत्यसादरंमांपादुकाभ्यांपरिष्कुरुतंयुवामितिरघुवरचरणद्वयं-
स्वयमेवप्रार्थ्यपरिरचयितुंस्थंडिलशायिचरितमिवबभारभरतस्योत्तमांगं
॥तथाहि॥प०॥ त्वयामयाचकर्तव्यंसत्यवाचःपितुर्वचः॥इतिप्रत्यादिशद्रा-
मोभारतीमपिभारतीं॥८१॥ग०॥जाबालिप्रार्थनायामपिव्यर्थायां॥प०॥
भरतस्तदनुप्रार्थ्यलेभेलाभविदांवरः॥काकुत्स्थपादुकाकारंमहार्घंमुकुट-
द्वयं॥८२॥सएषसानुजःप्रायादयोध्यांभ्रातृशासनात्॥अटवींपितृसं-
देशाद्धर्योरामःसलक्ष्मणः॥८३॥विलंघ्यविविधान्देशान्भरतोधृतवल्क-
लः॥विषयंसमुपाश्रित्यविषयेविमुखोभवत्॥८४॥ग०॥ततश्चायंयाव-
दार्यस्यप्रत्यागमनंतावदयोध्यांनाध्यास्ते॥तस्मिन्नवधिमतिक्रम्यचिरा-

टि०॥१मस्तकं.२महामूल्यं.३देशं.४इंद्रियार्थे.॥

भंगकारिवृत्तेर्मनसिमुनेःशरभंगनामभाजः ॥७॥ ग॰ ॥ समुनिराश्रमस्थं- 
काकुत्स्थमातिथ्येनसमाराध्यतत्सान्निध्याच्छुक्षांमंत्रपूतामाहूतिमिव-
आत्मनस्तनुंतेनूनपातिपातयित्वाशाश्वतपदंसमाश्रितवान् ॥ ततःसुती
क्ष्णतपसःसुतीक्ष्णस्यतस्यनिदेशाद्देशात्तस्मादुच्चलितःसलिलनिधिपा-
नसंभावितजीवनाभावशंकयाशरणाश्रयणायलंबमाननीलांबुदकुटुं-
बसंदेहावहेननानानोकहनिवहेनपिहिताभोगमगस्त्याश्रममाससाद ॥
अकथयच्चमैथिलीं ॥ प॰ ॥ तस्येदमाश्रमपदंसरसीरुहाक्षिसंख्याविही
नमहिमैकनिकेतनस्य ॥ भर्तासमस्तसरितांकुपितस्ययस्यहस्तारविंद
मकरंददशामवाप ॥८॥ इहसमदगजेंद्रन्यस्तहस्तातिभारात्पथिविनमि
तशाखःसल्लकीवृक्षएषः ॥ अभिनयतिनिकामंसंगतोच्छ्रायहानिर्मुनिव- 

टि॰ ॥ १ जातवेदसि. २ कृष्णामेघः ३ समूहेन. ॥

रकरपातान्द्भुग्नविंध्याद्रिमुद्रां ॥९॥ अस्मिन्महापथधियावदनंविगाह्यनि
र्गंतुमक्षमतयाजठरेलुठद्भिः॥ वन्यैर्गजैरजगराःपिशिताशनेभ्योवातापि
दानवदशामुपदेशयंति ॥१०॥ तत्र ॥ चुलुकगतसमुद्रास्वादनेकुंभयोनेरि
तरकरनिरस्ताभक्षिकोत्सारीत्या॥ गगनगतिविहीनायेघनाःपल्वलांते वि-
पिनमृहिषवेषैःकेवलंतेवलंते ॥११॥ ग०॥ एवंविपिनविलोकनविस्मितम
तिस्तदुटजनिकटमासाद्यरामःशिष्यैःप्रवेशितःसकललोकवंद्यमानच्चरणा
रविंदमरविंदभवमिववृंदारकवृंदैःपरिवृतंकोपहुंकारनिरहंकारायनहुषा-
यभुजंगभावदूषितायदत्तभुजंगभावंखगमतिनिरोधकपवैपुल्ययोर्दु
रवगाहमहावनयोर्विंध्यशैलसिंधुराजयोर्गाधतागाधतातस्करकरोदर-
मुदरजातजातवेदोजितवातापिदानवावेलेपंलोपामुद्रावल्लभंसकलसरि
टि०॥१ पर्णशाला. २ गर्वं.॥

चं·रा· दुर्लभनिःशेषीकरणचाडवं ब्राम्हणश्रेष्ठमपास्तसमस्ताशामप्युपगतदक्षिणा- अर·क
३८ शांवृषैकतानजन्मानमपिकुंभजन्मानंभगवंतमगस्त्यमपश्यत् ॥ प० ॥- २
प्रभामिवार्कीतमसांनिहंत्रीं ब्राम्हीं दधानंनियमेनलक्ष्मीं ॥ तपोनिधिंशौ-
र्यनिधिःप्रपन्नःस्वनामसंकीर्त्यननामरामः ॥१२॥ग०॥ततः परमहर्षे
णमहर्षिणा प्रणीताभिराशीर्भिःसहसुरशासनंशरासनंसरसिजासनास्त्रं
सौत्रामणंतूणीरयुग्मंरुक्ममयकोशंखड्गंच प्रगृह्यतदाज्ञयागोदावरी-
तटप्रकटितांपंचवटीमसेवत ॥ तत्रविस्तृतपक्षद्वंद्वमप्यप्रतिद्वंद्वशौर्यं-
शौर्यावस्थाप्रत्ययायकृतापरोक्षमिवतार्क्ष्यंमहामहीध्रकल्पंगृध्रराज-
मद्राक्षीत् ॥ प० ॥ पानेनहीनजलमब्धिमपास्यनूनंमैनाकएषमुनिमा-
श्रयतीतिजातां ॥ शंकामिमांरघुपतेः कथितात्मवंशस्त्वत्तातमित्रमह ३८
टि० ॥ १ वडवाग्निं ॥

प्रहरणगवाक्षितवक्षसा रक्षसा नपरित्यक्तेषु प्राणेषु ॥ पराक्रमाविषयपरा
क्रमोप्राक्रमेतामेतौतदंगगलितरुधिरधारासेकेनखननक्षमायांकान-
नक्ष्मायांराक्षसशवोचितंविकटमवटमुत्पादयितुं ॥ तत्क्षणमेवक्षणदा
चरोपिसंजातप्रत्यभिज्ञः सन् राममभ्यजिज्ञपत् आत्मनोगंधर्वकुलसंभ
वंरंभापरिरंभंतच्छ्रवणकुपितवैश्रवणदत्तरक्षोरूपिणींशापव्यापदंत-
स्यास्तथाविधमवसानंच ॥ प० ॥ रक्षोवधः प्रेकृत इत्ययमेवशंसैत्स्वर्गा
यगायकपदंगमितोविराधः ॥ नागालयायवपुरस्यवदेदितीवश्वभ्रेन्त
दक्षिपदिषुप्रहतंसरामः ॥ ६ ॥ ग० ॥ तदनुनाकलोकभजताय पुरुहूते-
नसमाहूतस्यभगवतः शरभंगस्याश्रमपदंरघुपतिरभजत ॥ तत्र ॥ प० ॥
दशशतनयनेपिवीक्ष्यमाणेदशरथपुत्रसिषेविषेवजाता ॥ मनसिजशर-
टि० ॥ १ आलिंगनं. २ आरब्धः ३ गर्ते. ॥

हसंतिकायंत्रस्यचस्कभगंकरः करेणुकरनिकरवर्त्मकणायमानतुषारधू-
लीधूसरवासरः सरसीरुहगहनदावपावकस्कहिनव्रणितलासिकाधरदू-
रीकृतवंशकृत्यः प्रक्षीणतारुण्यपण्ययांगनांगवस्रयातसौभाग्यप्रपास-
न्निवेशस्तालवृंतविश्रांतिकरः कामिनीस्तनभरगिरिदुर्गसीम्निनिर्भयनिली
ननिदाघभावोदिवाभीतव्रातस्याप्यनतिभयंकरदिवाकरश्चकोरनिकर-
स्याप्यनतिक्षेमंकरनिशाकरः कादंबकदंबस्याप्यनतिप्रीतिकरकमला-
करः करयुगकृतस्वस्तिकाबंधनतयानीहारांतकशंकयाहृदयकलमि
वगोपायंतमश्रांतदंतवीणाव्यापारवेपमानाधरपुटतयाशीतिकापिशा-
चिकानिर्हरणायनिपुणंमंत्रजपमिवकुर्वंतमविरलपुलकपालीककंबलित
कलेवरतयासकरुणविधिवितीर्णरोमकंबलकृतांगरक्षमिवभिक्षाम-
टंतंदुर्गतेवर्गंनिर्घृणाकदाचिदपिकमलानालोकयतीतितस्यैसासूयइव
रि॰ ॥१दरिद्रसमूहं॥

तदीयावासतामरसकोशं नाशयन्नंगजमतंगजकरपुष्करोत्थितशीकरनि-
कराकारैरतिपरुषस्मरशरजाततापप्रतप्तगगनांगनांगस्रवत्स्वेदबिंदुस-
दृक्षैरक्षीणमहिमहिमप्रसारैरध्वगांतःकरणानि सीमंतयन्नू हेमंतसमयः
समुदजृंभत ॥ प० ॥ यत्र कांता न पश्यंति क्लांता विरहवह्निना ॥ निशावसा
नवेलां च वेलां च व्यसनांबुधेः ॥ १४ ॥ ग० ॥ तत्र पर्णशालामध्यमध्यासी-
नं लक्ष्मणाग्रजमुपससर्प शूर्पणखा ॥ प० ॥ तस्मिन्नुज्जृंभितोष्णास्तनतट
दयिताहीनसंहारकाले काले प्रालेयधाराकवचितगगनाभोगदिक्चक्र-
वाले ॥ कामांधा राक्षसी सा पतिमतिमतनोन्मैथिली प्राणनाथे लक्ष्मीली-
लारविंदे नवपिशितधियं तन्वती श्येनिकेव ॥ १५ ॥ ग० ॥ ततस्तेन जानकी
जानिरिति जानीहि जनममुं ममानुजमतिमनुजबलमबलाविद्युक्तं युक्त-
माश्रयितुं तवेति रामेण प्रत्याख्याता सौमित्रिमुपेत्य यथाममनीषितमभाष

त ॥ तेनापिभद्रेतस्यार्येस्यदासोहंदासभार्योपदमनार्येमार्योयाः कुलसं-
भूतायास्तस्मात्तमेवभजेथाः ॥ किंच ॥ क्रूरसत्वभयानककाननसंचा-
राचतुरांविहायवैदेहींतत्रभवतीमेवासोपरिग्रहीष्यतीतिलक्ष्मणेनाभि
हितांविहितंहितमितितदीयंवचनममनुत ॥ प० ॥ दशरथात्मजयुग्मनि-
रीक्षणक्षणसमाकुलबुद्धिरियंदधौ ॥ उभयकूलसमुत्थितशार्दूलफत्रमग-
तागतखिन्नगवीदशां ॥ १६ ॥ वृषस्यंतीवृषस्कंधंराघवंरावणानुजा ॥ भू-
यःशूर्पणखाभेजेशूर्पकारातिबाधिता ॥ १७ ॥ ग० ॥ तदनुजनकदुहितुरनि
तरयुवतीयोग्यंभाग्यंरामस्यरामणीयकंनिरूप्यपुनरेवमचिंतयत् ॥ प०
॥ लावण्यांबुनिधेरमुष्यदयितामेनामिवैनंजनंकस्मान्नास्रृजदस्मदन्व
यगुरोरुत्पत्तिभूःपद्मभूः ॥ आस्तामेतदरण्यवासरसिकेहाकष्टमास्मि- ५०
टि० ॥ १ कामपीडिता. ॥

मित्यहरज्जटायुः ॥१३॥ग०॥रामस्तंदशरथमिवतंपश्यन्नू काश्यपकु-
लसंभूतंसंपातेरनुजमनुजरचितपर्णशालः पंचवट्यांकंचित्कालंगम-
यामास॥अथकदाचिदुपचीयमानमनोभववैभवः पाककपिशकलम
मंजुमंजरीपुंजपिंजरीभूतकेदारप्रपंचः पंचबाणप्रयाणोचितवीरपा-
णवत्सत्रपुटपात्रदृश्यावश्यायबिंदुसंदोहश्चंद्रातपेनिरानंदतांचंदना-
नुलेपनेनिर्लोलुपतांचंद्रशालायांनिराशतांचंद्रकांतस्थलेनिरास्थतां
वातायनसेवनेनिरुत्सुकतांवापीकूपोपकंठेनिरुत्कंठतांवासराव-
सानेनिरादरतांवारिविहारेनिराकांक्षतामुत्पलमालायामुपेक्षतामुपव
नभजनेप्युद्विग्नतांजनानांजनयन् गंभीराभोगगर्भगृहस्यचघनेष्टि
कारचितभित्तिश्लक्ष्णातिरस्करिणीपटलस्यचशशोदररोममृदुकंब
लस्यचकालागुरुधूमस्यचकाश्मीरांगरागस्यचनिर्धूमांगारभरित-

चं॰रा॰ ॥ तपोधननिधनकरकरनिकुरंबमिदं परुषभाषणस्पृहयालुतालुजां- अर॰कां
४१ लमिदं परदारनिरीक्षणनिरपत्रपनेत्रवृंदमिदमितिनिशिततरशरशात २
शकलितनिशिचरावयवानाहृत्याहृत्यप्रस्कंदजं दर्शयद्भिस्तपोधना-
ध्वशकृद्भिं विदध्वमितिगृध्रराजनिदेशादिवदेशांतरादापतद्भिः पत-
द्भिः कंकप्राचीकप्रायैरनवकाशमभूदाकाशं ॥ तत्रनिकृत्तशिरसि-
त्रिशिरसिविस्रगंधिनाशरीरस्तुतवसास्रोतसाप्रेत्यापिक्रियमाणा-
श्रमदूषणोदूषणेरोषभीषणवीक्षणःखरैःखरः राघवमाह्वायाक्रयत
॥ तत्रविपश्चिद्भिरप्यनिश्चीयमानजयापजयमनिमिषैरप्यननुसं-
धीयमानशरसंधानमोक्षमभूदभूतपूर्वं द्वंद्वयुद्धं ॥ तत्रखरोगृहीत
कोदंडस्त्वसकृदनुभूयमाननमनोन्नमनायासः समरसमापनच्चतु ४१

टि॰ ॥ १ दुर्गंधिना. २ भयंकरः ॥

रश्चतुराननास्त्रसंधानार्हंदाशार्हशरासनंग्राहयितुकामइवरामहस्ता-
त्प्राक्तनंचापंशरैरपजहार॥ सोपिकोपपावकपावकिताननःकुंभसंभव
दत्तंधनुराधत्त ॥प० ॥खरपरुषिशरासनेगृहीतेखरकिरणान्वयशेखर-
रेणतेन ॥खररघुवरयोर्रणंसमाप्तंखरनखराय्युधयोरिवक्षणेन ॥२०॥-
खर वधपरिशश्छदंडकारण्यभागेमुनिभिरभिहितानामाशिषांतादृशी
नां॥ स्वयमेन्वरमपात्रंस्वैर्गुणैर्मंथराभूत्तदनुमनुकुलेंदुःसानुजःशौ
र्यराशिः ॥२१॥तथाहि॥ प्राङ्मंथरेतिमहिषीतिवरद्वयीतिधर्मव्ययव्य
थितभूपतिभारतीति॥ काकुत्स्थकाननकथेतिचसंतिसंज्ञाःपौल-
स्त्यभीतभकवनत्रयभाग्यपंक्तेः॥२२॥ग०॥ अथशूर्पणखालंकाम-
पिजनस्थानमिवविजनस्थानंकाकुत्स्थेनकारयितुंदशकंठोपकंठेक्र
टि०॥१ व्याघ्रः २ प्रथमभाजनं.॥

स्येवनिपत्यरामलक्ष्मणयोर्याथातथ्यंवैदग्ध्यादेहसौंदर्यंखरप्रमुखैःसा-
कमनीकस्यचतुर्दशसहस्रसंख्यस्यपंचताकरणकारणभूतामात्मा-
वज्ञांचविज्ञापयामास॥प॰॥सदंडकायांकृतदंडकायांस्वसारमेनां
प्रथितस्वसारः॥निशाम्यरामस्यनिशाम्यवृत्तंचक्रेरुषंराक्षसचक्रव-
र्ती॥२३॥ग॰॥ततःप्रस्थाप्यजनस्थानेराक्षसानष्टौनष्टमतिरयंता
टकेयंहाटकमृगंपुरस्कृत्यसीताक्ष्यांहरिणींगृहीतुंतस्यावसथमास-
साद॥मारीचोप्याकर्णितरावणमतिःप्रयत्नशतेरप्यनिवार्यमाणेत
स्मिन्रावणेस्कबाहुमेवबहुमन्यमानोगत्यंतराभावात्तदभ्यर्थनाम-
भ्युपेत्यजातरूपमयमृगरूपंगृहीत्वासीतांवंचयितुंपंचवटीमगाहत
तदशमुखोपिजलधरपथस्थापितरथोदाशरथिविघट्टनेकृतास्थस्त
टि॰॥१ हृत्वा. २ स्कवर्णमयं.॥

नूजनेकांतिंकाननचंद्रिकासमदशांकिंनिर्ममे निर्ममे ॥१८॥ सीतामाह-
र्तुकामामसकलभविषयप्रार्थनोद्दामकामांसौमित्रिःशस्त्रपाणिर्दशमुख
भगिनींतामनार्योनिवार्य ॥ कामक्रोधाधिकानामहमहमिकयाप्रेरवता
मायतानांतस्याःश्वासानिलानामकुरुततरसामार्गविस्तारकृत्यं॥१९
॥ग०॥ततस्तस्यानिकृत्तकर्णनासिकायाः कनीयस्याःपरिभवंवदने-
वचनेचदृष्ट्वाश्रुत्वाचजनस्थानवर्तीसमरमुखमुखरःखरश्चतुर्दशस
हस्रसंख्यंश्चतुर्दशाध्यक्षरक्षितंरक्षोबलंरामलक्ष्मणौजिघृक्षुःप्रेषया-
मास ॥अथदाशरथिर्निरीक्ष्यदिक्षुरक्षोगणमुपसर्पंतमपसर्पभूतया-
तयाशूर्पणखयानिदर्शितसरणिमरणिमिवमंथनात्प्रागनाविष्कृतते-
जःप्रसरंसीतारक्षणेलक्ष्मणमादिश्ययातुधानवधंतथाविधमतनुत
टि० ॥१ ममताशून्ये.॥

कौणपघुणनिमित्तांविपत्तिमितिप्रणिपत्यप्रत्याचक्षाणंहृदयतोदकारिण्या
वाण्यामोहविक्लवासाबव्हतर्जयत् ॥ भूयोपिलक्ष्मणःपरुषभाषणभाषि
णींप्रजावतीमेवमभाषत ॥ प॰ ॥ स्कमुखिममस्कमित्रासत्यमंबायदासी
त्तदभजमवितर्कमातृसंपर्कसौख्यं ॥ अहहविधिविपाकाद्व्याहरंतीदुरु-
क्तिंत्वमसिविपिनमध्येमध्यमांबाहिजाला ॥ २७ ॥ ग॰ ॥ इत्युक्त्वाभ्रातृ-
जायांभ्रातृसमीपगामिनिलक्ष्मणेतत्क्षणमेवरंध्रान्वेषीदशकंधरःस्यंद-
नंविहायविहायस्स्थलादवतीर्यनिजांतःकरणेष्वमांतरागंबहिःप्रकटय-
न्निवधृतकाषायपटसंन्यासवेषःपर्णशालामाससाद ॥ प॰ ॥ रामाश्रमाद्वि-
गतलक्ष्मणसन्निधानात्सीतांजहारचपलःपिशिताशनेंद्रः ॥ मालांमहोत्पल
मयींपललप्रक्रमेणदेवालयादिवनिरस्तजनार्दलर्कः ॥ २८ ॥ हानाथक्वचि ४३
टि॰ १ सारमेयः ॥

रामसीतिबहुशोव्याक्रुश्य बाष्पाविलंचक्षुर्दिक्षु विमुंचतींदशरथस्याद्यामवेक्ष्यस्नुषां ॥ रेरे रावणमावधूप्रतिरुधामुंचेतिगृध्राधिपोरुध्वाध्वानमनल्पकोपमकरोदग्रेवणंरावणं ॥२९॥ समभूत्समयेतस्मिन्समरंसमरंहसो ॥ मिथोमथनसंक्रुद्धगृध्रराक्षसराजयोः ॥३०॥ दशमुखरथमाशुध्वस्तरथ्यंविसूतंशिथिलतरवरूथंशीर्णचक्रंसचक्रे ॥ गरुदभिहतशक्तिप्रासबाणासिखड्गत्रिशिखविशिखतूणीपाशकुंतःशकुंतः ॥३१॥ राक्षसासिक्षतःक्षिप्रंपपातपततांवरः ॥ मैथिलीपक्षपातेनपक्षपातमवापसः ॥३२॥ग०॥ तत्क्षणमन्यरथाधिरूढेनरावणेनभूयोपिनीयमानाजानकीऋष्यमूकशृंगसंगतप्लवंगपंचकेपंचचूडाशरइवक्ष्माधरकुमारेकस्मिंश्चित्सुग्रीवसात्कृतदशग्रीवप्रतापानलसदृशंवालिविनाशापिशुनंमहोल्का

टि० ॥१पराक्रमः २विच्छिन्न ३पक्षिणां.॥

चं॰रा॰ ४४

पातप्रतिमंरामसाहाय्यप्रोत्साहनायपुत्रमभिषतसंतंगबिंबशंकावहंक-
नककपिशकौशेयमयोत्तरीयांतरितमाभरणभारमपातयत् ॥ तत्सतन
मपिस्वतेजः पतनमिवनपश्यन् लंकालंकारभूतामशोकवनिकांमैथि-
लीमनयदनयज्ञोदशग्रीवः ॥ प॰ ॥ अशोकवनिकालेभेराक्षसीपरिवे-
ष्टितां ॥ सीतांमारुतिवालाग्निस्तंभनाहोमिवौषधिं ॥ ३३ ॥ काकुत्स्थोप्य-
थरक्षसामधिपतेर्वाग्वागुरावेष्टितेकृत्वाहाटकताटकेयहरिणेशार्दूलवि
क्रीडितं ॥ आगच्छन्ननुजेनतत्रगदितामाकर्ण्यवार्तांततः सीतासंगम-
लालसस्तदुटजंरामः प्रतस्थेद्रुतं ॥ ३४ ॥ अयंकथंस्यादितिबाष्पगर्भ-
मालोक्यमानोवनदेवताभिः ॥ विलोकयन् केवलपर्णशालांविलीनचे-
ताविललापरामः ॥ ३५ ॥ हाकष्टमंबनहिसाकिमिदंप्रवृत्तमालोकयामि
टि॰ ॥ सूर्ये:१ ॥

अ॰ क॰ ३

४४

स्थौ ॥प०॥ विपिनमवजगाहे राक्षसानां करोटीरसकृदसकृदाविर्बाष्पमालोक्यशोचन् ॥ कृतरुचिरिव वर्त्मन्यंकुशानां कुशानां पथिकचरणलाविन्यंकुरेन्यंकुरेषः ॥ २४ ॥ तदनुजनकपुत्रीयाञ्चयातञ्जिघृक्षुर्हरिणमनुजगाहेचापमादायरामः ॥ समयइतिन्वभेजे पाशमातत्यमृत्युः कुशिकसुतमखाजोप्त्रष्टमेनंजिघांसुः ॥ २५ ॥ आकृष्यदूरमुदजादथदर्शितांगःक्रव्याद एषरघुनाथशरेणविद्धः ॥ कोर्तस्वरेणतनुतांविजहौहतोस्मीत्यार्तस्वरेण सहरामवचोनिभेन ॥ २६ ॥ ग० ॥ एतदाकर्ण्यविदीर्णहृदयाहृदयदयितप्रेम्णाकर्तव्याकर्तव्यमजानानाजानकीजानीहि भ्रातरमितिसौमित्रिमादिदेश ॥ ततश्चार्येण कार्यमिदमादिष्टं दिष्टदोषान्मिथ्याप्रतीतिः पराभवतिभवतीं परं त्रिभुवनैकधनुर्धरस्यशौर्यराशेः रामार्यस्यकःश्रद्दधीत।

टि० ॥ १ सुवर्ण. २ मृगः ॥

भरतेनिदधातुराज्यं ॥४०॥ इत्थंविलप्यदयितांविपिनेविचिन्वन्रामोनत
न्नधृतिमान्नचलक्ष्मणोपि ॥ तादृग्विधामपिदशांकथयन्स्ववाचावं-
ल्मीकजन्ममुनिरेवकठोरचेताः ॥४१॥ ग॰॥ तत्रप्रारभमाणप्रयाणा
न्प्राणानवष्टभ्यजटायुःक्रियमाणसीतान्वेषणंसलक्ष्मणंराममाल-
क्षयन्नवोचत् ॥ आयुष्मन्मांखड्गविक्षतपक्षातिंक्षितितलेनिक्षिप्य-
क्षिप्रतरंजहारमैथिलींरावणइति ॥ प॰॥ स्वयमपिशरभंगस्वीकृतां·
भंगहीनांसपदिगतिमवाप्तःसंहृतायुर्जटायुः॥ नयनसलिलमिश्रंराम-
हस्तेनदत्तंदशरथदुरवापंप्रापनेवापमंभः ॥४२॥ ग॰॥ अथदक्षिणा-
रण्यानींप्रस्थितेकाकुत्स्थेराक्षसीकाचिदयोमुखीनामसौमित्रिमभि-
भूयतदीयेनशस्त्रेणशूर्पणखासिद्धिमभजत ॥ तदनुक्रौंचारण्यसर ४५
ण्याप्रयातावेतौमहर्षेःस्थूलशिरसःशापात्कौणपतांप्रपन्नःपन्नगप

तिभो[1]गभीषणाभ्यांभुजाभ्यांबबंधयथार्थनामाकबंधः ॥ तदनंतरमन-
श्रुपात्रेषुराक्षसीनेत्रेषुसदोत्पादितवारिभ्यांतरवारिभ्यांरामलक्ष्मण-
योःकबंधबाहुयुगलंकदलीलावमिवालूयत ॥ प० ॥ तदनुदनुकबंधे-
नादरादर्थितौतौगिरितटभुविदेहंदहतुस्तस्यभीमं ॥ अकथयदथशा-
पापायतुष्टःसरामंतपनतनयमैत्र्यामैथिलींप्राप्नुहीति ॥ ४३ ॥ ग० ॥ त-
स्मिन्नृष्यमूकमार्गमुपदिश्यस्वर्गंगतेमतंगाश्रमवासिन्याशबर्याकृतां-
सपर्यांरामःपरिगृह्यतदनुज्ञयामनोज्ञकूजितविहंगमृगगणविहारम
नोहरंगहनपदमवगाह्यव्याकोशकुशेशयपरिचयकषायैर्वनदेवताल
तांदोलानुकूलैःकूलायतलीलापरवशावशावल्लभमदांबुचुंबिभिःशंब
रारातिशरधिसदृशतटसहकारशिखरविसरदासवासारसीकरशेखरै

टि० ॥ १ शरीरं . २ छेदनं . ॥

र्विविधलतालासिकालास्योपदेशदेशिकायमानैः कायमानसमानाभो
गलतागृहकेलिलुब्धलुब्धकपुरंध्रीशिथिलधम्मिल्लमल्लिकागंधमांस-
लैर्मल्लिकाक्षपक्षविक्षोभक्षोदीभूतपाथः पाथेयैस्तत्तटवनपवनैरनुकं
प्यमानः पंपामभजत्॥ ॥इतिश्रीमद्भूदर्भराजविरचिते चंपूरामा-
यणेश्रीमदरण्यकांडःसमाप्तः॥ ॥अथकिष्किंधाकांडः॥ प०॥ ॥
सतांसैतांबुद्धिमिवप्रसन्नांपंपांवियोगज्वरजातकंपः॥ विलोकय-
न्लोकनिविष्टकीर्तिरार्तिरघूणांप्रवरःप्रपेदे॥१॥ ग०॥ ततस्तस्यास्त-
टवनेनानानोकहनिवहपरिष्कृतेनिभृततरपरिभ्रमणपरभृतव्रात
चंचूमयविपंचीसमुदंचितपंचमांचितासंततताकुंचितपंचशरशरा-
सनशरासारवंचितसंचारपथिकप्रपंचाप्रमदच्चंचलच्चंचरीककुल- ४६

टि०॥ १उदकं· २शंबलैः ३साधूनां.॥

[1]चेदुलामिहपादमुद्रां ॥ मांवीक्ष्यनूनमगृहीतमृगंमुहूर्तमंतर्हितातरु-
षुरोषवतीवसीता ॥३६॥ त्वदभिलषितपूर्त्यैवंचितःपञ्चवट्यामचरम-
चरेमोहंमोहभाजांप्रजानां ॥ तदिहसरलबुद्धेनैषरोषस्यकालःक्कमुखि
ममसुखंकिंसोढसीतावियोगं ॥३७॥ यद्यस्तिकौतुकमपूर्वमृगेमृगा-
क्षिचाद्रंहरामिहरिणंममसन्निधेहि ॥ यावन्नमुंचसिमयाहृतमेणमेनं-
तावद्दधातुतववक्त्रतुलांमृगांकः ॥३८॥ सप्राणान्वेज्जनकतनयाकि
न्नतिष्ठेतमह्यंहिंस्त्रैःसत्वैर्नकिलविहृतारक्तसिक्तानभूमिः ॥ गोदाव-
र्याःपुलिनविहृतिंरामशून्यानकुर्याद्युक्तंनक्तंचरकवलनात्सांस्थिता-
सर्वथासा ॥३९॥ लोकांतरप्रणयिनंश्वशुरंप्रणंतुमाङ्घ्रासकालमतिलं
घ्ययदिप्रयासि ॥ विज्ञाप्यमामपिसमाव्हयसाध्वितस्मैसौमित्रिरेव-
टि॰ १ सुंदरां. २ प्रथमः ॥

चक्षण लक्ष्मणवचनधार्यमाणधैर्यंराघवमग्रतः सुग्रीवो विलोक्य वालिप्रणिहितापसर्पधियासुदूरमपससर्प ॥ सतु संमंत्र्य मंत्रिभिस्त योराशयमवजिगमिषुरांजनेयंप्रभंजनसंजातंप्राहिणोत् ॥ प॰ ॥ तपनपवनयोर्यःप्राप्तवान्पुत्रभावंशतमखकृतवाणीविद्ययाजन्मनाच ॥ सतुदशमुखकीर्तिस्तोमसोमस्यपक्षश्चरमइवतनूमान्प्रापरामंहनूमान् ॥ ६ ॥ ग॰ ॥ सएवस्वीकृतभिक्षुकवेषःसविनयमेतावाबभाषे ॥ भवंतौकतरौकांताकारौकांतारंकथमिदमवातरतांविचित्रतरजिष्णुकोदंडमंडितावपिदिनस्यास्यसुदिनत्वाद्भवंतौनजीमूतौजटावल्कलयुतावपिजंगमत्वाद्भवंतौनकल्पवृक्षौतमोपहालोकललितावपियोगपद्यभास्करसान्निध्याद्भवंतौनपुष्पवंतौ ॥ प॰

टि॰ ॥ १ शिष्यत्वंपुत्रत्वंच ॥ २ दिवाकरनिशाकरौ ॥

॥ कुशास्तंभेपिसंभूतंसौरभ्यमिवभासते ॥ तपोवेषेपिसौंदर्यंयुवयोर्युवयो
गिनोः ॥ ७ ॥ युष्मद्वार्तासुधास्वादलुब्धयोः श्रोत्रयोः सुखं ॥ स्वयमेवगृही
तुंमेजिह्वाश्रद्धाप्रवर्तते ॥ ८ ॥ ग० ॥ कश्चिदस्तिसमस्तवानरपतिः सुग्रीव
इतितेनभ्रातृभयादृष्यमूकमुपाश्रितेनयुवाभ्यांसहसख्यमिच्छताप्रेषि
तंहनुमदभिधानंदधानंभिक्षुरूपप्रतिच्छन्नंवानरमिममांजनेयंप्रभंज
नसंजातंजानीतमिति ॥ ततस्तदीयंवचनमाकर्ण्यकर्णयुगलसुधाव-
र्षिदेवर्षिप्रतिमोदाशरथिस्तद्दर्शितेनपथातमुपाश्रित्यविरचितभुवन
सौख्यंसख्यंतपनतनयेनसाकमग्निसाक्षिकमकरोत् ॥ प० ॥ योगंवि
तन्वतिहनूमतिराघवस्यवैवस्वतेनहरिणासमवर्तिनाच ॥ मेनेविधिः
र्घटयितुंहरिमिंद्रपुत्रंवैवस्वतेनहरिणासमवर्तिनाच ॥ ९ ॥ ग० ॥ तत

टि० ॥ १ वानरेण. २ यमेन. ॥

स्तत्क्षणं संभूतविस्रंभाय प्रतिश्रुतवालिवधाय कथितनिजदशाय दा
शरथये सुग्रीवो दशग्रीवनीयमानसीतापातितानि कानिचिदाभरणा-
न्यदर्शयत् ॥प॰॥ प्रत्यर्पितानां कपिपुंगवेन रामः स्वकांताधृतभूषणा
नां ॥ संस्कारहान्यापरिधूसराणां प्रक्षालनं बाष्पजलैश्चकार ॥१०॥ग॰
॥ ततः सौमित्रिभाणितनिर्बंधसंधुक्षितधैर्येण रामेणानुयुक्तो वालिवै
र कारणं भानुसूनुरित्थमकथयत् ॥ पुरा खलु निखिलरिपुकुलतिमिर
निचयमरीचिमालिनं वालिनं मायावी नाम दानवः ॥ कश्चन दुंदुभेर्भ्रा-
ता युद्धाय रुद्ध्वा तद्भुजचकितधृतिरुरगनगरकुहरमवागाहत ॥ तदनु
गाहमानेन मानशालिना वालिना बिलमुखपालनाय निहितस्तस्योत्था
नवेलां प्रतिपालयन्नहं चिरकालेऽप्यतीते फेनरस्त्यानं मांसनिसृतमसृक्पू
रमवेक्ष्य भ्राता मे निहत इति निरचिनवं ॥ तदनु विपुलोपलपटलपिहित- ४८

कंचुकितमाधवीमाधवीभूतिरुदजृंभत ॥ प० ॥ यत्र कांतैर्वियुक्तानांयुक्तानामपिसुभ्रुवां ॥ दोलाकर्मवितन्वंतिमनांसिचवपूंषिच ॥ २ ॥ करतलेरुपचायमथेक्षणैरपचयंचवनेषुजनेषुच ॥ सुमनसांमनसामपियद्दिनेविरचयंतिविलोलविलोचनाः ॥ ३ ॥ ग० ॥ तस्मिन्नसमशरसमरसमयेपंपांसमंतात्पर्यटन्पर्याकुलहृदयोहृदयदयितांहृदिलक्षयन्लक्ष्मणमिदमभाषत ॥ प० ॥ आधोसिद्धौषधिरिवहिताकेलिकालेवयस्यापत्नीत्रेतायजनसमयेक्षात्रियाण्येवयुद्धे ॥ शिष्यादेवद्विजपितृसमाराधनेबंधुरातौसीतासामेशिशिरितमहाकाननेकानजाता ॥ ४ ॥ मलयगिरिचरोयंमन्मथाधोरणाज्ञामथितपथिकवर्गोमारुतव्याजहस्ती ॥ विरचयतिमदीयेशैत्यसौरभ्यमांद्यत्रिविधमदसमृद्धोमानसेवप्रलीलां ॥ ५ ॥ ग० ॥ एवंदुःसहविरहकृशानुकृशानुभावंभावसंधुक्षणावि

 

भवन्मुनेर्वनं तस्य वल्कमपि रोषपाटलं ॥११॥ ग॰ ॥ ततो मतंगशापब-
लाद्वालिवश्यमृष्यमूकं विमृश्यास्मिन्विस्मृतपुरनिवाससुखो ऽस्मि-
चिरं निवसति सति मयि ॥ प॰ ॥ अयमसुखवयदेवं देवधीमान्हनूमान्त्रि-
पुरितिभवतोपित्रस्तमस्तोजसंमां ॥ दवहुतवहधूमस्तोमइत्यंबुवाहा-
च्चकितमिवमयूरं मारुतो वारिशीतः ॥१२॥ ग॰ ॥ श्रुत्वाथ रामः शोकोद-
ग्रां सुग्रीवगिरं ॥ यद्येवं महाभाग माभैषीर्मम शिलीमुख एव बलीमुख-
स्य तस्यासून्कालक्षेपमपास्य पास्यतीत्युक्त्वा तस्य प्रत्ययार्थं पादांगुष्ठे-
न प्रेरितदुंदुभिकलेवरस्तत्कर्मणाप्यतृप्तस्य सुग्रीवस्य प्रार्थनया स-
प्तभुवनभवनस्तंभसंभावनया किल सप्तधा धात्रा वर्धमानपरिणाह-
रोहान्सप्तसालानप्यविधेययातुधानकुलविविधवधविधायकेन साय- 

टि॰ ॥ वालिनः १ ॥

केनविव्याध ॥ सोयंसायकोनिकटगिरिकटकमपिपाटयामास ॥प० ॥
निर्भिन्नसालकटकोस्मियथातथात्वंपौलस्त्यसालकटकंयुधिपाटयेः
ति ॥ ऊचेशिलादलनजातरवेणनूनंतस्मैबलीमुखवरायशिलीमुखः
सः ॥ १३ ॥ ग० ॥ ततस्तत्सत्याहूतेनपुरुहूततनुजेनसार्धंतस्यतलातल
युद्धेप्रवृत्तेसतिसज्जनदुर्जनयोर्भेदंरूपतोपिविवेक्तुमक्षमतयामन
सिविचारयन्सदसिवाचंयमतामुपेतइववाग्मीतयोरप्येकवेषकर्मणो
र्भेदमनवगच्छन्नमुक्तशरोभूद्दाशरथिः ॥ सुग्रीवस्तुवालीबलासहः
नतयालब्धदैन्योवदान्यइवमोर्गणापातमार्गेसदाचक्षुर्विक्षिपन्नपग
तधृतिररतिदूरमपासरत् ॥ तमेनमृष्यमूकेमूकवत्त्रपयानिषण्णंविः
षण्णहृदयंदयालुरालोक्यत्रैलोक्यैकधन्वीरामस्तद्भेदमवगंतुकामः
टि० ॥ १ दानशौंडः ॥ २ बाणः याचकश्च ॥

कामप्यभिज्ञानमालांसुग्रीवग्रीवायांबाणनिवारणनिपुणांसिद्धौषधिमि
वबध्वाभूयोपिवालिनमाहवायाह्वयेतितमादिदेश ॥पुनरप्यवाप्यकिष्किं
धांपर्जन्यइवगर्जतितस्मिन्सुत्रामपुत्रस्ताराभिहितांहितोक्तिमतिक्रम्य
दुरतिक्रमतयानियतेःसमारब्धसमरोदाशरथिशरशकलीकृतवक्षःस्थ
लःक्षितितलेसहसापपात ॥अथविदितवृत्तांतासंततास्रनिष्यंदकलुषि-
ततारातारानगरान्निर्गत्यवारिवारितंवारणयूथपतिमिवसुग्रीवनिर्भ-
यनिरीक्ष्यमाणमुद्धृतग्रीवमुत्थातुमक्षमतयाक्ष्मातलार्पितकूर्परयुग-
लंगलगलदसृक्पूरशारशरीरंशरासनशिखरविन्यस्तहस्तेनसन्निकर्ष-
स्थितेनकाकुत्स्थेनकृतसल्लापमपेताडंबरमिवांबुधिमस्तोन्मुखमिव-
मयूखमालिनंवालिनमालिंग्यस्वांकोत्तंसिततदुत्तमांगारघुनाथमित्थ-

टि॰ ॥१दैवस्य.॥

बिलमुखः सवलीमुखबलस्तस्मै दत्वास्वयमुदश्रुरुदकं नैवापमवापंशो काधः किष्किंधां ॥ अथ विदितवृत्तांतैरमात्यैरभिषेचिते मयि मायाविनं-निहत्य खरतरभुजपरिघविघट्टितबिलवदनपिधानस्तरसा रसातला-त्पुरं प्रविष्टोतीवरुष्टः प्रभ्रष्टाशयं बहुशः प्रणिपतंतं प्रतिपादितयाथात-थ्यं मां नगरान्निरागसमपि निरकासयत् ॥ तदनु तदनुधावनात्कांदि-शीकस्य मम पर्वतेस्मिन्नकुतोभयसंचारकारणमाकर्ण्यतां ॥ पुरैक-दा वालिनमतुलभुजबलमखिलकुलाचलच्चलनचतुरं चतुरर्णवलंघ-नजंघालं दुंदुभिर्नाम वृंदारकारिर्लुलायकायः परिभूयसमरे समतिष्ठ-त ॥ निहतस्य तस्य शवं बाहुबलावलेपेन वाली सकललोकविलयक्लि-लदनिलबलचलितलघुतूललीलया मतंगाश्रमक्षितौ क्षिप्रमाक्षिपत् ॥ प० ॥ तत्र वालिकरनुन्ननिष्पतद्दुंदुभिप्रसृतरक्तबिंदुभिः ॥ पाटलं तद-

द्धं॥ममहृदिनिरपायेवर्तमानेकपींद्रेरघुवरयदमुष्मेतिष्ठसेचापपाणिः
॥१९॥ग॰॥एवंविलपंत्याहारयिताश्रुधारायास्ताराया:परिदेवनरवैर्बा-
ष्पांबुकणाश्रुक्षणैरक्षीणश्वासानिलैश्वकृताश्वासइवलब्धसंज्ञोवाली
निजनंदनमिक्ष्वाकुनंदनेसमर्प्यांगदमंगसंगिनींकांचनकांचनमालांशो
कावनतग्रीवायसुग्रीवायदत्वानिजभुजबलप्रशांतासुरःप्रशांतासुर-
भूत्॥तत्रहासकलभुवनबहुमतबाहुबलानलशलभायिताहितबल-
ललितगंधर्वगंधसिंधुरपंचताकरणपंचाननदशमुखभुजभुजंगभो
गनिरोधायाहितुंडिकायितवालवलग्नवालिन्विलयंकथंगतोसीतिबा-
ष्पाविलमुखावलीमुखास्तस्यराजाज्ञयायथाभिप्रेतंप्रेतकृत्यंसर्वेनिर्व
र्तयामासुः॥प॰॥अभिषिक्तेतुसुग्रीवेरामश्यामपयोमुचा॥अभिषे-
कुंस्थितामेघास्तन्महींमहिषीमिव॥२०॥आर्यार्यान्वेषणाकार्योशरदि

स्कक्कसंविदा ॥ कपीद्रेणार्थितोरामः किष्किंधावर्तनंप्रति ॥ २१ ॥ नयो
ग्यानगरप्राप्तिरित्युक्तवतिराघवे ॥ सुग्रीवप्रार्थनाप्यासीद्भरतप्रार्थ
नासमा ॥ २२ ॥ दत्तार्जुनविकासेन धौर्तराष्ट्रान्निरस्यता ॥ तेनजीमू
तकालेनदेवकीनंदनायितं ॥ २३ ॥ तत्र ॥ आस्माकींरूपलक्ष्मीमस-
कृदपहरत्यात्मकांत्यातदास्तांभर्तारंनः स्करेंद्रंकिमपिनगणयन्वा-
लिनंद्राग्जघान ॥ इत्थंमत्वैववैरंझटितिघनघटाराघवस्याहवोत्था-
मांशामांशाश्चरुध्वास्तनितमिषमहासिंहनादंततान ॥ २४ ॥ उपचि-
तजीवनधारासत्पथभाजोनिरस्तसंतापाः ॥ भूपाइवनवमेघाः पौल-
स्त्यमहावलाकुलिताः ॥ २५ ॥ ग० ॥ तेनकिलरघुपतिरतिमात्रप्रवृद्ध
मन्युःशतमन्युशरासनशोरितरतारापथांघनतरघनरवमुखरितह
टि० ॥ १ ऋक्षः पार्थश्च ॥ २ हंसः धृतराष्ट्रपुत्राश्च ॥ ३ इच्छां ४ दिशाः ५ शबलः ॥

रिन्मुखाभोगांकदंबवनपवनाकंपननिराडंबरकादंबकुटुंबामंबुदकदंब
कवलितांबरांशिलींध्रसंबंधबंधुरवसुंधरांविकचकुटजनिचयकवचि
तमहारण्यांप्रावृषेण्यांप्रक्रियांप्रेक्षमाणोलक्ष्मणमिदमभाषत॥प॰॥
अयंकालःकालप्रमथनगलाभैरभिनवैरहंयूनांयूनामपहरतिधैर्यं-
जलधरैः॥स्मराधाराधारापरिचयजडावातिसहसानभस्वंतःस्वंतः
कथमिवविवियोगःपरिणमेत्॥२६॥महासमरसूचकप्रतिदिशंमनो
जन्मनोमयूरगलकाहलीकलकलःसमुज्जृंभते॥पयोदमलिनेदिने-
परुषविप्रयोगव्यथांनरेषुवनितास्कवादधतिहंतकेकाइति॥२७॥अं-
भोदरोधरविनिर्गतवारिधारासंमर्दमांसलसमीरसमीर्यमाणैः॥आ-
मोदवीचिनिचयैःकुटजप्रसूनैराकाशमेतदवकाशविहीनमासीत्॥ ५२

टि॰॥१ कलहंसाः २ अहंकारवतां ३ वायवः ४ मनोभवस्य ॥

मकथयत् ॥ ५० ॥ कारुण्यं निरवधि यत्तव प्रसिद्धं शीतांशोः सहजमिवा
र्तिहारि शैत्यं ॥ तत्सर्वं मनुकुलनाथ रम्यकीर्ते मत्पापात्कथय कथं त्वया नि-
रस्तं ॥ १४ ॥ एवंविधे प्रियतमे प्यनपेतजीवां मां राक्षसीति रघुपुंगव साधु-
बुध्वा ॥ बाणं विमुंच मयि संप्रति ताटकारे श्रेयो भवेद्दयितसंगमकारिणस्ते
॥ १५ ॥ साधारणी क्षितिभुजां मृगयेति पूर्वमुक्तं त्वयैव जनसंसदि सत्यवा-
दिन् ॥ शाखामृगीं तदिह मारय मां शरेण को नाम राम मृगयुर्दयते मृगी-
णां ॥ १६ ॥ संत्रस्य पूर्वममुतस्तव बंधुरेष भेजे यथाद्रिमकुतोभयमृष्यमू-
कं ॥ भर्ता ममायमपि राम शरैरभेद्यं प्राप्तो मदीयहृदयस्थलमद्रिदुर्गं ॥ १७ ॥
नाहं रुकेतुतनया न च सप्तसालीवाली न च त्रिभुवनप्रथितप्रभावः ॥ ता
रास्मि वज्रहृदया विशिखैरभेद्या धन्वी कथं भवसि राघव मामविध्वा ॥ १८ ॥
क्षितिपतितनयानां हृंतगर्भेश्वराणां किमु निरवधि मोघ्यं शौर्यवज्जन्मसि-

सर्वे निर्वापिताश्च सहसैव तडित्प्रदीपाः ॥ ३२ ॥ ग० ॥ क्रमेण वाहिनीजातं न
सकलं भाविनी वानरवाहिनीपूर्तिमसहमानमिव तनिमानमभजत ॥ दु-
र्दिनापाये लंकायामपि राजहंस निःशंकसंचारः संभाविष्यतीति मत्वा कि
लभूस्यामपि समजनि राजहंसनिःशंकसंचारः ॥ एवं प्रोषितायामपि प्रो-
षितजन्मशोमुषीमुषि प्रावृषि ॥ प० ॥ कामक्षिप्तपृषत्कभिन्नहृदयच्छिद्रप्र-
णालीगलन्मैत्रीसारलघौ प्रतिश्रुतगिरं निर्वोढुमप्यक्षमे ॥ सुग्रीवे चिर
संस्थितां शमयितुं रागांधतां तादृशीं किष्किंधां द्रुतमाप कोपकलुषो रामा
ज्ञया लक्ष्मणः ॥ ३३ ॥ ग० ॥ तत्र सौमित्रिरतीव रुष्टः प्रविष्ट इत्यंगदेन वि
ज्ञापितोप्यनंगसंगरसंगतपरिश्रमादजातजागरः सुग्रीवस्तद्दर्शनत्रा
ससंकुलितसकलप्लवंगकुलकिलकिलायितेन प्रबुद्धः सचिवयोः प्लक्ष ५३

टि० ॥ १ बुद्धिः ॥ २ शरः ॥ ३ जलनिर्गममार्गः ॥

प्रभावनाम्नोः प्रभावेन प्रकृतिं प्रपेदे ॥ ततस्तस्मिन्सुग्रीवे राघवरोषस्य-
कारणं निरूपयति सति मुखरितहरिन्मुखोऽभूल्लक्ष्मणज्याघोषः ॥ प० ॥ त-
त्रासनं द्रुतमपास्य पतिः कपीनां तत्रासनम्नवदनोऽघनचापघोषात् ॥ सं-
तोषपोषमिव भूरि भजन्प्लवङ्गः संतोषनाशपिशुनात्तरुणाभ्रघोषात् ॥
३४ ॥ ग० ॥ ततः प्रतिश्रुतकार्यस्य प्रोत्साहनाय प्रणयकुपितेन भ्रात्रा प्रेषि-
त एष इति मारुतिना धार्यमाणधैर्यः सुग्रीवः सौमित्रिं सांत्वयितुं तारां प्रे-
षितवान् ॥ प० ॥ द्रागवारुणीभजननिर्नकुलराजतेजो निष्क्रांततारमुपशां-
ततमो विकारं ॥ पूर्वाशया विशति सत्पथभाजि मित्रे सत्यं निशांतसममस्य
निशांतमासीत् ॥ ३५ ॥ ग० ॥ सा तु रामा रामानुजमासाद्य चैवमवोच-
त् ॥ प० ॥ प्राचीनं व्यसनं स्मरेंद्र तनयाज्ज्ञातं वनेभ्राम्यतः सुग्रीवस्य-
टि० ॥ १ मदिरापश्चिमदिशाच ॥ २ सूर्यस्कृहृदिच ॥ ३ मंदिरं ॥

निराकृतं खररिपोर्बाणेन सालच्छिदा ॥ अथास्य व्यसनं तु पंचविशिखादा-
सीदुपेंद्रात्मजात्सौमित्रेस्तदपि प्रशांतमभवज्ज्याघोषमात्रेण ते ॥ ३६ ॥ ग०
॥ तदनंतरं तारासांत्वनप्रशांतकोपेन सौमित्रिणा साकं तपनतनयः सवि-
नयमाश्रित्य दाशरथिं प्रांजलिर्व्यजिज्ञपत् ॥ देव कपिबलमखिलमखिल-
कुलाचलनिलयमनिलतनयेनाहूतं पुरुहूत इव पुलोमजापहारिणं बला-
भिधानमनु त्वा द्राक् रावणं रणे हनिष्यतीति ॥ ततः ॥ प० ॥ ककुभि कुलिशपा-
णेर्मैथिलीं तां विचेतुं विनतमथ दिशायां मारुतिं प्रेत भर्तुः ॥ वरुणदिशि सु-
षेणं यक्षराजांचितायां हरिं इति शतबलिं च प्राहिणोद्वानरेंद्रः ॥ ३७ ॥ ग० ॥ त-
दनु दिनेषु केषुचिद्गतेषु ॥ मासातिपातनासहो नियतमुदग्रदंडः सुग्रीव
इति सत्वरमितरेषु दिगंतरप्रेषितेषु निवृत्तेषु प्लवंगबलेषु पितृपतिहरिति



टि० ॥ १ दक्षिणदिशि ॥

॥२८॥ घनश्यामलपत्रस्य व्योमन्यग्रोधशाखिनः ॥ प्ररोहाइवलक्ष्यंतेवा
रिधाराधरांगताः ॥२९॥ अंभोधिपानेसलिलेनसाकमापीतमौर्वाग्निशि-
खाकलापं ॥ तमोदरावारिधरावमंतिविद्युल्लतोन्मेषमिषेणनूनं ॥३०॥-
ग० ॥ इत्थंप्रवृत्तेषुघनदिनेषुदाशरथिनाकथमपिनीतेषुतदाकारकां-
तिविजितमिवशनैःशनैर्मेघमंडलंपांडुरमभूत् ॥ तस्यचापस्यव्यापार
वेलायांनसन्निधातव्यमित्यंतरिक्षांतरादंतर्हितंकिलपाकशासनशरा-
सनं ॥ प० ॥ रघुपतिचापघोषसमयोभावितेतिभियाप्युपरतमुद्धटंघन
घटाजनितंस्तनितं ॥ श्वसितमरुद्भिरत्रविजितःकिलशांतिमगात्परि-
चितकेतकीकुटजनीपवनः पवनः ॥३१॥ तापोपशांतिनटनात्कृतलो
कहर्षावर्षानटीगगनरंगतलात्प्रयाता ॥ अंभोदवाद्यमचिरेणशशाम
टि० ॥१ वटः ॥

याःस्वयंप्रभायाःप्रभावेनबिलादुत्तीर्णानांसमयातिपातेनपतिष्यतिसु
ग्रीवदंडइतिविक्लतिमुपेत्यसंगतमनोगदेनांगदेनपवनतनयवचनप्रत्य
यप्रत्ययानीतप्रकृतिनासहप्रायोपवेशमुपेयुषांप्लवंगपुंगवानांपरिदेव-
नकथांप्रसंगेनजटायुषोनिधनंनिशम्यविंध्यरंध्राद्विहितसंपातःसंपा-
तिर्नामगृध्रराजस्तानेवमवादीत्॥प०॥केयूयमक्षयबलेष्वभिधायपा-
पंवत्सेजटायुषिममश्रवसीदहंतः॥तस्मात्पुराकिरणदाहितपक्षयुग्मंति
ग्मांशुमुष्णवचसाशिशिरीकुरुध्वे॥३९॥ग०॥ततस्तैःप्रस्थापितवृत्तां-
तःसंपातिःप्रोषितायुषेजटायुषेनिवापांजलिंनिर्वृत्यपुराकदाचिदामिषा
न्वेषणायप्रेषितेननिजसुतेनसुपार्श्वेनाम्नासमाम्नातंमहेंद्रमहीध्ररंध्र
निर्गतदशवदननीयमानजानकीपरिदेवनंजानानःसूक्ष्मचक्षुःपुनरेव

टि०॥१कर्णौ.॥

मवोचत् ॥ अलंकातर्येण लंकाभिधानांयातुधानराजधानीं अधिवस-
तिसीतादशवदननीतातत्रगच्छंतुभवंतः ॥ प० ॥ किंच ॥ दिवाकर-
प्लोषभवांममार्तिं निशाकरोनाममुनिर्निरस्यन् ॥ जगादवः कार्यमहा
र्यधैर्याःक्षणेनतांद्रक्ष्यथराजपत्नीं ॥ ४० ॥ इतिब्रुवाणंकृतसौहृदंतं
संपातिमापृच्छ्यपरावरज्ञं ॥ प्रवृद्धहर्षाःप्रथितप्रभावाः प्रतस्थिरेवान
रयूथनाथाः ॥ ४१ ॥ पर्याप्तंप्रमदमुपेयुषांकपीनांपांथानांदशमुख-
मार्गमार्गणाय ॥ पाथेयीकृतकपिराजशासनानांपाथोधिर्नयनपथा
तिथिर्बभूव ॥ ४२ ॥ स्फत्रामपुत्रारिशिलीमुखानांस्मृत्वागणस्तत्रवली-
मुखानां ॥ अपामपारस्यनिधेश्चपश्यन्नेवाङ्मुखोवक्तुमवाङ्मुखोभूत्
॥ ४३ ॥ ग० ॥ तदनुवानरसेनामेनामवार्यमाणकातर्यामित्थमकथयदं
टि० ॥ १दाहः २अधोमुखः ३मौनमुखः ॥

गद्ः॥ प०॥ किमितिभजथमौनंवानरामानहीनाः सगररचितकूपोल्लंघ
नेकुंठिताशाः॥अकलशभवलेह्यंदुःशमंवाडवाग्नेरनवधिमयशोब्धिं-
किंसमर्थास्तरीतुं॥४४॥गं०॥ ततःपारावारपारीणताया्मात्मशक्तेरि-
यत्तांप्रत्येकंकथयत्सुयूथपेषुनिर्दिश्यांजनेयंप्रभंजनसंभवंजांबवान
भिहितवान्॥प०॥हेवीरायूथनाथाःपरिणतिपरुषःकोयमासीद्विषा-
दः कस्मादस्माकमेतज्जलनिधितरणेशक्तिरेतावतीति॥स्मृत्वाराज्ञः
प्रतिज्ञामयमनिलसुतोलंघनायोन्मुखश्चेद्वेदःप्रादुर्भवेत्किंकथयतप
यसामास्पदेगोष्पदेवा॥४५॥उदपतदुपभोक्तुंमंडलंचंडभानोःपरिण-
तफलबुध्याबालभावेपिसोयं॥तदनुकुलिशपातक्षुण्णगंडायतस्मैव
रमदिशदमेयंवायुतुष्ट्यैविधाता॥४६॥इत्थंजांबवतापरावरविदासंधुं- ५६

टि०॥१अमर्यादं·२पारगामितायां·३वर्धित·॥

प्रेषितामारुतिजांबवदंगदनलनीलप्रभृतयोप्यलब्धसीतोपलब्धयस्त-
नयनाशकुपितकण्वशापनिःशेषितचराचरमपरचितचारप्रांतारंकांता
रंतीर्त्वाकांतारेकस्मिंश्चिद्रस्करमेकंनिरीक्ष्यरक्षःपतिरितिबुद्ध्यायुद्धाय
सन्नद्धाबभूवुः॥ प०॥ निशिचरपतिरित्यवेक्ष्यरोषादशनिनिपातनिभेन-
ताडनेन॥ अस्करहितममुंप्रहृत्यदैत्यंस्करहितमेवचकारवालिपुत्रः॥३५
॥ग०॥ ततस्तारेयवचनात्ततइतोविचित्यनिकटगिरिसानुशयाःसानुश
याःसलिलाशयाजलचरपतंगपतनोत्पतनानुमीयमानपल्वलोपशल्यं
किमपिबिलकुहरमवगाह्यकंचनकांचनमयंमयमायानिर्मितंपिहिता-
शानभोभागंविहिततपोभंगायैस्करांगनायैहेमायैद्रुहिणेनवितीर्णंमेरु-
सावर्णिदुहित्रास्वयंप्रभयाकृतावनंवनोद्देशंअविशन्॥ ततःकृतातिथ्या

टि०॥ १रावणः २दैत्यसहितं प्राणरहितंच. ३ पश्चात्तापयुक्ताः॥

द्भूतधातुधूलिपाटलितविकटकटकतयाक्षारितशोणितइवतत्क्षणप्रबुद्ध-
कंठीरेवकंठरव[1]मुखरितकंदरतयाकृताक्रंदइवपरिसरगह्वरनिबिरी
सन्निःसृतसरीसृप[2]तयानिर्गलितांत्रमालइवघूर्णमानतरुविटपकोटि-
ताडितजलदवृंदस्यंदितसीकरनिकरकोरकिताकारतयासमुपजात-
स्वेदइवस्फुटिततटोपलपतनदलितकीचकसुषिरसंमूर्छत्पवनफूत्का
रपरिपूरितगगनतयाप्रवर्द्धमानोर्ध्वश्वासइववचसामविषयंदौस्थ्यं-
अभजत ॥ प॰ ॥ कृत्वामारुतिलंघनोत्थितरयात्[3]तत्रानुयात्रांततः पर्या
यात्पततांमहेंद्रगहन[4]क्षोणीरुहाणांततिः ॥ मध्येवारिनिधिप्रकाशितशि
खासेतोःकृतेभाविनःसूत्रन्यासनिखातशंकुनिवहभ्रांतिंपयोधौदधौ-
॥ २ ॥ पक्षाभिघातरयरेचितवीचिमालःपाथोनिधेःपवननंदन[5]विश्रमाय ५७

टि॰ ॥ १ सिंहः ॥ २ सर्पतया ॥ ३ वेगात्. ४ अरण्यं. ५ हनूमान्. ॥

॥उत्तुंगशृंगकुलकीलितनाकलोको मैनाकभूभृदुदजृंभतसंभ्रमेण॥३॥
ग०॥ तत्रयात्राभस्पृहः भस्मद्भूतइतिवक्षसातमधःपातयित्वाप्रयातमेनं
सांत्वयन्हिरण्यनाभोबभाषे ॥ प०॥ सागरेणकृतज्ञेनतवाध्वश्रमशांत-
ये॥ मारुतेप्रेरितोस्म्यत्रसौम्यविश्रम्यगम्यतां॥४॥ तवपित्रापरित्रातः-
पूर्वंपर्वतभेदिनः॥ तस्मान्नास्तिविपक्षोत्रसपक्षइतिमांभज॥५॥ग०॥
एवंप्रार्थयमानमेनंसंमान्यकार्यगत्यागतेसतिहनूमति॥ प०॥ अवलो
क्यहिरण्यनाभमब्धौवलमानंवलमानमाथिवज्रः॥ शतमन्युकरपेत
मन्युकरासीत्पवमानात्मजसेवनादमुष्मिन्॥६॥ ग०॥ तदनुयथापुरं-
लंकापुरंप्रतिधावतोहनूमतःसरणिमरुणदरुणसारथेःपदवींविंध्य-
इववदनंव्यादायहिरसनजननीरंहसास्करसा॥ प०॥उज्जृंभितस्यत

टि०॥१ स्पर्शितः २ विघ्नं. ३ इंद्रात्. ४ चंचलं. ५ सूर्यस्य.॥

रसास्फुरसांविजेतुंपादौपयोधिकलितौपवमानसूनोः ॥तस्योत्तमांग
मभवद्गगनस्रवंतीवीचीचयस्खलितसीकरमालभारी ॥७॥तनुंत-
नूकृत्यतदाहनूमान्कृत्वावगाहंजठरेतदीये ॥ ततोविनिष्क्रम्यसत्वं
क्रपाणेस्त्रिविक्रमस्यक्रममूमेवचक्रे ॥८॥भूयोपिसोयंरघुनाथदूत-
श्चिच्छेदगच्छन्नखरैःखराग्रैः ॥ नृसिंहरंहाःपथिसिंहिकांगंछाया-
निरोधादुपपन्नमन्युः ॥९॥ग०॥तदनुपारावारस्यपारेलंबमानशि
खरिणिलंबमानतनुर्लंकापुरद्वारमासाद्यनितांतचिंतातंतुसंदानि-
तांतःकरणोभूत् ॥ वानरसेनाकथंतरेदिममंतरायंवितन्वंतमुदन्वं
तंतरतुनाम ॥ कथमुपयातुयातुधानराजधानीमिमांसर्वथावितथ
मनोरथोदाशरथिर्मोघीकृतार्णवलंघनःकेवलमहमभवं ॥जीवतिवा 

टि० ॥ १ विष्णोः २ तीक्ष्णाग्रैः ॥

क्षितप्राभवः कृत्वावृद्धिमुपेयुषास्ववपुषात्रैविक्रमंप्रक्रमं॥आरुह्याद्रि
तटंयथोचितमसौसंमान्यसेनाधिपानासन्नानथसंननाहतरितुंवारां-
निधिंमारुतिः॥ ४७॥ ॥ इतिश्रीविदर्भराजविरचितेचंपूरामायणेकि-
ष्किंधाकांडःसमाप्तः॥ ॥अथसुंदरकांडः॥ ॥ प०॥ ततोहनूमा-
न्दशकंठनीतांसीतांविचेतुंपथिचारणानां॥ महेंद्रशैलस्यखगेंद्रवे
गः प्रस्थादुदस्थात्प्रथमानमानः॥१॥ ग०॥ तदानीमुदन्वदुल्लंघनदृ-
ढतरनिहितचरणनिष्पीडनंसोढुमक्षममक्ष्माभृदेषनिःशेषनिःसरन्नि
र्झरौघतयानिरंतरनिष्पतद्बाष्पपूरइवइतस्ततोविततजीमूतवृंदस्यं-
दतयापारिप्लवशिथिलधम्मिल्लइवसंत्रस्यमानकुंजरयूथतयासंजा-
तश्वयथुरिवससाध्वसतयाधावमानहरिणीगणचरणकोटिपाटनो-

टि०॥१ शोधितुं. ॥

जनस्यसंदेहसंदोहंसंदधानेसंध्यारागेसमुदंचिते ॥ सरसीरुहश्रेणिषुपत्र-
पुटकपाटपिधानास्कम्प्रतिकुमुदवनंमकरंदभिक्षामटत्सुमधुव्रतद्विजेषु-
विकचकुवलयकलिकाकषणकषायेषुसायंवायुषुततइतःसंचरत्सुति-
मिरेषुकालागरुधूमस्तोमश्यामलितेषुदिक्पालपुरगोपुरव्यूहेषुप्रतिकम
लाकरंप्रेंखितविश्लेषवेदनापूर्वरंगेरथांगविहंगानांदीनक्रेंकारेनक्षत्रमा
लालंकृतेगगनमतंगजे ॥ प० ॥ आविर्बभूवपूर्वाद्रेःशृंगेशृंगारजीवितं ॥-
तमस्तमालकांतारकुठारःशशलांछनः ॥१०॥ तत्करैस्तमसारुद्धैरेजि-
रेगगनाजिरे ॥ शैवालचयसंच्छन्नाःसरसीवबिसांकुराः ॥११॥ तस्मि-
न्प्रदोषसमयेसहसाहनूमान्कीर्तिच्छटाजवनिकामपनीयशत्रोः ॥ आ
विर्बभूवस्रुमनःपरितोषणायलंकाप्रवेशनवनाटकसूत्रधारः ॥१२॥

टि० ॥ १ भ्रमराः २ कमलं. ३ किरणाः ४ पंडिताःदेवताश्च. ॥

ग० ॥ तत्काले लंकाधिदेवतामात्मना सह विग्रहं विधातुं गृहीतयुवतिविग्र-
हां मार्गस्यार्गलीभूय भूयसा तर्जयंतीं निर्जित्य तया वानर रचितावज्ञोपज्ञं
निजविलयं सरसिजासनशासनादावेदयंत्या विहितानुमतिर्मारुतिर्लंका-
यामविकलमेव मैथिलीं विचिन्वन्नैऋतिचक्रवर्तिनः प्रासादमाससाद ॥-
तत्र ॥ प० ॥ एषा राक्षससार्वभौमनगरी रक्षश्च भूरक्षिता तस्येदं सदनं वि-
मानशिखरैर्बिभ्राणमभ्रावलिं ॥ एतत्पुष्पकमाहृतं धनपतेरित्यादरान्मा
रुतेस्तत्रादर्शयदिंदुदीपकिरणप्रद्योतिताशा निशा ॥१३॥ अपि च ॥ आदि-
त्यः कृतकृत्य एष भविता सीतापतेरीदृशं साहाय्यं विरचय्य कीर्तिममिता-
मादित्सुना सूनुना ॥ इत्यालोच्य तदा किल स्वयमपि ख्यातिं गृहीतुं परां लं-
कायां रघुनाथदूतसरणौ चंद्रेण दीपायितं ॥१४॥ ग० ॥ एवमेव पर्यटन्नस्व
प्नसुंदरीसौंदर्यमुद्रां निद्रयाप्यतिशय्य शय्यागृहे कृतसंवेशां वेशयुवतीपरि

चं·रा· हृतमवरोधवधूजनमध्यनिरोधेननिरीक्ष्यतत्रवितथमनोरथोमारुति- सुं·का·
६० र्विरचितबहुविधचिंताप्रकारःप्रासादादवप्लुतःसन्नशोकवनिकाया ५
मपिमैथिलीमन्वेष्टुमभीष्टदेवताप्रणाममतनुत॥ प॰॥ असौजनक
नंदिनींततइतोविचिन्वन्क्षणादशोकवनिकामगादपगतान्यमार्गे-
भ्रमः॥परामभिलषन्गतिंशमधनोयथानिर्ममस्त्र[1]यीमखिलकि-
ल्बिषप्रशमनैकदिव्यौषधिं॥१५॥ग॰॥ततस्तस्यांनागतालहिंता-
लतमालकृतमालसरलबकुलतिलकामलककुटजलिकुचकेतक-
कंकोललवंगविकंकतकदंबकोदुंबरकपित्थाश्वत्थकुरबकमरुब-
कुंदतिंदुकचंदनस्यंदनचंपकचांपेयपनसवेतसपलाशपाटला-
प्रियालप्रायैरनेकैरनोकहनिवहैःपरिहृतांपरिभ्रमन्नभ्रंकषविटप ६०

टि॰॥ १ वेदत्रयी.॥

नवेतिनजानामिजानकीमिति ॥ ततस्तत्रभवतींसीतामवजिगमिषुरांज
नेयः प्रच्छन्नसंचारहेतोरस्तमयंगभस्तिमालिनः केवलमभिललाष ॥ तद
नुशातमखस्यनिक्षेपचापस्य प्रत्यासीदतिप्रयोजनवेलेतिप्रचेतसेकथ
यितुमिवप्रतीचींदिशंप्रविशतिभगवतिभास्वति ॥ गगनतलमिदमपरम-
हीधरकटककांतारसमुद्भवदावपावकशिखाश्रेणिभिःकिमिहशोणितं ॥
अथवासमीपसमापतत्पतंगरश्मिदृढतरवेष्टननिष्ठ्यूतानलतप्ततपनो
पलज्वालसमुल्लसज्ज्वालापटलैः किमापाटलं ॥ आहोस्विदागतायमित्रा
यमहार्घमर्घ्यंप्रदातुंप्रमुदितचेतसाप्रचेतसातूर्णमर्णवोद्धीर्यमाणमाणि
क्यकिरणैः किमरुणितं ॥ आहोस्वित्तारापथतरंगिणीसलिलमपिग्रसितु
मुज्जृंभितस्यचरमसागरौर्वाग्नेरर्चिःपुंजेनकिमिहरंजितमिति ॥ सकल-

टि० ॥ १ वरुणाय. २ महामोल्यं. ॥

चर्चयाजानकीदर्शनेच्छयाच प्रकटितरागः वैकक्षमालयामुकटतटरत्न-
 प्रभयाचतिरस्कृतनक्षत्रमालः शनैः शनैरविशदशोकवनिकां ॥ पृ० ॥ र- 
जनिचरमभागेवारसीमंतिनीनांकरतलकलिताभिर्दीपिकामार्जनी-
भिः ॥ दिशिंदिशिपरिमृष्टंयत्तमस्तत्समस्तंहृदयमवजगोहेकेवलंरावण
स्य ॥ १९ ॥ सोयंमदांधहृदयोरघुवीरपत्नींसीमंतिनीतिहतनीतिरवाप-
पापः ॥ आमूलपल्लवितकोमलसल्लकीतिवैतानपावकशिखामिववार-
णेंद्रः ॥ २० ॥ ग० ॥ एतद्दर्शनवेपमानतनुलतामैथिली ॥ कापुरुषविषय-
पुरुषवचनपारंपर्येणविदीर्यमाणहृदयाहृदयदयितशौर्यप्रत्ययादमुमे
वतृणायमत्वा तृणमंतरतः कृत्वास्थितापर्यभाषत ॥ अयिभोः सकलस
माचारप्रतिष्ठानिष्ठः परमेष्ठीननुकुलगुरुर्भवतः परकलत्रगात्रनेत्रप्रस 

टि० ॥ १निरस्तं. २प्रविवेश. ३नारी. ॥

त्किरण्यनिरपत्रपांजनयतिगोत्र[1]जातानां ॥ भूयोपिपंचवटीपरिसरममुंज-
नंप्रभंजनइवानुकूलः कुलोपकंठपरिभ्रष्टांनावमिवयदिनयेथाः ॥ तदा-
पिद्यतेनियतंमदीयोजीवितेशः[2]साक्षाज्जीवितेशो[3]पित्वयिदयालुर्भवेद्दा
शरथेरजेयस्यमैत्र्याः पात्रमपिभवितासि ॥ किंतु ॥ खरप्रमुखनिशाचर
बलमथनसमयस्फुचिरलग्नसांद्रवसापंकपंकिलितमुखमार्यपुत्रस्य
शिलीमुखंभवंतमंतरेणकः श्रद्दधीतनिजहृदयगलितरुधिरधारया-
प्रक्षालयितुं ॥ अथवाजनस्थानसमरादारभ्यसमराभावाव[4]ग्रहतृषि-
तानांसौमित्रिपत्रिचातकानांत्वदंगगलितशोणितांबुपारणांतवापन-
यघनतस्त्वेत्कः समर्थोनिवारयितुं ॥ प० ॥ अथनिशिचरनाथंपंचबा
णावभिन्नंनहिजनकसुतायाः प्रापदेकापिवाणी ॥ जनमुपनतमृ-

टि० ॥ १ स्ववंशजातानां. २ प्राणेशः ३ यमः ४ अवर्षणं. ॥

त्युपंचवक्त्राहिदष्टंविशातिहृतविषाधेरोषधेःकिंनुशक्तिः ॥२१॥ग०॥
एवंजनकदुहितुरवधीरणाफणितिमाकर्ण्यकोपपराङ्मुखोदशमु-
खस्तामभितोनिवसंतीराराक्षिकाराक्षसीराहूयमवत्यश्चतुर्भिरप्युपा
येरेनांममावश्यंवश्यांकुरुध्वमियमननुकूलाचेदिमांहृताशांप्रातरा
शायमहानसंनयतेत्यादिश्यनिशांतेप्रत्यासन्नेनिशांतमेवविवेश ॥
तदनुभीषणवीक्षणाक्षणदाचरीणांवाक्यदोषान्मेषणान्मुकुलितहृ-
दयपुंडरीकापुंडरीकयूथ्यपरिवृतसारंगांगनाभंगीमंगीकुर्वाणागीर्वी
णातरुणीवशापबलाहूस्कंधरांप्रपन्नाजनकनंदिनीचिंतामेवमकरो-
त् ॥ प० ॥ नूनंविदितवृत्तांतेजटायुषिगतायुषि ॥ मामिहावस्थितामा
र्यपुत्रःकिन्नावबुध्यते ॥२२॥ग०॥आहोस्वित्क्रव्यादमाययाविपर्य ६२

टि० ॥ १ देवांगना. ॥

निबिडितगगनप्रपंचांकांचनकांचनमयींशिंशपामारुरोह ॥ प० ॥ तत्र-
तत्पत्रसंछन्नगात्रःपुत्रोनभस्वतः ॥ न्यग्रोधदलसंलीनजनार्दनदशांदधौ ॥१६॥ मल्लींचूतवनादिवस्तुहिवनेम्लेच्छेनसंस्थापितांमालांदेवंकुलादिवामिषधियाक्षिप्तांश्मशानेश्वना ॥ देवीमाश्रमतस्तथास्वभवनंनक्तंचरेणच्छलादानीतामपनीतवेषरचनामालोकयन्मारुतिः ॥१७॥ ग०
॥ पुनरयमेवंचिंतांततान ॥ प० ॥ एनांविनारघुपतिःपरिगृह्यधैर्यंसप्राणएववसतीतिविचित्रमेतत् ॥ ज्योत्स्नांविनापिनिवसन्निशिशीतभानुश्छायांविनापिनिवसेद्दिवसेश्वरोपि ॥१८॥ ग० ॥ एवंचिंतयताहनूमतानीतनिशीथसमयेनिशीथिनीनाथेचरमगिरिशिखरोपकंठसेवासमुत्कंठमानेदशकंठस्तकनिद्राशेषेणस्मरप्रहारेणचकलुषीकृताक्षःसरसहरिचंदन

टि० ॥ १वायोः २देवालयात् ॥

भणार्थमयमन्वयसंगतानिरामाभिकीर्तनमधूनिशनैर्न्यषिंचत् ॥२६॥-
ग॰॥ तदनंतरंसमंतात्प्रसारितनयनाजनकतनयातस्यांशाखायांशाखा
मृगमुद्वीक्ष्यचकितहृदयादुःस्वप्नबुध्यासलक्ष्मणायभर्त्रेभद्रमाशंसमा-
नाजनमिमंदुरापस्वापस्वप्नःकथमाप्नुयादितिविचिंतयमानामायासं-
मायातनैर्ऋतपतिबुध्यातस्मान्मारुतपुत्रात्तत्रास ॥ सोपिसमवतीर्यव-
चनवैचित्र्याज्जनकपुत्रींप्रत्याययन्नांजनेयःकृतांजलिर्व्यजिज्ञपत् ॥
प॰॥ कल्याणितीव्रवेगेनत्वद्वियोगेनताम्यतः ॥ राघवेंद्रस्यदूतंमाम-
न्यथामास्ममन्यथाः ॥२७॥ त्वयासहप्रस्थितचित्तवृत्तिर्विभावरीको
कसमानधर्मा ॥ वचोब्रवीन्मैथिलिमन्मुखेनत्वांकौशलंकोसलराजपु
त्रः ॥२८॥ अपिच ॥ शिरसातवसौमित्रिरकरोदभिवादनं ॥ अपृच्छत्सो- ६३
पिभद्रंत्वामधिपश्चवनौकसां ॥२९॥ ग॰॥ एवमभिहितयातयासंभूत-

विस्रंभयाभयानपेतयातावदनुयुक्तः पवनतनयोबालिमरणकारणंसु-
ग्रीवस्यसख्यमाख्यायप्राचेतसचेतइवसंततसन्निहितरामनामकमंगु-
लीयकमस्यैप्रायच्छत् ॥ प० ॥ सोख्यावहस्यपवनात्मजदीयमानरामां
गुलीयकविलोकनवासरस्य ॥ सत्यंकलांशततमीमपिनैवभेजेपाणिग्र
होत्सवदिनंजनकात्मजायाः ॥ ३० ॥ ग० ॥ ततस्तंजानकीनिःसीमहर्षाब
भाषे ॥ महाभागसर्वथास्यदुरात्मनः प्रत्यासीदतिमृत्युस्तथैवमनलाभि
धानयाबिभीषणदुहित्रामह्यंचस्वमात्राप्रेषितयाभाषितं ॥ अयमप्यना
र्यशीलस्तुकरीयमुपायमंतरेणममार्यपुत्रस्यनसमर्पयिष्यति ॥ नियतम-
हमपिमासादूर्ध्वंनशक्नुयांप्राणान्धारयितुमिति ॥ एतदाकर्ण्यमारुतिर्म
हानुभावेमाभैषीः ॥ भवंतींवहन्नेवतूर्णमुल्लंघितसागरोराघवन्चरणसर

टि० ॥ १ वाल्मीकिचित्तमिव. ॥

सिजमुपयास्यामीत्येवंमांसमर्थसमर्थयेथाइत्यभिधाय ॥ प० ॥ मे[१]हा 
महीध्रसध्रीचींसोयंवृद्धिमुपेयिवान् ॥ ययानूनमपांराशिः कुल्यातुल्या 
विशेदृशां ॥ ३१ ॥ अथतमुवाचसाजनकसुतामुदिताकिमुतवदुष्करंच
रणलंघितवारिधेः ॥ अपितुमयासहप्लवंगपुंगवयास्यसिचेदियमन
पायिनीपरिणमेद्भवतः पदवी ॥ ३२ ॥ अन्यच्च ॥ पातिव्रत्यहुताशनेन
यदितंकुर्यां महंभस्मसात्सत्यंदाशरथेःशरस्यनभवेदात्मोचितापार
णा ॥ किंचैतस्ययशोनिशापतिरपिप्रम्लानकांतिर्भवेत्तस्माच्छासि
तरावणेरघुपतौयात्राममश्रेयसे ॥ ३३ ॥ ग० ॥ एवंव्याहृतः पवनसु
तः सीतांपुनरभाषत ॥ प० ॥ मायामृगेणतवमैथिलिवंचितायाः शा
खामृगेणपुनरागतिरित्ययुक्तं ॥ एषाकथापिभुवनेविदितायदि- 

टि० ॥ १महापर्वतसदृशीं ॥

स्तप्रकृते:काकुत्स्थस्य किमुनास्थासंजायते ॥ अथवा ॥ प० ॥ नकेवलंमामह-
रद्दुरात्माकृपांचरामस्यनिसर्गसिद्धां ॥ इदंनचेत्संश्रितवत्सलःकिंभवेत्स-
तूष्णींजगदेकवीरः ॥ २३ ॥ ग० ॥ इत्थंविलप्यरघुपुंगवंचिंतयंती कृच्छ्रा-
न्मूर्च्छामगमत् ॥ प० ॥ निशाचरीस्तांनिरवद्यशीलांनिर्भर्त्संयंतीर्निभृतं
निवार्य ॥ अस्वप्नलोकोत्सवमात्मदृष्टंदुःस्वप्नमेकंत्रिजटाजगाद ॥ २४ ॥
किंच ॥ उपघ्नवृक्षस्यपरोक्षभावादुपेत्यपृथ्वीं स्फुरचिरंलुठंत्याः ॥ नक्तंचर-
स्त्रीमुखकर्शितायाःसीतालतायास्त्रिजटाजटाभूत् ॥ २५ ॥ ग० ॥ तदनं
तरमात्मत्यागायस्पृहयंत्यांमैथिल्यांमारुतिरियमनुपेक्षणीयातपस्वि-
नीनीतिमसुंचतीति ॥ चिंतांपरिगृह्यनेदीयानस्याबभूव ॥ ततः ॥ प० ॥ दे-
व्यादशाननवचोमयवज्रदीर्णकर्णांतरव्रणविरोपणभेषजानि ॥ विस्त्रं-
टि० ॥ १ आश्रयतरोः २ अंतिकस्थः ३ विश्वासार्थं ॥

स्त्वं विजहौ वासविवायसे स वीरः ॥ अथ तत्कृपया हृताक्षिमात्रश्चिरजीवी-
सदधीय यथार्थसंज्ञां ॥ ३५ ॥ ग॰ ॥ सैषापरिचितकथास्मरणाद्द्विगुणदुर्दशा
केशपिनद्धमपरमिदमभिज्ञानमुन्मुच्य ॥ प॰ ॥ चूडामणिं कपिवरस्य द
दौ दशास्यसंत्रासपूजितमहाग्निशिखं कृशांगी ॥ आदाय तं प्रणतिपूर्वम
सौ प्रतस्थे माणिक्यगर्भवदनोरगतुल्यबाहुः ॥ ३६ ॥ ग॰ ॥ ततः कृतकृ
त्य एव निर्गत्य निजागमनं निशाचरपतेः प्रकटयितुमशोकवनिकां प्रबभं
ज प्रभंजनात्मजः ॥ प॰ ॥ स्वकृत्यैः शाखानामवनतिमतीव प्रकटयन्न
मार्गेणभ्राम्यन्परिकलितभंगः सुमनसां ॥ द्विजानां संत्रासं स्फुटमधुर-
वाचां विरचयन्नयं लोको द्याने दशवदनलीलामतनुत ॥ ३७ ॥ ग॰ ॥ तद-
नुसरभससमारक्षिकरक्षोगणनिवेदितप्रमदवनकदनकुपितदशवदन- ६५

टि॰ ॥ १ शिरोरत्नं. २ वायुपुत्रः ३ वेदशाखानां तरुस्कंधानां च. ४ देवानां पुष्पाणां च. ५ महीसुराणां पक्षिणां च ॥

प्रेषितान्पितृपतिकिंकरभयंकरान्प्रहस्तपुत्रेणजंबुमालिनासहनिहत्यचैत्य
तोरणमुपागतवतिहनूमतिपुनरपिनिशमितामितनिशिचरगणमारणोराव-
णःसचिवान्पंचपंचाननपराक्रमान्प्रहस्तप्रमुखान्बलीमुखंजीवग्राहंगृ-
ह्णीध्वमितिप्राहिणोत्॥तत्रतानपिपंचतांनीत्वातोरणपरिघेणमुहुर्मुहुर्दा
शरथिदासोहमित्यात्मानमुद्घोषयंतंहनूमंतंनियंतुंनिखिलरक्षसामध्यक्ष
मक्षकुमारमाक्षिपत्॥प०॥ वक्षःसंघट्टचूर्णीकृतकनकमहाभित्तिचै-
त्योत्थधूल्यानक्षत्राणामकालेसरणिमरुणयन्वीरलक्ष्म्यासमेतः॥ रक्षः
शूराख्यशारान्क्षितितलफलकेक्षेपणीयान्हनूमानक्षक्रीडांविधातुंदशमु
खनगरीचत्वरेतत्वरेसौ॥३८॥ग०॥ तत्क्षणंक्षणदाचराणामनिमिषता
मेवनिष्पादिततदंगनिष्पेषकृत्यश्चैत्यप्रसादमुत्पाटितस्तंभजातंजातवेद
टि०॥ १ रावणस्ततःपाशांश्च.॥

सादग्धाभूयोप्युपाश्रिततोरणः समीरणस्ततोबभूव ॥ एनम[2]पिवृत्तांतं-
श्रुत्वाकुपितस्यपिशिताशन[1]पतेर्युगपदेवनिपेतुः पुत्रेस्तत्रोमजितिसमि
तिहेतोर्विंशतिदृष्टयः ॥ प० ॥ अनिमिषभुवनेवाव्योम्निवाभूतलेवास-
मरमुपगतंत्वांवीक्षितुंकः समर्थः ॥ इति[3]नुतिवचनेनश्लाघयन्मेघना-
दंप्लवगमिहनयेतिप्राहिणोद्राक्षसेंद्रः ॥ ३९ ॥ नेतुःशोकरसंनिशाचरपतिं
हंतुंचमूरक्षसांतस्यांतःपुरयोषितांरचयितुंमानंविनारोदनं ॥ सूर्याच्चंद्र-
मसोःप्रवेशविकलांलंकापुरीमग्निनाशुद्धिंकर्तुममुष्यवासवजिता-
जातु[4]तोरणस्तोरणे ॥ ४० ॥ संग्रामदुर्दिनेतास्मिन्नूजहर्षशरवर्षिणि ॥ बर्ही-
वमेघनादेनमेघनादेनमारुतिः ॥ ४१ ॥ ग० ॥ तदनुयातुधानप्रबलप्रधा-
ननिधनक्रुद्धोविविधायुधवैतथ्यंविमृश्यविजयश्रीसगंधंगंधवाहनंदनं

टि० ॥ १ रावणस्य. २ इंद्रजिति. ३ स्तुतिवाक्येन. ४ इंद्रजिताघनशब्देनच. ॥

स्यात्कानाम रामधनुषः प्रथिताप्रशस्तिः ॥३४॥ किंबहुना ॥ ग० ॥ इत्येतदेवं
चिंतितं यदर्हं राघवगृहिण्यास्तदेवनिश्चितं यत्सदृशमीदृशस्य समाचार-
स्यतदेव प्रकाशितं यदनुगुणं रावणापराधप्रतिक्रियायास्तदेवानुमोदितं य-
दनुकूलं कुलवधूशीलस्यतदेव कथितं यदुचितं क्षत्रियाणीवाणीक्रमस्ये
तिबहुशः प्रशंस्यसर्वथा रामलक्ष्मणौ लंकामिमां प्राप्तावितिजानन्किंजानी
हिजनमिमं मनुजानीहि प्रस्थातुं ॥ किंच ॥ काकुत्स्थेन विदितपूर्वं किम-
प्यभिज्ञानं दीयतामिति ॥ सातु दीर्घं निश्वस्य निश्चित्य पुरा खलु चित्रकूट
तटवने तरुणतर तरुरमणीयतया मंदीकृत नंदनवैभवे रघुनंदनोपधा
नीकृतोत्संगायाममपयोधरपरिसरे खरतरनखराग्रविरचितविदारणं धा
राधरनामानं काकं रघुपतिरवालोकयत् ॥ प० ॥ कुशरूपकुशेशयासना

टि० ॥ १ संस्तुत्य. २ स्तननिकटे. ३ ब्रम्हास्त्रं. ॥

जांतरालं ॥ छायात्मनाप्रतितरंगविराजमानसीतांशुमंडलसनाथमि
वांबुराशिं ॥ ४५ ॥ निश्श्रेयसः प्रणयिनीपदवीं निरोद्धुं त्रैलोक्यपापपरि-
पाकमिवात्तरूपं ॥ सूर्येंदुपावकमहांसितपोबलेनजित्वायथेष्टमभिषि
क्तमिवांधकारं ॥ ४६ ॥ सोपिप्लवंगममवेक्ष्यसमीरपुत्रंचित्रीयमाण
हृदयः पिशिताशनेंद्रः ॥ कैलासशैलचलनागसशापदायी नंदीश्वरः
स्वयमुपागतइत्यमंस्त ॥ ४७ ॥ ग॰ ॥ ततः प्रहस्तेनविहितविविधानुयो
गः प्रत्यभाषतरावणंमारुतिः ॥ अयमहमन्हामधिपतिकुलतिलकस्य
सत्यसंधस्यपितृनियोगसमुपनतवनवासनिरतस्यशूर्पकारातिबाधि-
तशूर्पणखाप्राप्तवैरूप्यस्यकुप्यत्खरप्रमुखनिशिचरबलपलालजा-
लकल्पानलकल्पशिलीमुखस्यकपटहरिणहननसमयसमुषितदारा

टि॰ ॥ १ प्रतिबिंबेन. २ पृच्छा. ॥

न्वेषणसंजातसुग्रीवसख्यसमुत्खातवालिकंटकस्य दुर्वृत्तक्षत्रवंशव-
नपवनसारथेस्तपोनिधेर्जामदग्न्यस्य भुजबलावलेपलोपहेतोः श्रीम
तो दाशरथेर्दूतोहं सीतामार्गमार्गणाय दिशि दिशि तपनतनयप्रेषिता-
नां वानराणां एकतमः समुद्रलंघनजंघालस्तव नगरप्रमदावनसी-
म्नि रघुवरधर्मदारान्प्रणम्य प्रतिष्ठासुर्मदीयमागमनं प्रकाशयितुं म-
थिताशोकवनिकानोकहनिवहस्त्वद्दर्शनकुतूहलेन केवलमनुभूतनै-
ऋतलूतातंतुसन्नहनस्तव परिसरमुपासरं ॥ प० ॥ आनाकलोकप-
रिकीर्तितसच्चरित्रमत्रोपरुध्य रघुवंशपतेः कलत्रं ॥ वैतानवेदिजनि-
तं पवमानबंधुं वस्त्रेण बद्धुमविनीत कथं यतेथाः ॥ ४७ ॥ प्रेरं वंतीपि-
शिताशयारणमुखे सौमित्रिपत्रिक्षतं त्वद्गात्रं परितः पतत्रिपरिषच्छत्र

टि० ॥ १ वेगवान्. २ ऊर्णनाभतंतुबंधनं. ३ अग्निं. ॥

छविंमागमत् ॥ द्राक्कपोलस्स्यपुलस्त्यवंशाविलयेसंभाविते त्वत्कृते कांता
नांनयनांतवांतसलिलंमाभून्निवापोदकं ॥ ४८॥ बद्धादरोपिपरदारपर-
गृहेत्वमिक्ष्वाकुनायककलत्रमनार्यमागाः ॥ वाताशनोहमितिकिंविनता
स्रुतस्यश्वासानिलायभुजगः स्पृहयालुतालुः ॥ ४९॥ बाहुश्चंदननिषंग
कोटरान्निर्गतोरघुपतेःशरोरगः ॥ प्राणवायुमविनीततावकंकालयापि-
नमपास्यपास्यति ॥५०॥ किंबहुना ॥ मायामृगेसमरनाटकसूत्रधारेशा
खामृगेचभवतःप्रतिकूलवाते ॥ दृष्टोद्यमस्यरघुनायकसायकस्यमुल्का
प्रणामकवचंकवचंकिमन्यत् ॥५१॥ एतन्निशम्यकुपितःपिशिताशने
द्रःप्राणानमुष्यहरतेतिभटानवादीत् ॥ आजन्मसिद्धमतिरत्रविभीषण-
स्तंदूतोनवध्यइतिशास्त्रगिरारुरोध ॥५२॥ग०॥रावणोपिबिभीषणभाषणा



टि० १ गलितं. ॥

चतुराननास्त्रेण बबंध दशकंधरात्मजः ॥ तेन दिव्यास्त्रेण विवशशरीरमे नं पिशिताशनाः शोणवल्कलैर्बबंधुः ॥ प० ॥ समारुतेर्नैर्ऋतपाशजन्मा बंधोभवद्बंधनमोक्षहेतुः ॥ पुरा पुलस्त्यान्वयपांसुलेन बंदीकृतानां सुरसुंदरीणां ॥ ४२ ॥ ग० ॥ तदनंतरमितरहननासहतया निजाद्भुतस्य दिव्यास्त्रस्य प्रभावं विभावयन्विभावरीचरपतितनूजः पवनतनयं निजपितृसमीपमुपनिनाय ॥ सोयं ददर्श दशकंधरमंधकारिलीलाद्रितोलनपरीक्षितबाहुशौर्यं ॥ बंदीकृतेंद्रपुरवारवधूकराग्रव्याधूतचामरमरुच्चलितोत्तरीयं ॥ ४३ ॥ ॥ आपाटलाधरपुटांतविराजमानदंष्ट्रामहः प्रसरशारशरीरकांतिं ॥ संध्यांबुदांतरितमध्यस्फुरधामयूखरेखाभिराममिव वासवनीलशैलं ॥ ४४ ॥ संग्रामकेलिपरिघट्टनमग्नभग्नदिग्दंतदंतकृतमुद्रभु

टि० ॥ १ शिवः २ तेजः ॥

मिनीचरगणंपरिचिततोरणपरिघेनजघान ॥ प० ॥ सीताभिधानकमलां-
प्रभवेप्रदातुंलंकार्णवंक्षुभितसैन्यतरंगभीमं ॥ वेधाममंथकिलरज्जुभु
जंगराजभोगावृतेनपवनात्मजमंदरेण ॥ ५५ ॥ ग० ॥ अथलंकायांदग्धमा
नायां ॥ प० ॥ रक्षस्स्त्रीवदनारविंदरजनीविश्वंभराबर्हिणीवर्षारंभदशांद-
शाननयशःकादंबकादंबिनीं ॥ वैधव्योचितवेषनिश्चितमनोलंकावं-
धूटीजटांवैदेह्यास्त्रिजटासमासमकिरद्धूम्यांहनूमान्दिवि ॥ ५६ ॥ अ
पिच ॥ एतद्विक्रमवीक्षणेनजनितामानंदबाष्पोद्गतिंरक्षोनाथभयात्पि
धातुमनसाविद्याधराणांतदा ॥ व्याजव्याहृतयेयथापरिणमेद्धूम्यातथा
जृंभतेस्वर्लोकेपिकलिंदशैलतनयाकल्लोलशंकावहा ॥ ५७ ॥ आदौनी
लांशुकश्रीस्तदनुमरकताबद्धनीवीविभूतिःकस्तूरीपंकभंगीक्षणम
पिविकचेंदीवरस्त्रक्सपत्नी ॥ पश्चात्स्निग्धांजनाभाजघनकुचतटीकं
टि० ॥ १ सदृशी ॥

ठनेत्रेषुजातादिक्कांतानांतदानींदशमुखनगरीदाहसंभूतधूम्या ॥ ५८ ॥
हातातहाजननिहास्कृतहासहायहापुत्रिहाप्रियसखिक्कनुहाहतोस्मि ॥ इ
त्यादिपौरपरिदेवनभारवाग्भिरापूरिरावणपुरीशिखिनापरीता ॥ ५९ ॥-
यैर्द्दंदारकसुंदरीजनमुखेनीराजनंनिर्मितंनिर्मेघेगगनेपियैर्विरचिता
सौदामिनीसंहतिः ॥ तेहित्राण्यपिवासराणिनगतानिर्वाणमौर्वानल -
ज्वालाडंबरमंबुधौविदधिरेवालानलोद्यल्कणाः ॥ ६० ॥ आदीप्यमान -
पवनात्मजवालसंगादंगारशेषविभवामवलोक्यलंकां ॥ व्योम्निस्थितानि
शिचराःस्वगृहाणिनूनंनिर्वापयंतइवनेत्रभवैःपयोभिः ॥ ६१ ॥ चक्रेशक्र -
जिदाज्ञयारणमुखेयत्कर्मरक्षोगणस्तत्कर्तुंक्षणदाचरक्षितिभृजाप्युक्तो
प्ययुक्तोभवत् ॥ सप्तार्चिश्चहनूमतापरिचितोलंकामधाक्षीद्यथातस्मि-
टि० ॥ १ धूमसमूहः ॥

त्रामरुतोयुतोपिनतथादाहक्रियायांपटुः ॥ ६२ ॥ तस्मिन्हनूमदरणिप्र
भवेहुताशेशुद्धिंविधायपतिमेवसमेतुमैच्छत् ॥ लंकेश्वरेणरणकेलि-
कुतूहलेनबाहोर्बलादपहृतासुरराजलक्ष्मीः ॥ ६३ ॥ वाचामिदानींकि
मुविस्तरेणलंकापुरींरावणबाहुगुप्तां ॥ काकुत्स्थदूतोयमुपेत्यचक्रे-
कृतांतदूतस्यसुखप्रवेशां ॥ ६४ ॥ पौलस्त्यपातकिसमागमजायमा
नमेनःपुनानइववानरयायजूकः ॥ निर्वर्तिताक्षविजयोनिजवालव-
न्हौहुत्वापलाशसमिधःसुगतिर्बभूव ॥ ६५ ॥ लंकादाहेप्यनार्तोरघुप
तिदयितांचारणोक्त्याविदित्वासानंदस्तांप्रणम्यप्रतिगमनविधौप्रा
प्यतस्यानियोगं ॥ आरुह्यारिष्टशैलंनिधिमपिपयसांस्वैर्यमुत्तीर्यवे-
गाच्चक्रेगत्वामहेंद्रंप्लवगबलपतीन्पूर्णकामान्हनूमान् ॥ ६६ ॥ ग० ॥

टि० ॥ १ रावणपुत्रः इंद्रियंच. ॥ २ राक्षसः किंशुकवृक्षश्च. ॥

मंगीकृत्यप्लवंगमानामंगेषुलांगूलमेववरं ॥ तदेवकार्पासवासस्सासंवी
तंवीतिहोत्रसात्कृत्यचत्वरेचत्वरेदोषानुद्धोष्यसप्रहारंनगरंपरितःसंचार
यतेतिराक्षसानादिदेश ॥ तेषुतथाकुर्वाणेषु ॥ प० ॥ निर्णयाविषयमस्यवाल
तः कर्णिकारनिकुरंबकर्बुरः ॥ निर्निमेषगणभाग्यसंचयादुन्निमेषमगवा
नुषर्बुधः ॥ ५३ ॥ ग० ॥ एतद्वृत्तांतमारक्षिकराक्षसीगणेनगर्वोदीर्णवर्णित-
माकर्ण्यदूयमानमानसाजानकीहुताशनमुपस्थायहनूमतःशीतोभवेति-
प्रांजलिःप्रार्थयत् ॥ प० ॥ घोरस्यराघवकलत्रतपोमयाग्नेर्माभूवमिंधनम-
हंक्षणमित्यवेत्य ॥ शैत्यंवितत्यदहनःपवमानसूनोर्वालाग्रसीम्निमणि-
दीपइवावतस्थे ॥ ५४ ॥ ग० ॥ तदनुपवनतनयोपिपुरमिदंनखलुसम्यक्
नक्तमालोकयं ॥ तस्मादनलसाक्षिकमेवपुरमखिलमालोकयामीतिया-

टि० ॥ १ देवसमूहः ॥ २ अग्निः ॥

स्तनुविकृतिमतनुत ॥ तदभिमुखागमननिमित्तसंपत्तिं ॥ प॰ ॥ आरुह्या-
द्रिमथावरुह्यविपिनान्यास्वाद्यनानाफलान्यास्फोट्यप्लुतमारचय्यव-
दनैरापाद्यवाद्यक्रमान् ॥ आलिंग्यद्रुममंकमंमदवशादाधूयपुच्छंच्छटा
मारादाविरभूद्दहंप्रथमिकापीनाकपीनांचमूः ॥ ६९ ॥ निद्राक्षयादरुणिते
नसमीरपुत्रःसौमित्रिनेत्रयुगुलेननिपीयमानः ॥ चूडामणिंकरतलेकल
यन्ववंदेपादारविंदयुगुलंभरताग्रजस्य ॥ ७० ॥ अक्लेशसंभूतगतागता-
भ्यांनिस्तीर्णविस्तीर्णमहार्णवोपि ॥ आनंदसिंधौपृतनासमक्षमक्षस्यहं
तानितरांममज्ज ॥ ७१ ॥ आनीतचूडामणिसन्निधानादाविःप्रमोदेनर-
घूद्वहेन ॥ तत्रानुयुक्तःपवमानजन्माविज्ञापयामासकृतप्रणामः ॥ ७२
॥ लंकापुरोपवनसीमनिराजपुत्रीमालोकयंनिशिचरीगणबाध्यमानां ॥ के ७१
नापिपातकवशेनसुपर्णलोकेबंदीकृतामिवफणिजंगमराजकन्यां ॥ ७३ ॥

देव्यास्त्वदीयान्वयकीर्तनेनत्वन्मुद्रयाचव्यपनीयशोकं॥वार्तामभिज्ञान-
मयीमयाचंप्रस्थातुकामःपरिपूर्णकामः॥७४॥ब्रम्हास्त्रवित्रस्तजयंतक्त
त्यांकथमभिज्ञाप्यवनेप्रवृत्तां॥चिरंरुदंत्याजनकेंद्रपुत्र्याचूडामणिःप्रे-
षितएषतुभ्यं॥७५॥किंबहुना॥देवतस्याःप्रतिष्ठासूनसूनाशोकपालिता
नू॥मुद्रयित्वाप्रपन्नोहंत्वदभिज्ञानमुद्रया॥७६॥ ॥इतिश्रीविदर्भराज
विरचितेचंपूरामायणेश्रीमत्सुंदरकांडःसमाप्तः॥ ॥अथयुद्धकांडः॥
॥ ॥प॰॥दृष्टेयत्रयदृच्छयापिवचसांदेवीपुरोवर्ततेसारस्यंमहदम्बु
देतिसदसिप्रागल्भ्यमुज्जृंभते॥जायंतेसकलाःकलाअपिनृणांजाग-
र्तिकीर्तिर्नवान्वेतःस्निह्यतुतत्रदेशिकपदांभोजेचभोजेमम॥१॥भोजे
नतेनरचितामपिपूरयिष्यन्नल्पीयसापिवचसाकृतिमत्युदारां॥नव्री-
डितोहमधुनानवरत्नहारसंगेनकिंनहृदिधार्यतएवतंतुः॥२॥मुद्रामु-

चं॰रा॰ ७२

द्रितजीवितांजनकजांमोहाकुलंराघवंचूडारत्नविलोकनेनसकविरंनि- ध्यायनिध्यायच॥प्रारेभेहृदिलक्ष्मणःकलयितुंपोलस्त्यविध्वंसनंधीः पूरयितुंकथांचविमलामेकेनकोडेनसः॥ ३॥ आनंदमंथरमनंत- रमांजनेयादाकर्ण्यवृत्तिमनघांजनकात्मजायाः॥ दृष्टिर्दशाननरुषा परुषायमाणाबाणासनोपरिदधेप्रभुणारघूणां॥ ४॥ ग॰॥ अथसुग्री- वोपिदशग्रीवकुपितराघवावलोकनद्विगुणीकृतरणोत्साहःसाहायकम नुपालंभेत्नंधुमिवसिंधुमवधार्यधार्यमाणधैर्यावगाढमतिः॥ अधि- रूढत्रिकूटशिखरांलंकामधिगंतुमंगदकुमुदनलनीलप्रमुखमपिवली- मुखानीकंसमनीनयत्॥ प॰॥ वारिदादपिनुरामनामतःपूरितापुनरपां गधारया॥ तत्क्षणंप्रतिचचालदक्षिणंवाहिनीशमखिलापिवाहिनी॥ ५॥

टि॰॥ १ सौमित्रिःतन्नामाकविश्च. २ बाणेनग्रंथेनच. ३ कूपं. ४ रावणंसमुद्रंच. ५ सेना- नदीच.

अथयथार्हं सैन्याधिपान्संमान्य मारुतिरेतैरनुयुक्तः स्ववृत्तांतमखिलमा ख्यातवान् ॥ तदनुपवनतनयवचनमुदितावानरवरूथिनीयूथनाथानु याताततद्दर्शनजनितमानंदंदाशरथ्योस्सुग्रीवेचसंविभज्येवविवक्षितुं ॥ अह महमिकयाधावंतीमध्येसरणिदधिमुखकृतावनंमधुवनंहनूमदनुमत्या भिभूयमधुपानसुखमनुबभूव ॥प॰॥ अथाब्रवीद्द्विरदवरतुंगमंगदंकृतां जलिर्दधिमुखएषरोषवान् ॥ वलीमुखान्मधुभजनेशिलीमुखान्भवानि मान्झटितिनिवारयेदिति ॥६७॥ ग॰॥ अयमप्येनमवोचत् ॥ प॰॥ दशमु खपुरमध्येवीक्षितामैथिलीतिश्रवणमधुवितीर्णंयेनवीरेणमह्यं ॥ दधि मुखयदिसोयंभाषतेकोनिरुध्यान्मधुपिबतुयथेष्टंवाहिनीवानराणां ॥ ६८॥ ग॰॥ तदनुभयविवेशसमुनतदधिमुखवचनविदितमधुवनकद नपरिभणितजनकदुहितृदर्शनजनितप्रमदभरभरितस्स्तपनतनय-

टि॰॥ १ सुग्रीवः॥

॥अमीतटसमीपनिर्झरतरंगरिंखत्पयोजडीकृतपटीरभूरुहकुटीरसंसा-
रिणः॥मनोविधुरयंतिमे मलयमेखलामेदुरादुरासदवनप्रियप्रियतमारुता-
मारुताः॥८॥इत्यालपन्करुणमेषनिरुद्धवेलं शैलेमहेंद्रमधिगम्यमहीमहें-
द्रः॥आवर्तमुद्रितमिवान्वयभूपतीनामक्षय्यकीर्तिनिधिमंबुनिधिंददर्श॥-
९॥ग०॥दृष्ट्वाचतमद्भुताकृष्टमनारामस्तदिदमाचष्ट॥प०॥द्रष्टुंनालम-
गाधतांफणिपतिःसीमांतरेखादिशोद्वीपाःसैकतमंडलानितदयंदूरेगिरां-
वारिधिः॥येषामेषसगरवादखानिनखरैर्येनाथवापूरितस्तेषांनःकुलभूभु-
जामविहतस्थेम्नेमहिम्नेनमः॥१०॥ग०॥अथहरींद्रोपिमहेंद्रोपांतकांतार-
शोभिनिलोभनीयमलयबालानिलेवेलावनप्रदेशे॥दाशरथेर्निदेशेननिवे-
शयामासबलमखिलं॥प०॥सरसपटीरकुंजवनसंजवनाभिपतन्मृगमद

टि० ॥१स्थिरत्वाय.२मंदानिले.३चंदनं.४सभा.॥

गंधगंधवहमेदुरितेजलधेः॥ तटनिकटेदरस्फुटिततालरसालफलैरुदितम
दाविन्चेरुरुदरंभरयोहरयः॥११॥ग०॥अनंतरमपरमिवचलितंमहांभोधि
मंभोधिरोधासिकृतसंवेशंरोदसीलंघनविस्रंस्वललाघवंराघवानीकम-
नीकोन्मुखंचारमुखादवधार्यधार्यमाणहृदयांतकः पंकलीनचरणइवैरा-
वणोरावणोविधेयंपरमजानन्जानकीमप्यविमोक्तुकामः कामपरतं-
त्रितोमंत्रिभिःसमंसमाजमाजगाम॥प०॥रहस्तदानींरजनीचरेंद्रः प्रह
स्तपूर्वानिदमाबभाषे॥ इदंतुमेवांछितमीक्षितंवोवदंतुयद्वैरिजयोचि-
तंनः॥१२॥ग०॥अमीचपुनराशयज्ञाविज्ञापयामासुः॥देवजीवत्सु-
भवदाज्ञापरेष्वनुचरेषुपरमास्मासुकस्मादयमवापोदुःखापोरुभुज-
पंजरानीतांसीताजातुनजहातुनाथइत्याभिदधानेषुप्रधानेषुरंभोपहि
तहटात्कारसंभवमंभोजसंभवशापमंतरायमावेदयंतंदुर्नयंतमग्रज

न्मानंसंमानयन्विनयविज्ञानभूषणोबिभीषणः सरोषमिदमवादीत्॥
प॰॥अहहविधिनियोगादद्य नक्तंचरेंद्रत्वमसिपरकलत्रेदुर्निवारानुरा
गः॥अरुणदवशिखायामामिषग्रासमोहादविरत कृतजिह्वाचापलःके
सरीव॥१३॥आकर्ण्यकिन्नरमुखवादनघेस्ववंशेकाकुत्स्थदारहरणो
पनतंकलंकं॥हाहेतिमीलितदृशःकरयोर्युगंतदष्टौश्रुतीरपिदधातुक
थंविधातुः॥१४॥पश्येदानीमुदधिपरिखापालिताकुत्रलंकावाचातीतः
क्वनुवनचरादागतोदुर्विपाकः॥कर्तुंनक्तंचरपरिभवंकापिमायैवशंके
जातासीताधरणितनयाजानकीमैथिलीति॥१५॥किंबहुना॥नगण
यसियदित्वंवानरंवानरंवानन्नुपरिचितवीर्योजिष्णुभूकार्तवीर्यौ॥न-
कलयसियदित्वंनंदिशापंचधातुर्वरमपिनरवर्जंदुर्जयोदैवयोगः॥१६॥

टि॰॥१ कर्णान्.॥

ग०॥ ततःक्षणेनसम क्षचलितऋक्षसमुदायेकुमुदामोदकारिणिशरभा-
धिकप्रसादशीलेनीलेंदीवरानंदिनिदशाननदिशाक्रमणव्यग्रतेजसिसमा-
रूढतारोनंदनलक्ष्मणानुगतेसरभससमुदयसानुमंतमिवहनूमंतमधिरो
हतिनिशाचरतिमिरहरणनिस्तंद्रेरामचंद्रेसमंततः कंदलितबहुलहरिजा-
लकोलाहलभरितहरिदंतरोनिरंतरास्कंदितनिकटकांतारावलिर्वलीमुख
बलमहांबुधिःससंभ्रममुदजृंभत ॥ प० ॥ उत्रासकासरमुदंचितपंचवल्कं
वित्रस्तहस्तिविशरारुचमूरुयूथं ॥ आलोललोचनतरंगकुरंगशावमासीद-
सीमविपिनंकपिनर्मघोषैः ॥ ६ ॥ सैन्यैस्ततोरघुपतिःसरितांनिवेशंवेशंत
यन्विरलयन्विपिनांतराणि ॥ आरुह्यसह्यमपिशैलमसह्यवातंमंदानिलैक
निलयंमलयंजगाम ॥ ७ ॥ ग० ॥ गत्वाचतमद्रिंसौमित्रिमिदमवादीत् ॥ प०

टि० ॥ १ अंगदः बुधश्च ॥

स्तत्तनुजोथवारिपोः करुणापदं हि शरणागतोजनः ॥ १८ ॥ ग॰ ॥ तदनु
हृदयविदा हनूमता सरयमानीतो विनीतोयसं रमापतिरवंदत दाशरथिं ॥
प॰ ॥ रामस्तमाह विनतं रजनीचरेंद्रं दत्तं तदद्य भवते दशकंठराज्यं ॥ अ
स्मिन्नुदाहरणमग्रजराज्यभोक्ता सानुप्लवः प्लवगमंडलसार्वभौमः ॥-
१९ ॥ श्रेयः पदात्पदमुदेति विधेः प्रसादादाम्नायस्तदद्य फलितं हि बिभीषणे
यत् ॥ रेखातपत्रसहितं पदमस्य गृण्हन्नेकातपत्रसहितं पदमेष भेजे
॥ २० ॥ ग॰ ॥ असौ पुनरग्रत एव भरताग्रजापांगस्रुधातरंगाभिषिक्तोपि
पुनरुक्तराज्याभिषेकः सकलविस्रंभभाजनतया स्रुग्रीवङ्वापरो दश
ग्रीवबलमखिलमावेद्य सद्य एव लंकापुरसमास्कंदनाय सेनासमुत्तर
णहेतुं सेतुं विधातुमाराधयतु वारान्निधिमिति सविनयमेनं विज्ञापितवा- ७५
टि॰ ॥ १ बिभीषणः ॥ २ स्रुग्रीवः ॥

न्॥ प०॥ अथवारांनिधिंध्यायन्नंभोधिहृदयेशयः॥ ध्यानशेदर्भशयनं
वेदीमिवहुताशनः॥२१॥ ग०॥ तत्रकुशास्तरणमध्यमध्यासिनेनिध्यान-
वतिदेवेरामचंद्रे॥ नियंत्रितइवनियतिवशान्निशात्रयमपिप्रसादंनाससा
दयादसांपतिः॥ प०॥ व्यापारयन्नथविलोचनकोणमब्धौकोपारुणंकु-
टिलितभ्रुकुटीविटंकः॥ आदातुमैहतधनुःप्रथमोरघूणांपैतामहप्रथम
सर्गसमापनाय॥२२॥ ग०॥ आदायचदुरापंचापमारोपयतविशिखमन-
नलशिखं॥ प०॥ नाथोविमोक्तुमुदयुंक्तनयावदेवपाथोनिधेरुपरिपा-
वकरूपमस्त्रं॥ संतापिनीनयनवारिमिषेणताम्यन्मंदाकिनीकिमुत-
वारुणमालवंबे॥२३॥ रुषाविशिखमुच्छिखंजहतिराघवेलाघवाद्जा-
यतरुजायतश्वसितनक्रचक्राकुलं॥ रसातलवलत्तिमिस्तिमितकुंभिकुं
टि०॥ १ दैवं. २ समुद्रः॥

चं.रा. भीनसप्रविष्टगिरिकंदरांतरलमंतरं वारिधेः ॥२४॥ग०॥ तत्क्षणंजल- यु.कां.
७६ निधिःक्षंताच्युगांतानलस्यसहनोपिगरलदाहनोष्मणांसोढापिवा ६
डवगाढावलेपस्यतितिक्षुरपिभार्गवतीक्ष्णपरशोःपरिशोषयंतमंतः-
रंगमंगारमयंशरमयंनिमिषमपिनविषेहे॥प०॥शरणमथशरव्यथा-
निदानंजलनिधिरेषजगामराममेव॥परुषकुलिशपातमेवकिंवाजल-
धरमर्थयतेनजीवलोकः॥२५॥ग०॥आगत्यचानुपदमुपदीकृतनूतन-
रत्नराशिर्वारिराशिर्विनीतवेषोविशेषोपजातनुतिभिर्नुतिभिरभ्यनंद-
यद्रघुनंदनं॥तदनुतदनुसंहितममोघमस्त्रंवैधात्रंकुत्रचनवनसीम-
निविनिपात्यसाध्यतेमयासलिलविष्टंभः संप्रत्येवनलोविदधातुसेतु-
मित्यभिदधानोमंदमंदमंतरधात्॥प०॥आदिष्टारघुपुंगवेनहरयोप्य- ७६

टि०॥ १ स्तुतिभिः २ ब्रम्हास्त्रं॥

ग०॥ इत्यादिनीतिसहितंहितम[1]भिहितवंतंनिजमनुजमवज्ञायज्ञातिरयं
अरातिपक्षःशिक्षणीयइतिशंसंतंनृशंसंतम[2]रुंतुदरोषणभाषणोबिभीष
णोविहायविहायसिसमुत्पतंतमनूत्पतद्भिश्चतुर्भिरमात्यैःसममतीत्यवा
रिधिंदूरतएवसवितर्कमुद्ग्रीवान्सुग्रीवादीनंतरिक्षगतएवमाचचक्षे॥ प०
॥ पौलस्त्यम[3]ग्रेजनुषंपरुषंचरंतंसंत्यज्यबांधवजनंचबिभीषणोहं॥ रा-
मंविराममिहविद्विषतामवापमापन्नदैन्यहरणंशरणंममेति ॥१७॥ ग०॥
अनंतरमतिकरुणंसमीरयंतंसमीरभूवाचसप्रत्यभिज्ञविज्ञापितंनिशा
चरपतेरनुजंनिशम्यतदातदागमनायकिंकारणमितिशंकापरवशोनिवेद
यतिहरीशेदाशरथिरपिदयमानस्स्मयमानोमधुरमिदमभाषत॥ प०॥ अभ
यागतोयमपयातिचेन्मुधाराघवोभवतिलघवोनकिंसखे॥ अनुजोयम-
रि०॥ १ भाषमाणं. २ मर्मस्पृक्. ३ अग्रजन्मानं.॥

रामः ॥ कपिकलकलशीर्यत्कंदरामंदिरांतस्स्खलितकुपितसिंहत्रस्तवेलंसु 
वेलं ॥ २९ ॥ ग० ॥ तदनुदशमुखः शुकमुखादतिलंघितजलधिमधिगत-
सुवेलं रामं रामं निशाम्यसम्यगवगमनाय रघुनायकबलमनुप्रहितयो-
र्विदितवेषविभीषणावेदितकुपितकपिलोकनियंत्रणनितांतखिन्नयो-
र्विपन्नाधारदाशरथिविमोचितप्राणयोः शुकसारणयोर्वचसा प्रासादा-
ग्रमासाद्य प्रत्येकशस्तदावेद्यमानान्प्रवर्धमानसमरसन्नाहमतीप्लवंग
मसेनाधिपतीनतिधीरतया सावधीरणमवेक्षमाणः प्रतिपक्षबलप्रशं-
सिनौ तावुभावप्युपेक्षमाणः शार्दूलप्रभृतिभिः प्रणयिभिरप्यवगताशेष
वृत्तांतः सांतस्तापः सुचिरमनुचिंतयन्नंतिकासीनमतिविनयप्रह्वं विद्यु
ज्जिह्वमुपह्वरे किमप्यभिधाय सोधादवततार ॥ तत्क्षणं क्षणदाचरोपि- 

टि० ॥ १ उपवनं. २ एकांते. ॥

निदेशान्निशाचरपतेर्दाशरथिशिरः सशरं धनुरपि निर्माय मायानुभावादा-
हृत्वानीतमित्यभिधाय निधाय च पुरो निदाघातिशयसंतापिनीं वासंतीमिव
वैद्युतानलश्चिरकालविह्वलामाकुलीचकार मैथिलीं ॥ ततः प्रबुद्धा च मु-
ग्धा पुनस्तथ्यमिति विचार्य तदनार्यपर्यदेवयत पतिदेवता ॥ प० ॥ रक्षोव
रोधवसतिं रजनीचरीणां रक्षोपरोधमपि रावणभर्त्सनं च ॥ सर्वं सहे यदुप-
लंभधिया स एवं सर्वंसहे भवति जीवति हंत सीता ॥ ३० ॥ ग० ॥ एवमत्याहि
तमत्यासमेता मेतामासाद्य सखि वैदेहि वैदेहि वचः कथमियं तव
दीना दशा दशाननकृता मायाहि मायाहि मनसि वैधुर्यं निखिलजगती
धुर्यभुजबलाभिरामे रामे किमिदमनार्यमविचार्यमित्यभिदधाना नवीना
सारनिष्यंदिनी कादंबिनीव घर्मोद्वेगिनीं केकिनीं सरमाचिरमाश्वासयामास ॥ प० ॥ अथ निगदितनीतिं मुंच मुंचेति सीतामविरतरणकंडूभीष-

णोरावणोयं ॥ मनसिनबहु मेनेमंत्रिणंमाल्यवंतं दिविपरममरीणांमंडलं
माल्यवंतं ॥ ३१ ॥ ग॰ ॥ अथरामोपिकामोचितवेषविभीषणामात्यविदि-
तरक्षोनगररक्षोदंतोद्दंतोपजातसमरसंरंभूविधिरंबुधिमेखलालंका-
रमणेर्लंकायाः प्राग्द्वारस्थायप्रहस्तायपर्यस्तोहितप्राणानिलंनीलं द-
क्षिणद्वाररक्षिणोर्महोदरमहापार्श्वयोर्विश्वत्रयविजयधौरेयंतारेयं
प्रत्यग्द्वारपालनाधिकृतेपाकशासनजितेपराक्रममिवतनूमंतंहनू-
मंतमंतर्व्यूहविहितरक्षायविरूपाक्षायरक्षः प्लवंगमऋक्षाधिपती-
न्प्रतिनिधीन्विनिधायविधायचसज्जंधनुरनुजेनसमंसमीकाभि-
मुखेनदशमुखेनगुप्तमुत्तरंगोपुरमुत्तरंगोबलैरुपरुरोध ॥ प॰ ॥ अत्या
कुलांहरिबलैरवलोक्यलंकांदत्तार्गलेषुदशकंधरकिंकरेषु ॥ आरक्ष-
टि॰ ॥ १समूहं. २मालायुक्तं. ३शत्रुः ४ अंगदं. ५मूर्तिमंतं. ॥

ष्टास्कदिक्कक्षणात्त्रैलोक्यांचितमूलमध्यशिखरान्धात्रीधरानाहरन् ॥ यैः-
क्षिप्तैः सलिलेनलेनजलधिर्यातोपिजंबालतांनिर्गच्छत्यचिरायनिर्झरपयः
पूरैः प्रपूरैः पुनः ॥२६॥ अथजलधौनिपेतुरतिदूरनिपातदलज्जलचरदत्त-
जीवनवगंधमहौषधयः ॥ स्फुटितधराविराजदहिपुंगवफूत्करणाक्कभित-
गुहागृहासिकमहाहरयोगिरयः ॥२७॥ अलक्षितमहीधरग्रहणमस्फुटक्षे
पणंविचित्रघटनंततोविरचितोनलेनामुना ॥ अबोधिहरियूथपैरधिपयोधि
सेतुर्महान्भ्रुवोभ्रजइवाभवन्निजतनूभ्रुवोलंभयन् ॥२८॥ ग०॥ अनंतरं-
अंतर्मुखाइववलीमुखाः प्रबोधेनेवसेतुपथेनसंसारमिवदुस्तरंतैरणिपति
मतीत्यसद्यएवप्रकाशंगिरीशंसुवेलमवलोकयंतोमुकुरविंदंतमहांतमानं
दं ॥ म० ॥ वलयिततटदेशौर्वाहिनीनांनिवेशैरविरलवनरेखामध्यमध्यास्त
टि० ॥ १पर्वतान् . २ ज्ञानिनः ३ समुद्र. ॥

लिशाग्रैरुद्दीर्णविशालवक्षःस्थलफलकमानीलतमालसच्छायमाच्छा-
दिताभिनवलोहितपटमापाटलसंध्यारागबंधुरंकंधरमिवददर्शदशकंध-
रं ॥ प० ॥ कोपादुत्पतितस्तदाहरिपतिःकोटीरमुत्पाटितंचक्रेनैर्ऋतनायक-
कस्यस्फुटदृढीचक्रेचवैभीषणं ॥ युध्वाचप्रथमावमानकुपितेनैतेनबुध्वा
ततोमायामस्यजगामकोमलगुणग्रामंसरामंपुनः ॥ ३३ ॥ ग० ॥ ततस्त
त्साहसोपलंभविधिनादाशरथिनासमामंत्र्यमंत्रिभिःसममादिष्टःसा-
धिष्ठभुजशौर्यशालीवालिनंदनःसलीलंसालमुल्लंघयन्लंकांप्रविश्य-
नृशंसमितिशशंसनिशिचरपतिं ॥ प० ॥ सोहंप्लवंगमपतेस्तनयस्त्वदी
यनिश्वासरोधिनिजवालधिमंडलस्य ॥ कालस्यदूषणखरत्रिशिरोमुखा
नांपौलस्त्यमांरघुपतेरवधेहिदूतं ॥ ३४ ॥ रक्षःपतेरघुपतेर्नयनंतृतीय-

टि० ॥ १ जलधरं . २ किरीटं ॥

मास्कंदनीयमितिहामनुषेकलत्रं ॥अंभोजमित्[1]यलिकसंभवमक्षिशंभोर्मंदा
किनीमधुकरस्तपथामदांधः ॥३५॥ किंच ॥एकंहैहयसंभवात्परिभवान्-
म्लानंद्वितीयंपुनर्दैत्येंद्राविनयात्तृतीयमपिमेताताहिताद्वैकृतात् ॥इत्थंत्व
च्चरितैःपितामहमुखान्येकंविनैवाभवन्तच्चैकंनविधेहिदाशरथयेदेया
त्वयामैथिली ॥३६॥ कौबेरस्यतुपुष्पकस्यहरणंकैलासविक्षेपणंदिक्पा-
लाक्रमणंचजल्पसिमुहुःकिंवायशस्तावता ॥ चेषंसंयेमिनोविधायकिज
नेदेवींवनेजानकींवेगादाहरतात्वयाद्यरचितांवीरव्रतस्योचितं ॥३७॥
किंबहुना ॥पूजोपहाररचनायपुरापुरारेश्छिन्नेषुमूर्द्धसुनवस्ववशोपि-
तंयत् ॥देवस्तदद्यकुतुकीदशमंशिरस्तेरामोबलिंरचयितुंरणदेवतायै ॥३८
॥ग०॥ एवमरुंतुदभाषणरोषणेनरावणेनगृह्यतामयंनिगृह्यतामितिसर
टि० ॥ १ ललाटं . २ संन्यासिनः ॥

यमादिष्टानालंबितभुजप्रकोष्ठानाशरांश्चतुरश्चतुरोयंभुजंगानिवविहंगा-
धिपोगृहीत्वाभुविनिपात्यचैतान्पादाहतेनप्रासादशृंगमपिभिंदन्नविद-
न्नात्मानःप्रतिरथंपंक्तिरथभुवोविवेशानिवेशं ॥ प॰ ॥ रघुतनयस्ततोवि
दितरावणदुर्विनयःकुपितमनामनागिवदधेकुटिलांभ्रुकुटिं ॥ अथपरि-
वव्रुराशरपुरंहरयःसरयंयुगविगमेयथायुगपदंबुधिमो र्वशिखाः ॥ ३९ ॥
ततोमदपरिप्लवप्लवगवीरसंरंभणक्षणक्षुभितकौणपप्रकरपाणिको
णाहतः ॥ २ वैरधिकभैरवैरुपरुरोधरोधोंतरंतरंगितघनाघनस्तनितबं
धुभिर्दुंदुभिः ॥ ४० ॥ ग॰ ॥ तेनचसमंततःकंदलयतादलयतेवजगंतिदुंदु
भिनिर्घोषेणरोषेणचप्रेर्यमाणाःकेसरिणइवगिरिकंदरान्मंदिरान्निर्गत्य
गत्यंतरायसंधायकान्यपत्यानीवानिमित्तान्यनवलोकमानाविमाना-

टि॰ ॥ १ रामस्य. २ विघ्नः ॥

केस्त्वरितमंतकराजधान्यामुद्घाटिताभिरुद्भाविकवाटिकाभिः ॥ ३२ ॥ ग० ॥
तत्क्षणंचलक्ष्मणाग्रजः सुग्रीवेणसहस्रुवेलाचलकूटमधिरूढस्त्रिकूटाव
नीधरचूडामणिंसिंहलद्वीपकमलकर्णिकांनिर्माणकौशलीविश्वकर्मणोनि
वेशदरींनिशाचरहरीणांअनारतबंदीकृतामरपुरंध्रीबाष्पनदीमातृकोप-
वनसीमांतांसीमांतरात् निरंतरसेवासमागतदिक्पालमा तंगमदांबुपंकि
लबाह्यांगणोत्संगांलंकामवलोकमानस्तत्रैकत्रसमुन्नतंसौधमधिवसंतं-
संतमसमिवसदेहबद्धमंतिकचरोदस्तविमलमुक्तातपत्रमिषात्सतारके-
णविभावरीपतिनेवसेव्यमानंवैमानिकवधूविधूयमानचामरद्वंद्वशोभि-
तमभितश्च्वलितमंदाकिनीपरीवाहमिवांजनाचलमखिलजगद्विजयवर्णा
वलीमतिनिर्णायकैरनेकविधसमीकाभिघातमग्नभग्नैरावणविषाणकु-
टि० ॥ श्रृंग. ॥

मस्तोभयंतरक्षोभटाः ॥ प० ॥ ततोधुतनखायुधस्तरुपरित्रुटत्तोमरः शिला-
निहतमुद्गरः शिखरिभिन्नमत्तद्विपः ॥ स्वपक्षविजयैषिभिर्दिविसकरास्फैररा
कुलैरलक्षिहरिरक्षसामतिभयंकरः संगरः ॥ ४१ ॥ ग० ॥ क्रमेणचकुपितकपि
वीरविदूषितनैर्ऋतभुजप्रतापानलइवास्तंभजातिभगवतिभानुमतिमथि
ताक्षधयातुधानगलनालप्रणालीपरिवाहिलोहितनदीपूरइवविदूरमंतरित
हरिदाभोगेसंध्यारागेविक्रांतहरिनखाक्रांतदंतावलविपुलकुंभस्थलमुक्त
मुक्ताकलापइवावियतिविजृंभमाणेतारागणेरणरभसचलितरथगजतुरग-
पदातिपादाहतविश्वंभरांतरालजेनुषिरजसीवक्षवनमास्कंदतितमसिताम
सीचरेष्विवसशोकेषुचक्रवाकेषुदाशरथिबलइवप्रमदाकरेकुमुदाकरे ॥ प०
आसारधारांप्रकिरन्शराणामाश्वासयन्मानसमाशराणां ॥ वीरोहरीन्संय

टि० ॥ १ जन्मनि. ॥

तिमे[1]घनादोविव्याधहंसानिवमेघनादः ॥ ४२ ॥ रणेतदनुदारुणेरभसमंगदो-
रावणेर्द्रुमेणमहताहतश्लथधुरीणयानव्रजं ॥ शितेनशतकोटिनाशिखरिकू
टमिंद्रोयथाममाथचरथंमनोरथमपिक्षणाद्रक्षसां ॥ ४३ ॥ वियत्तलेतदनु-
विलीयमाययासलक्षयन्रघुतनयंसलक्ष्मण ॥ अजिम्हगानधिगतजिम्ह-
गाकृतीनमर्षतःसमितिववर्षरावणिः ॥ ४४ ॥ लक्ष्मणानुगतंरामन्चंद्राहुभ
यंकराः ॥ बबंधुर्दारुणतमाबंधच्छिदममीशराः ॥ ४५ ॥ यावद्यातिपुरंपुरंद
रजयीयावद्दशास्याज्ञयासीतापुष्पकवासिनीरघुसुतौदृष्ट्वापुरःशोचति ॥-
तावत्तेगलिताःसुपर्णगरुतांवातेनवाताशनादीप्तौचंद्रदिवाकराविवतमो-
मुक्तौततोराघवौ ॥ ४६ ॥ दुर्वारेतदनुद्वयोश्चबलयोरुज्जृंभमाणेरणेधूम्रा-
क्षंभञ्जतःप्रकंपनमथद्रुधाव्यधान्मारुतिः ॥ तारेयोपिचवज्रदंष्ट्रमन्चला

टि० ॥ १ इंद्रजित् ॥ २ सर्पः ॥ ३ इंद्रजित् ॥

न्नीलः प्रहस्तंबलात्तत्सर्वंदशकंधरायचकितैरुक्तंच्वनक्तंचरैः ॥ ४७ ॥ ग० ॥-
अथतदानीम[1]नीकिनीनाथवधकोपोदयादायोधनोत्कंठोदशकंठः सकल-
जगदड्[2]भरितजैयानकभयानकनिनदबधिरिताशेषशेषाहिलोचनोरोन्वि-
[3]ष्णुजिष्णुकोदंडधरः सलिलधरइवस्कमेरुशृंगंसमुत्तुंगंरथमलंकुर्वन्सर्वत-
श्चलितसकलचतुरंगसंगतयालंकयेवस्वयंअनुगम्यमानः क्रमादतिक्र-
म्यपुरतोरणंपुरतोरणंचलितमालोकयतनिखिलमपिवलीमुखबलं ॥ प० ॥
जेतारमाहवमुखेदशदिक्पतीनांदृष्ट्वापुरोदशमुखंरघुनंदनस्य ॥ श्लाघा
वशेननचचालशिरः परंतत्सव्येतरंफ्रजशिरोपिसमीक्ष्यलक्ष्यं ॥ ४८ ॥ अ
थमदगर्जितैरधिकतर्जितदिक्करिभिर्दशवदनस्तदादशदिगंतरमंतरयन्
॥ समरमुखेसखेलपदचंक्रमतोविदधेहरिकुलमाकुलंजलधिमादिवरा-
टि० ॥ १ सेनापतिः ॥ २ दुंदुभिः ॥ ३ इंद्रः ॥

धिगतविबुधसीमंतिनीभिः सहविजिहीर्षयेव[1] प्रस्थानसमयपरिम्लानमुखीः
स्फमुखीरप्यगणयंतोनिरंतरज्वलितकोपानलनयनकोणारुणालातशतनि
पातवित्रासचलितनिजवारणानिवारणावेशपरवशाः[2] दिशामुखमुखरितशि
वारवाम्रेडितव्याकुलीकृतकुल[3]महीध्रागृध्रायतपक्षविक्षेपकृतपातकानि
कायपुनरुक्तसमुत्तुंगशातांगसंघातपरिगतानितांतनिशिताकृतांतदंष्ट्राख
रतरनखरपट्टीसप्रासपरशुगदामुसलशक्तितोमरमुद्गलपरिघद्रुघणकृपा-
णधारिणोदारुणाजगरसंतानसंवीताइवविंध्यकूटाव्यूढातिकरालकालाय-
सकंकटा[4]विकल्पाइवकल्पांबुदानांव्यक्तयइव कालरात्रेर्विवर्ता[5]इवकलिका-
लस्यचभयंकराः समरांगणमवतारयंतः समीरयंतोवीरवादानादायचशारा-
सनमासारैरिवगिरिमंभोधरादूरापातिभिः शिलीमुखैर्वलीमुखबलमखिल-

टि०॥ १ विहर्तुमिच्छयेव. २ परतंत्राः ३ कुलाचलाः ४ कवचाः ५ परिणामाः॥

न्चकथंचन कुंभकर्णो॥आदेशातः सचविभोरपुनः प्रबोधसंवेशधामसमरां
गणमाजगाम ॥५३॥ग०॥आगतञ्चतमंजनाचलनिकाशमाकाशतलभ्र
मितत्रिशूलंशूलधरमिवजगत्क्षयोद्युक्तंनक्तंचरमवलोक्यशाम्यत्सहज-
भजतेजोविशेषमशेषासुदिक्षुधावमानंपवमानचलितजलदपारिप्लव
प्लवगबलमंगदोधीरमवादीत्॥प०॥ कपयः कैकसेयानांकापिसेयंबि
भीषिका॥अभूदभूतपूर्वंवः प्राकृतंभयवैकृतं॥५४॥ग०॥ अथहरयोपि
सरयमनुनयसंगतमंगदवचनमवधारयंतोधारयंतः समरसन्नाहान्दिग्भा
गाइवप्रतिनिवृत्ताः प्रमत्ताशयमिवैरावणंरावणानुजंविंध्याचलमिवयुगां
तानिलाः समंतादाहृतैर्गिरिभिस्तरुभिरप्यवाकिरन्॥प०॥क्षिप्ताः संयतिपु
ष्पिताः क्षितिरुहास्तैरक्षसोवक्षसिप्रस्विन्नेपटवासपांसवइवालीयंतचूर्णी
कृताः॥मुक्तायेधरणीधरामुहुरमीतद्बाहुसंघट्टनात्सत्याचूर्त्यपरंप्रहर्तुर-

भवन्खेदाय भेदाय च ॥५५॥ ज्वलदनलं त्रिशूलमुपरिक्षिप्तमयन्नमयन्नय
मवनीमनीकमदरखेलनदुर्ललितः ॥ सपदि बभंज नीलमृषभं शरभं च ब-
लादहरत गंधमादनमरुंध गवाक्षमपि ॥५६॥ग०॥ ततश्च सहजबल-
चापलाधिगतलाघवं राघवं शरणमश्नुवानं राघवानीकमाश्वासयन्वि
श्वाधिकविपुलभुजवीर्यो विकीर्य द्विषति सर्वतः पर्वतान्विधाय विचि-
त्रमतिचिरं युद्धं नक्तंचरविमुक्तधात्रीधरवशाः कुलिशदारित इव कुल-
भूधरो धरायामचेतन इव पपात हरिकुलपतिः ॥प०॥ परिगृह्य तं झटिति
बाहुपंजरे चलिते पुरं तदनुरावणानुजे ॥ अविनीतबालिक्कलमद्यनः प्रभोर
यशः प्रमृष्टमिति हृष्टमाशरैः ॥५७॥ग०॥ तत्र विचित्रकुसुमपरिमलशि
शिरोपचारसचेतनो द्रीवक्षग्रीव नरवमुखाकलितशूर्पणखामुखानुका-
टि० ॥ १ रुद्धवान् ॥ २ प्राप्तं ॥ ३ राक्षसैः ॥

रः सचमत्कारमुत्सुत्याक्षिगतमेनमनालक्ष्यचैलक्ष्यतः प्रतिनिर्वृत्तो वि-
वृत्तोरुत्तारकेक्षणः क्षणदाचरः प्रतिक्षणमतिक्षीबतयाप्रतिपक्षबल
मिवस्वपक्षबलमपिभक्षयन्नलक्षयन्सौमित्रिमद्रिशिखरान्विमुंचन्ने
वायमंजसाराममाजगाम ॥ प॰ ॥ भिंदन्शूलमथार्धचंद्रमुखतोवीरोर-
घूणांपतिर्बाणानत्रमुमोचवालिविपदोमारीचमर्मच्छिदः ॥ आलोक्या
थसतान्विदारितशिखानस्मिन्नकिंचित्करान्वायव्यंपुनरैंद्रमप्यरिव-
धूवैधव्यधुर्यंदधे ॥ ५८ ॥ रामास्त्रोद्दलितेषुराक्षसपतेरंगेषुतुंगोभ्कजः
प्रागेकोनिपपातमंदरइव प्रत्यर्थिसेनांबुधौ ॥ सिंधोनिष्पातितः परोपिद
दृशेसेतुर्द्वितीयोयथाछिन्नंव्योम्निशिरस्तुरीयमभवत्कूटंत्रिकूटस्य
च ॥ ५९ ॥ ग॰ ॥ तदनुतदनुमोदभरितहरिबलकोलाहलाकर्णनचिदित्त

टि॰ ॥ १ निशाचरः ॥ २ मत्ततया ॥ ३ छिन्नेषु ॥ ४ शत्रुः ॥

हइव ॥ ४९ ॥ ग० ॥ अनंतरमनीकास्कंदकंदलितामर्षंवर्षंतंगिरीन्हरीणामधिपतिमतिनिष्ठुरेणमुष्टिनागाढमभिनिघ्नंतंहनूमंतममंदलाघवाक्रांतध्वजकिरीटांचलंनीलमपिनिखिलजगज्जितामूहताबलेनवातूलइवतूलजालंकपिकुलमपसारयन्नविरतशरासारवर्षिणमेष्यमित्रीणसौमित्रिमपिशक्त्यागाढमुरसिविव्याधक्रव्यादाधिपतिः ॥ ५० ॥ अर्वकीर्यदाशरथिरस्मुझरैरनुजंपुलस्त्यतनुजंचशरैः ॥ युगपद्व्यधात्करुणवीररसौयुधिशोकहर्षशबलंचबलं ॥ ५० ॥ आधूयमोहमहितोन्मथनाययावत्सौमित्रिरेषसमुदंचतितावदेव ॥ पौलस्त्यमेषपरिभूयपरंतदीयान्प्राणान्मुमोचदययानमुमोचबाणान् ॥ ५१ ॥ प्राप्यतत्प्रथमंयुद्धेपराजयमुदेजयन् ॥ दशाननःपुरींप्रापदिनदीपदशाननः ॥ ५२ ॥ प्राबोधयत्तदनुपंक्तिमुखःशयालुंकालंविनापि

टि० ॥ १ वातसमूहः २ कार्पासः ३ रिपुसंमुखीनं. ४ अभिदृष्य. ५ चकार. ॥

क्रमित्रास्क्रतेनसहवितेनेविचित्रमायोधनं ॥प०॥सचक्रान्चिरंनियुध्यंत
मवध्यइतीववरादनिलगिराविबुध्यपुनरस्त्रमधत्तविधेः ॥दलितमनेन
तद्द्विविसमुत्पतितंजगतामतनुराहुभीतिमधिकामतिकायशिरः॥६२॥-
अनुनीयरावणिरथोविधुरंपितरंदधत्पृथुसमीकधुरं॥सरथीसमेत्यस-
धनुःशरधिश्च्वलितश्चमूभिरधिदाशरथी॥६३॥ग०॥अधिसमरमरा-
तिजयमनोरथायरथाभिरक्षायैरक्षांसिपरितःप्रकल्प्यप्रतर्प्यचहविषा
प्रदक्षिणशिखावंतंमंत्राधिगतानिविचित्राण्यस्त्राणिदधानस्तिरोधानग-
तएवाशितमुखैःशिलीमुखैर्निर्माय निखिलमर्माहतिंनिस्त्रंशाक्रमःक्रव्या
दोव्याधइवहरीन्विधुरीचकार॥प०॥सहलक्ष्मणंतमपिदाशरथिंपरुषोनि
दाघइवपद्मसरः॥विकलाशयंविधुरसत्वमयंविरचय्यधामचजगामघा-
टि०॥ १युद्धं. २विव्हलं. ३वन्हिं.॥

रैः॥६४॥क्षेतार्केभवतेजसिक्षपितरो[2]मेचंद्रघकतौविमुच्यसातिनिर्गतेवि[3]शि-
खवृष्टिमस्मिन्घने॥अदीप्तनलमस्फुरत्कुमुदमस्तनीलोत्पलंसमुत्तरलं[4]जी
वनंसमभवत्तदावो[5]हिनी॥६५॥अचलमथसलीलमोषधीनांहरतिहनूम-
तिजांबवन्नियोगात्॥विचलितमभवद्बलंविशल्यंविबुधमनोपिविधूतशो
कशल्यं॥६६॥ग०॥तेनपुनःसहजतेजोभरितेनदावानलेनेववानरब-
लेनदह्यमानांदरीमिवपुरींविहायपंचाननाविवपंक्त्यानननिर्देशातश्च
लितमखिलरिपुप्रकंपनमकंपनमाहतप्लवंगसंघंप्रजंघंचअंगदभुज
प्रतापानलशलभावुभावपिनिशाम्यनिशाम्यचद्विविदमैंदावदारितोम-
हारथौशोणिताक्षयूपाक्षावपिकोपाक्षांतपरुषसंरंभौकुंभनिकुंभौसमुत्तं
भ्यबाहुंसुबाहुमारीचाविवराघवभुजाभ्यांसुग्रीवहनूमद्भ्यामद्भुतंयु-

टि०॥१सुग्रीवः सौरातपश्च.२दाशरथिःचंद्रश्च.३शरःउदकमितियावत्बाणश्च.४जीवःउदकंच.
५सेनानदीच.॥

द्रूमेतनिषातां ॥ प० ॥ भूमौततः प्लवगराजभ्रजेनविद्धमालोक्यकुंभम-
सहन्विरहंतदीयं ॥ शोकादद्गादनिलसूनुहतोनिकुंभस्तन्नामयुक्तममम-
रीकुचकुंभमेव ॥ ६७ ॥ ग० ॥ ततः कौणपपतिनियुक्तंयुक्तमखिलवाहि-
नीभिराहवाटोपमुरवरंखरात्मजंमकराक्षमैक्ष्वाकशरोपिविपक्षमपिस
पक्षइवसमक्षमयज्ञेनघितुः ॥ प० ॥ कृत्वामूर्द्धनिशासनंपितुरथोग
त्वारणंरावणिर्हुत्वातत्रमहाभ्रजोहुतभुजंधृत्वामहास्त्राणिच ॥ स्थि-
त्वाव्योमनिमायपूशरचयंत्यक्त्वाचभित्वाचमूंबुध्वाराघवकोपमाप-
सहसालंकामलंकौतरः ॥ ६८ ॥ ग० ॥ ततःप्रतीचःप्रतिहरादयंसप्राति
हारिकोनिर्गत्यनिकृत्यासिनाकांचिदांजनेयस्यपुरतोमायामयींमैथि-
लीमाकुलीकृतमनसितस्मिन्नाकस्मिकमिदमतथ्यमपितथ्यमेव-

टि० ॥ १ विस्तारितवंतौ· २ पितुः ३ भयचकितः ॥

कुंभकर्णवधपरिम्लानमुखेनदशमुखेनसहोदरमहोदरमहापार्श्वौसहा-
योविधायसमादिष्टाः कुमाराः नरांतकदेवांतकातिकायत्रिशिरसःपितुर्नि
देशान्निवेशमिवपितृपतेः प्राविशन्नमीसमीकमक्षवं ॥ ५९ ॥ अजनिपुनःस
मीकमनयोरुभयोर्बलयोरवदलितेमुखेचयदनुज्झितरोषभरं ॥ अमर
मृगीदृशामपियदाशयपूर्तिकरंसमरसमुत्सुकेनमुनिनायददृष्टचरं ॥-
६० ॥ ममाथशैलैरथवालिनंदनोनरांतकंसंयतिवानरांतकं ॥ हनूमतासो
पिहतःस्मरांतकःपुरांतकेनेवरुषापुरांतकः ॥ ६१ ॥ ग० ॥ अनंतरमसमस
मरशीलेननीलेननिहतेमहोदरेमारुतिमथितशिरसित्रिशिरसिविशसि
तेषुमहापार्श्वादिषुवाहिनीपतिषुनिर्भरविषादरोषपरवशोनिशाचरः-
साकारइवतमोनिकायःस्वयमतिकायःसमागत्यवृत्रासुरइवसुत्राम्णा
टि० ॥ १ यमस्य. २ संग्रामांगणं. ॥

चं·रा· निरंतरायमखनिर्वर्तनायपुरंदरारिणाकृतंकृत्रिममेतदित्यव[2]धार्यधारय·यु·कां·
८७ यमनसिधैर्यमित्यभिधायतद्बुध्वायलक्ष्मणंतत्क्षणमेवपुरस्कृत्यनिकुंभ ६
लामुपरुरोध ॥प०॥ हरिकुलारवतश्चलितस्ततोगिरिदरीकुहरादिवकेस
री ॥ अपरिपूर्यरुषाहैवमाहवंसविदधेबलशासनशासनः ॥७१॥ वातूलइ
वतूलानांवानराणांरणाजिरे ॥ विद्रावणस्ततोमायाविद्रावणकृतोभवत् ॥
७२॥ग०॥ अनुपदमनीकिनीनाथनिधनसंरब्धतरसंवर्तप्रवृत्तमिवकृ
तांतंसमरांगणमापतंतंस्यंदनगतंतंसंक्रंदन[4]जितंगंधवाहनंदनस्कंधव
र्तीसौमित्रिःप्रवर्तितशिततरशरधाराभिःशतधारपाणिरिवजंभमस्तंभ
यत् ॥प०॥ परस्परमदोत्कटंप्रचुरवीरवादोद्भटंपतत्त्रुटितकंक[5]टंप्रतिह·
तास्त्रमस्त्रेणच ॥ जगत्त्रयभयावहंजयपराजयागोचरंवितेनतुरुकुं[6]भौवि· ८७
टि० ॥ १ निर्विघ्नं. २ निश्चित्य. ३ हवनं. ४ वज्रपाणिः ५ कवचं. ६ गजौ. ॥

भाविक्षतदारणंदारुणं ॥७३॥ शत[1]धारकठोरशिखैर्विशिखैः शतधाविर-
चय्यशरासगुणं॥ विदधेविबुधेशजितंसमरेहतसारथिमप्यथदाशरथिः॥
७४॥ यदुचितमहोमायाशीलस्ययद्भुजशालिनः सदृशमथवायुक्तंनक्तंच
रेंद्रसुतस्ययत् ॥ शतमखजितः शौर्येयद्वानुरूपमथात्मनस्तदकृतरुषा-
मंदोमंदोदरीतनयोरणे ॥७५॥ ग० ॥ अनुपदमभिषिषेणअभिषेणनवति
बिभीषणेतेनमुक्तांशक्तिमर्धचंद्रेणदारयन्नपारयन्सोढुमदसीयमविनय
ममर्षाकुलःसौमित्रिरमोघंमोघवतास्त्रमसुंचत् ॥ प० ॥ पततिस्मतदस्त्र
ममस्त्रमुज्वलंसशिरस्त्रमिंद्रजयिनस्ततःशिरः॥ अनुपुष्पवृष्टिरवनौदिवौ
कसामथबाष्पवृष्टिरमरारियोषितां ॥७६॥ श्रुत्वाशक्रजितःसुतस्यनि-
धनंशोकेनरक्षःपतेःक्लांतंनिश्वसदश्रुपूरभरितंक्रंदच्चफूत्कारिच ॥-

टि० ॥ १ वज्र. २ ऐंद्रास्त्रं. ॥

कोपेनाथविपाटलंकुटिलितभ्रूवल्लिवृत्तेक्षणंजज्ञेदष्टघनोष्ठमट्टहसितो
द्भूत्तंसमस्तंमुखं ॥७७॥ग०॥ अनंतरमपाक्रांतास्कषुविक्रांतेषुपुरंदरारिसु·
रवेषुनंदनेषुनिहतेषुकुंभकर्णादिषुभ्रातृषुविध्वस्तेषुप्रहस्तपूर्वेषुसचि-
वेषुव्यतीतेषुविरूपाक्षप्रभृतिषुसेनापतिषुकपिविमर्दनेनविशीर्णेभवति-
निखिलेबलेसमंततःपौरवधूजनपरिदेवनोत्तरंगायांलंकायामातंकाति-
शयरोषणोरावणस्तत्क्षणमेवहर्यक्षइवहरिणींधरणीसुतांजिघांसुरंति
कगतेनमंत्रिणानिवार्यमाणःसारथिनाविधिनाचसंचोदितोदाशरथि
विजयविहितसंगरःसंगरभुवमवततार॥प०॥कोपादसौपरिघयष्टिकु
ठारकुंतचापाशभृगद्रुहिणशक्तिकृपाणपाणिः॥एकोप्यनेकमुखबाहुत-
यासबंधुर्लोकोयथासमितिलोचनगोचरोभूत्॥७८॥अलक्ष्यतसर- ८८

टि०॥१सिंहः २देवेन. ३अम्हदेवः॥

बुध्वाच्चिराययुध्वानिराशोप्रतिनिवृत्तेविद्विषिविपक्षपक्षविशसनारंभिनि-
कुंभिलामासाद्यसद्यएवप्रावर्ततसत्रमतिविचित्रं॥ तदनुहनूमतःप्रतिनिवृ
त्तादूत्तमेतदाकर्ण्यविशीर्णमानसोमानसचरइववज्रनिर्घोषाद्विषादाकुलो
राजहंसःसंसदिनिपत्यसौमित्रिणासमाश्वास्यमानःसकरुणंनिश्वस्यविश्व
स्यपतिरपिविधुरंव्यलापीत्॥ प०॥ जज्ञेतदत्रभवतीजनकस्ययज्ञेदेव्या-
श्चिरायधरणेररणेःशिखीव॥वंशेमनोरपिवधूरभवत्किमन्यद्रामस्तवापि
विधिनारचितोविरामः॥६९॥यत्नोमुधाभवतियत्रसमीरसूनोर्नालंनलो-
पिनवसेतुनिबंधनाय॥दूरेचपावकधराहरतिक्रमोयंतत्केनशोकजल-
धिस्तवलंघनीयः॥७०॥ग०॥इत्यादिपरिदेवमानमेनंविदितोशरमायावि
शेषोबिभीषणःसमागत्यदेवभवतोपिकिमिदमस्थानेदीनमवस्थानं॥-
टि०॥१ हिंसनं.२ राजश्रेष्ठःपक्षीच.३ व्यर्थः ४ राक्षसः॥

विशिख्ववर्षममर्षवति ॥ अरिषु न कश्चिदप्यथ निवृत्य गतः समरादमरविला-
सिनीषु न च काचिद लब्धवरा ॥ ८२ ॥ ग ॥ अयं च पुनरंजनीसूनुसमानीतम
हीधरमहौषधिजीवितानुजाश्लेषसुखलब्धमनोरथः समेधमानमानसः-
समरकौतुकोपलंभसंरंभोदंचितपुलककंचुकिताकृतिर्दाशरथिरधिसंगर-
ममरसारथिनानीतमतिविशंकटंकमपिरथंकंकटमप्यनुग्रहायशतक्रतोर
ग्रहीत ॥ प० ॥ अन्योन्यस्य सदृक्षलक्ष्यमिलनादालक्ष्यशौंडिर्ययोः शस्त्रा
शस्त्रिसमुन्मिषत्पुलकयोः सश्लाघयोः साहसे ॥ जाते जीवितसंकटेपि हस-
तोर्मूर्च्छासुखविश्रम्यतोरश्रांतं रघुवीरपंक्तिमुखयोरासीदसीमा रणः ॥ ८३ ॥
ग० ॥ अथ तयोरश्रांतमुक्तदिव्यास्त्रयोराखंडलवृत्रनिभयोरालूनेषु मार्ग-
णेषु अभंगुरपरस्परविजयमार्गणेषु वागगणेषु विच्छिन्नेषु धनुर्गुणेषु अभ्या ८९

टि० ॥ १ विशालं. २ दशमुखः ३ छिन्नेषु. ४ बाणेषु. ॥

हृतसहजसाहसगुणनिकृत्तेषुधुरीणेषुयानेषुनिरपायसमराभिहतिनि-
र्भिन्नेसांयुगीनेचरथेपर स्परगर्वकस्य विजयमनोरथमजायतभ्रूजाय
तयशोधनमायोधनं ॥प०॥तूणीमुखात्त्वरितमुद्धरणेगुणेनसंयोजनेऽप्य
थशरस्यविमोचनेवा ॥यत्रावलोकितदशास्यइवातिवेगाल्लोकेनराघव
करश्चिरमालुलोके ॥८४॥ अर्धोदीरितवीरवादमहरद्रामोयदस्त्रैःक्षणा
त्तेनैवांकुरतामुखेनजगदेशेषंचलंकापतेः॥ सामर्थ्येसत्यपिचातुरीभि-
रुभयोर्द्धानुष्कमायाविनोर्विच्छिन्नाननदर्शनेनसमभूद्व्रीडारणेराव
णे ॥८५॥ दशाननशरक्षतिक्षरदसृग्झरीबुद्बुदैस्तरंगितमहेंद्रकंदुकस
हस्रचक्षुःपथः ॥रणेरघुकुलोद्वहःक्षणममानिवैमानिकैर्यथादशशा
तेक्षणोवलरुषाकषायेक्षणः ॥८६॥ ग० ॥तदनुवारुणेनवैश्वानरवैन
टि०॥१ इंद्रः ॥२ आरक्तनेत्रः ॥

तेयेन वीतं[1]धयं वायव्येन वारिदं नैशाकरेण तामिस्रं माहेंद्रेण दानवं वैष्णा-
वीयेन माहेश्वरंच परस्परमेवमस्त्रमस्त्रेण भिंदानयोरनयोरनिशमाह
वाग्रहाद विदितान्यहानि सप्त व्यतीयुः ॥प०॥ शरास्त्राशास्त्रिसकौतुकोपिद
यितां संचिंत्य चिंताकुला मस्त्रेण ज्वलता विधेर्[4]पुनरुन्मेषं निमेषेण सः॥
मूर्ध्नः कंदलितान्मुहुर्मुहुरवच्छेदेपि लंकापतेरातंकेन समं समस्तजग-
तांचिच्छेद सीतापतिः ॥८७॥ रक्षःपतौ पतति लब्धमनोरथानामातन्व-
तां दिविषदामथ पुष्पवर्षं ॥ श्लाघापदं समजनिष्ट परं न रामः कामोपिचा-
कलितशूर्पणखाविकारः ॥८८॥ग०॥ अनंतरमालिंगितवसुंधरं शर-
तल्पमधिशयानमधिगतनिषंगोपधानं यातुधानपतिमधिगत्य निपत्य
च सोदर्यो हार्य सौहार्दस्कलभ वैधुर्यः कदर्योहमिति विहितनिजदूषणो

टि०॥१ सर्पास्त्रं.२ विदारकयो.३ जग्मुः ४ शंकया.५ कृपणः॥

क्षसामधिपतिः कृपाणंमुहुः प्रहस्यविनिपातयन्प्लवगमंडलीमौलिषु ॥ अयं-
तवतवायमित्यधिसमीकमेकैकशोवरानिवविनिर्दिशन्नेमरवारवामस्त्रुबां
॥७९॥ ग० ॥ तदनंतरमक्षौहिणीक्षोभकंदलितरुषमतिपरुषविशिखदलित
ध्वजमर्धचंद्रनिकृत्तधन्वानमस्त्रधाराप्रवदारितसारथिमतिविस्मयनीय-
करलाघवंराघवानुजममर्षावेगमुक्तयाशक्त्यामुहूर्तमिवमूर्छानिमीलित-
मुपरागइवकमलाकरमाततानयातुधानपतिः ॥ प० ॥ आलोक्यदीनमनुजं
हृदिशक्तिघाताच्छोकेनविद्धहृदयः स्फुतरांसरामः ॥ कोपेनचापमथकुंडल
याचकारलंकापतेरपिललाटलिपिंविधाता ॥८०॥ अवकीर्यदाशरथिरस्त्रजा
लैरनुजंपुलस्त्यतनुजंचशरैः ॥ युगपद्व्यधात्करुणावीररसौयुधिशोकहर्षशै
बलंचबलं ॥८१॥ वलयितचित्रचापविनिवारितपंक्तिमुखेविसृजतिराघवे

टि० १स्वर्वैश्यानां . २छिन्नं . ३व्याप्तं . ॥

मद्यदुर्विधिबलेनसमस्तलोकसाधारणःपुनरुपैष्यसिहाकिमेकः ॥९१॥
जनकःस्वयंदनुजवंशनायकोदयितोजगत्त्रितयजैत्रशासनः ॥ तनयःपु
रंदरजयीतिगर्विताविधिनाहमेवमधुनाविडंबिता ॥९२॥ राजन्यधर्मविदु
षोपिरघूद्वहस्यहत्वायथाग्रजमथानुजपट्टबंधः ॥ आरभ्यवालिनमयंक
थमाविरासीदिक्ष्वाकुवंशसहजः कथमेषधर्मः ॥ ९३ ॥ अहहनिहतालंका
वालानलेनहनूमतः परमवनिजापातिव्रत्यानलेनभवानपि ॥ स्फुरखमह
मिहासीनाशोकानलेनयदीदृशेप्रभवतिनमांहंतुंप्रायः सएषचितानलः
॥ ९४ ॥ ग॰ ॥ तदहमिदानींसायंतनसमयइवसवितुःप्रभाभगवति
प्रविश्यजातवेदसिचंद्रिकेवचंद्रमसंतडिदिवतडिद्वंतंभवंतमनुसरंती
निर्वापयामिनिरंतरविरहदहनदह्यमानमात्मानमित्यादिकरुणपरि

टि॰ ॥ १ दुर्दैवं. २ सीतां. ॥

देवनवतीं[1] प्रजावतीं निवर्त्य निर्वर्त्यं च निशिचरपतेर्यथाविधि निजाज्ञया पितृमेधसमेतं सविधमेधमानविषादं बिभीषणमशेषराज्याधिपतिं विधातुमखिलतीर्थोपहृतरंभोभिरंभोधर इव दावानलाकुलं वनस्पतिं रघुपतिरभ्यषिंचत् ॥ प० ॥ अथ दशरथनंदनाभिषेकादधिगतराज्यपदो- बिभीषणोयं ॥ अनुदिनमभिवृद्धमंडलोभूदरुणाकरामृतपूरणादिवेंदुः ॥ ९५ ॥ नीतामुदीक्ष्य निभृतेन बिभीषणेन सीतामुदारगुणशीलवतीं सतीनां ॥ देवस्य तत्क्षणमभूद्दशकंधरारेरानंदशोकरसबंधुर- मंतरंगं ॥ ९६ ॥ ग० ॥ तदनंतरमरुंधतीव पवित्रचारित्रनिधिरधिदेवता पतिदेवतानामनादिपुंसोपि मर्त्यधर्मणः प्रत्यायननायनाय कस्य पुरंदरमुख्यान्बर्हिर्मुखान्पुरस्कृत्य नमस्कृत्य भगवंतमरविंदासनमिंदु-

टि० ॥ १ भ्रातृजायां ॥ २ सूर्यः ३ देवान् ॥

कलेवपुनरुदेष्यंतीतपनमिवदहनमवजगाहे ॥प०॥ प्राविक्षदर्चिषिपरंनि-
जशुद्धिहेतोर्देवीपवित्रचरिताजनकेंद्रपुत्री ॥ अंहश्चिरंह्रियदपावनवस्तुसं-
गात्तत्कंस्वयंतदमुनादमुनाबभूव ॥९७॥ विशुद्धशीलामनलानुषंगाद्विदे
हजांतत्रविलोक्यसीतां ॥ प्रभांपुनःप्रत्युषसीवपूषाप्रत्यग्रहीत्साग्रसरोरघू
णां ॥ ९८॥ ग०॥ अथोदारधीरधिगतनिजप्रशंसाविधिनाविधिनापुरःप्रद
श्यमानंविमानाधिगतमहारथंदशरथंप्रणिपत्यप्रतिपाल्यचशिरसितदनु
शासनंपाकशासनवरप्रत्युज्जीवितैर्हरिभिरनुगम्यमानःप्रमोदमानमनाः
सुग्रीवेणसहसंभाषमाणोबिभीषणंसकरुणमवलोकयन्ननुजेनच-
सीतयासममयोध्यामधिगंतुकामोरामःखेचरंविमानमारुरोहकिमपिकौ
बेरं ॥ प०॥ आरुह्यपुष्पकमयंविदितानितानिलंकोपकंठदशकंठरणांग-
टि० ॥ १ विभावसुः २ ब्रम्हणा· ॥

बिभीषणश्चिरतरं विललाप ॥ प० ॥ अयि समस्कखदुःखैरन्वितं बंधुवर्गैः स
हजमपि भवंतं मुंचतः साहसेन ॥ कुलविनाशनहेतोः कूटधर्मानुवृत्तेर्दशमु
खममया वज्जीवमासीत्कलंकः ॥ ८९ ॥ आर्यस्य रक्षितुमसून्ननुजः स ए
कः प्राणान्मुंचत परं सुधि कुंभकर्णः ॥ त्वज्जीवहत्स्वयमहं ममजीवहेतो-
र्घ्नापि हंत सहते हत को विधिर्मा ॥ ९० ॥ ग० ॥ इत्येवमस्मिन्विलपति विदि
तवृत्तांताः शुद्धांतात्सकरुणमारटंतीभिरंतरितयूथपाभिः करिणीभिरि
व तरुणीभिः सममंसमापत्य मध्ये समरमापतितमशनिहतमिव मंदर-
दशकंधरं समीक्ष्य निहतोपघ्नेव लता निपतंती विलपंती नाथ नाथेति-
विषादाहता दयितविधुरीकृतकुररीवामंदं चक्रंद मंदोदरी ॥ प० ॥ यावी
क्षिता जनि पुरा यमराजधानी वीरत्वया निखिलदिग्विजयोत्सवेषु ॥ ता-

टि० १ अपकीर्तिः २ हताश्रया. ॥

त्रेराश्रमपदमिदं विदेहराजपुत्रि चित्रकूटोयमिति विविधाः कथाः कथय-
न्नेवायं भागीरथीपरि[1]सरगतं भरद्वाजमुनेः प्रशांतं पावनं तपोवनमयासी
त्॥ अभाषत च मैथिलीं ॥ प०॥ प्रस्कन्नबर्हिनिश्वासपारणास्फुरितः फणी ॥
कंडूविनोदनोत्कंठी कंठीरव[2]नखैर्मृगः ॥ १०२॥ ग०॥ तत्र भरद्वाजविहितवि
विधातिथेयः तथैव पदवीं दवीयसी[3]मतीत्य पुनरयोध्यासविधमासीदन्नग्र
त एव हनूमदावेदितो[4]दंतं समागच्छंतमरुंधती[5]जानिपुरःसरमजस्रमानं
दाश्रुजलविलुलितालोकैरमात्यलोकैः परिगतमतिपावनतपोधनव्रतमा
जानभक्तिभरितं भरतमवलोकयन्नतिवत्सलमना विमानावरोहणाय
दशकंठरिपुरुदकंठत ॥ प०॥ यानं मदाशयमवेत्य यथायथैतत्तारापथादव
वतरत्यवनीकुमारि ॥ आसेदुषी सविधमद्य तथा तथाभूरत्यादरेणाभव-

टि०॥ १ पर्यंतभूः २ सिंहः ३ अतिदूरां. ४ वृत्तांतं. ५ वसिष्ठः ॥

तीमभिगच्छतीव ॥१०३॥ इत्थं वदन्निंदुमुखीं सलीलं देवः प्लवंगाधिपद
त्तहस्तः ॥ बिभीषणावेदितयापदव्या विमानतो मंदमवारुरोह ॥१०४॥-
प्रणीतमणिपादुकं प्रणतमग्रतः पादयोरुदस्य भरतं जवादुपनयन्भुजा
भ्यांतरं ॥ अवेक्ष्य च तपः कृशं वपुरतीववात्सल्यतो नवं नवमिव स्पृशन्न
विरराम रामश्चिरं ॥१०५॥ पश्यन्ननंदभरतः परिरभ्य दोर्भ्यां सौमित्रिमा
र्यसमदुःखसखं वनेपि ॥ सोयं सखोपतनराज्यपराङ्मुखाय तस्मै-
पुनः सहजभक्तिपराङ्मुखाय ॥१०६॥ ग० ॥ अथ भरतोपि पुरतोभि
वादितपूर्वजोपलालननिघ्नेन शत्रुघ्नेन समं सविनयं प्रणिपत्य जनके
द्रपुत्रीमुन्मनीकृत्य सुग्रीवदशग्रीवानुजादीन्सावरोधवधूकान्यथो
चिताभिरुपचर्याभिरभ्यर्च्याभ्यर्चितपुरोहितमामंत्रितमंत्रिलोकमा-
लोकानुगृहीतपौरवर्गमग्रजन्मानं विमानत एव सबहुमानमनयदप-

नीतजनपरिश्रमं निजाश्रमं ॥ तत्र च सौमित्रिसीतासखो दाशरथिरतिलोभ नीयवात्सल्यां कौसल्यामयशःशल्यजनितशोकातिरेकां कैकयीमकृत्रिम स्नेहपरिष्वक्तां सुमित्रामपि क्रमादभिवादयन्निजालोकरसनितांतकंदलि तांतरंगाभिरेताभिश्चंद्र इव पयोधिवीचिकाभिः प्रतिक्षणं परिरभ्यमाणा- भिः सलक्ष्मणः केवलमानंदधुरमविंदत ॥ प० ॥ अथाखिलजगत्पतेरपि र- घूद्वहस्यादराद्विधातुमभिषेचनं विचलता गुरोराज्ञया ॥ अनीयत समंत तो हरिगणेन तीर्थं पुनर्विशंक्य हृदि मंथरां न भजनागतिं मंथरां ॥ १०७ ॥ अ लंकृतः कृतमभिषेकमादरादमात्यसंहतिभिरवाप्य राघवः ॥ पुरोन्मुखः पु- नरयमानशेरथं मनोरथं स च भरतो महारथः ॥ १०८ ॥ ग० ॥ तत्र च सेवाविच क्षणाभ्यां लक्ष्मणशत्रुघ्नाभ्यामभितो विधूयमानधवलवालव्यजनः परिज-

टि० ॥ १ सहचरः ॥

णानि ॥ सिंधुंगभीरमपिसेतुनिबंधनंचसंदर्शयन्मृगदृशंसजगामरामः॥९९

॥उपरियथायथामणिविमानमुदंचतिनस्तरुणितथातथाविपुलतामुपया-

तिन्नभः ॥ महीवलयेतुपल्वलमवेक्ष्यमहांबुनिधिंपवनभुवेनिवेद्यचहसं-

तिपरेहरयः ॥१००॥ ग० ॥ प्रियेविदेहराजनंदिनिविनेतानंदनमप्यतिशेते-

विमानवेगः ॥ प० ॥ यद्यद्दूरेपुरःपश्यन्निच्छामितवशंसितुं ॥ तत्तदन्वगपि

द्रष्टुंतत्क्षणेनापवार्यते ॥१०१॥ ग० ॥ तरुणिधरणीस्कृतेपश्यऋष्यमूको-

यंबिंबाधरेपंपासरइदंकंबुकंठिकबंधनिबंधनभूरियंकरभोरुखरादि-

कलहस्थलमिदंमधुरालापिनिममपर्णशालेयंमत्तेभगामिनिमायामृग

मृगयावनमिदंकुटिलायतकबरिगोदावरीयंकुंभिकुंभस्तनिकुंभसंभवा-

यतनमिदंविधुमुखिविराधविध्वंसनवनमहीयंविपुलविलोचनेमहामुनेर-

टि० १सीतां. २गच्छति. ३गरुडं.

नाचारनिरतभरतोदस्तमाणिविमलमुक्तातपत्रो विचित्रोपजातमनुजवेष-
चारुभिरारूढश्वेतांगमातंगैरलंकृतैराशरप्लवंगपतिभिरनुगम्यमानः प्रव
र्त्यमानशेषाक्षतकुसुमलाजोपचारपौरपुरंध्रीकदंबसौरंभचलितमंजु-
मंजीरमणिकांचीवलयवाचाटितदशदिगंतरांवाद्यमानमांगलिकभेरिमृ-
दंगशंखादिकविविधारवश्रवणसमयोच्चलितसामोदपौरसंबाधांसौधां-
तरगवाक्षचलिततरुणीकटाक्षलेखानीलोत्पलदामतोरणाभिरामरथ्यां-
तथाविधामयोध्यामाजगाम रामचंद्रः ॥ प० ॥ राज्यं स्वं समुपेयिवान्स वि-
नयैरासेवितो भ्रातृभिः सुग्रीवप्रमुखानपि प्रियसखान्स्वे स्वे पदे स्थापय
न् ॥ स्वच्छंदः सुचिरं सुखान्यनुभवन्देव्या तया सीतया रामः पालयति-
स्म कीर्तिविभवैरामोदिनीं मेदिनीं ॥ १०९ ॥ कोलालाख्यमहाग्रहारमहिता

टि० १ रथः ॥ २ राक्षसः ॥

कल्पेनसंख्यावतांमूर्धन्येनविशारदेनविधुनाश्रीसोमनाथोदये॥ प्रा–
ग्भोजोदितपंचकांडमहितानंदेप्रबंधेपुनः कांडोनिर्मितएकचूतपतिना
षष्ठोपिजीयाच्चिरं ॥११०॥ ॥ इतिश्रीलक्ष्मणकविविरचितेचंपूरामा
यणेयुद्धकांडःसमाप्तः॥ ॥श्रीसीतारामचंद्रार्पणमस्तु ॥शुभंभवतु
॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

इदं पुस्तकं श्रीकृष्णदासात्मजेन गंगाविष्णुगुप्तेन मुंबय्यांस्वीये श्रीवेंकटेश्वर
मुद्रणयंत्रालये अंकितम् श्रीविक्रमसंवत् १९६० भाद्रपद शुक्लपक्षे

## यह पुस्तक नीचे लिखे ठिकाणेपर मिलेगा.

गंगाविष्णु श्रीकृष्णदास, श्री वेंकटेश्वर छापाखाना,
मेरवानकी चाली, नं. ४६१ मुंबादेवीबजार, मुंबई.
(श्रीरतलाममें श्रीनृसिंहजीके मंदिरमें गंगाविष्णुखेमराजके पुस्तकालयमें,)
(श्रीअमृतसरमें गंगाविष्णुखेमराजके पुस्तकोंके दुकानपर,)
(श्रीदरभंगामें गंगाविष्णुखेमराजके पुस्तकोंके दुकानपर,)
(श्रीपटनामें गंगाविष्णुखेमराजके पुस्तकोंके दुकानपर मिलेगा.)

इदम्

# चंपूरामायणम्

विदर्भराजश्रीलक्ष्मणकविकृतम्

श्रीकृष्णदाससूनुनागंगाविष्णुना

शास्त्रिभिःसंस्कृत्य

स्वीयश्रीवेंकटेश्वराख्यमुद्रणालयेमुद्रितम्.

शकाब्दाः१८०५

पत्रे ७४ रामचंद्र श्रीकृष्णजोशी

# अथश्रीएकादशीमाहात्म्यप्रारंभः

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 24003
Date 22-3-68


भगवान्
एकादशी
मरुदैत्य

मा·कृ पवादिनोदेववेदब्राह्मणनिंदकान् ॥१०॥ अन्यांश्चैवदुराचारानगम्यागामिनस्त ए·क
२ था॥ परद्रव्यापहर्तृंश्चदेवद्रव्यापहारिणः॥११॥ नसंभाषेतदृष्ट्वाऽपिभास्करं
चावलोकयेत्॥ ततोगोविंदमभ्यर्च्यनैवेद्यादिभिरादरात्॥१२॥ दीपंदद्याद्गृहे
चैवभक्तियुक्तेनचेतसा॥ तद्दिनेवर्जयेत्पार्थनिंदांमैथुनमेवच॥ गीतशास्त्र-
विनोदेनदिवारात्रंनयेद्व्रती॥१३॥ रात्रौजागरणंकृत्वाभक्तियुक्तेनचेतसा॥ वि
प्रेभ्योदक्षिणांदत्त्वाप्रणिपत्यक्षमापयेत्॥१४॥ यथाशुक्लातथाकृष्णामान्या
वैधर्मतत्परैः॥ एकादश्योर्द्वयोराजन्विभेदंनैवकारयेत्॥१५॥ एवंहिकुरुतेय
स्तुशृणुतस्यापियत्फलम्॥ शंखोद्धारेनरःस्नात्वादृष्ट्वादेवंगदाधरम्॥१६॥
एकादश्युपवासस्यकलांनार्हतिषोडशीम्॥ व्यतीपातेचदानस्यलक्षमेकंफलं-
स्मृतम्॥१७॥ संक्रांतिषुचतुर्लक्षंयोददातिधनंजय॥ कुरुक्षेत्रेचयत्पुण्यंग्रहणे
चंद्रसूर्ययोः॥१८॥ तत्सर्वंलभतेयस्तुएकादश्यामुपोषितः॥ अश्वमेधस्ययज्ञस्य
करणाद्यत्फलंलभेत्॥ ततःशतगुणंपुण्यमेकादश्युपवासतः॥१९॥ तपस्विनो २
गृहेनित्यंलक्षंयस्यचभुंजते॥ षष्टिवर्षसहस्राणितस्यपुण्यंचतद्भवेत्॥ २०॥

एकादश्युपवासेनपुण्यंप्राप्नोतिमानवः ॥ गोसहस्रेचयत्पुण्यंदत्तेवेदांगपारगे ॥
॥ २१ ॥ तस्मात्पुण्यंदशगुणमेकादश्युपवासिनाम् ॥ नित्यंचभुंजतेयस्यदशचै
वद्विजोत्तमाः २२ भवेत्तद्दशगुणंभोजनेब्रह्मचारिणः ॥ एतत्सहस्रंभूदानेक
न्यादानेततःस्मृतम् ॥ २३ ॥ तस्माद्दशगुणंप्रोक्तंविद्यादानेतथैवच ॥ विद्याद्द
शगुणंचान्नंयोददातिबुभुक्षिते ॥ २४ ॥ अन्नदानसमंदानंनभूतंनभविष्यति
॥ तृप्तिमायांतिकौंतेयस्वर्गस्थाःपितृदेवताः ॥ २५ ॥ एकादशीव्रतस्यापिपु
ण्यसंख्यानविद्यते ॥ एतत्पुण्यप्रभावश्चयत्सुरैरपिदुर्लभः ॥ २६ ॥ नक्तस्या
र्द्धफलंतस्यएकभक्तस्यसत्तम ॥ एकभुक्तंचनक्तंचउपवासस्तथैवच ॥ २७
॥ एतेष्वन्यतमंवापिव्रतंकुर्याद्धरेर्दिने ॥ तावद्गर्जंतितीर्थानिदानानिनियमाय
माः ॥ २८ ॥ एकादशीनसंप्राप्तायावत्तावन्मखाअपि ॥ तस्मादेकादशीसर्वैरु
पोष्याभवभीरुभिः ॥ २९ ॥ ननखेनपिबेत्तोयंनहन्यान्मत्स्यसूकरान् ॥ एका
दश्यांनभुंजीतयन्मात्वंपृच्छसेऽर्जुन ॥ ३० ॥ एतत्तेकथितंसर्वंव्रतानामुत्तमंव्र
तम् ॥ एकादशीसमंनास्तिकृत्वायज्ञसहस्रकम् ॥ ३१ ॥ ॥ अर्जुनउवाच ॥
धर्मराजो

उक्तात्वयाकथंदेवपुण्येयंसर्वतस्तिथिः ॥ ॥श्रीकृष्णउवाच॥ ॥पुराकृतयुगे-
पार्थमरुनामाह्दिानवः ॥ अत्यद्भुतोमहारौद्रःसर्वदेवभयंकरः ॥ ३२ ॥ इंद्रोविनि
र्जितस्तेनअत्युग्रेणाचपांडव ॥ ईन्द्रेणाकथितःसर्ववृत्तांतःशंकरायवै ॥ ३३ ॥
सर्वलोकपरिभ्रष्टाविचरामोमहीतले ॥ उपायंब्रूहिमेदेव अमराणांतुकागतिः ॥
॥३४॥ ॥ईश्वरउवाच॥ ॥देवराजसुरश्रेष्ठयत्रास्तिगरुडध्वजः ॥ शरण्य-
श्चजगन्नाथःपरित्राणपरायणः ॥ ३५ ॥ तत्रगच्छामहेसर्वेसनःकार्यंविधास्य
ति ॥ ईशस्यवचनंश्रुत्वादेवराजोमहामनाः ॥ ३६ ॥ पुरस्कृत्यमहादेवंसगणंस
मरुद्गणम् ॥ यत्रदेवोजगन्नाथःप्रसुप्तोहिजनार्दनः ॥ ३७ ॥ जलमध्येप्रसुप्तंतु
दृष्ट्वादेवंजगत्पतिम् ॥ कृतांजलिपुटोभूत्वारुद्रःस्तोत्रमुदीरयत् ॥ ३८ ॥ ओंन-
मोदेवदेवायदेवदैवैःसुवंदित ॥ दैत्यारेपुंडरीकाक्षत्राहिनोमधुसूदन ॥ ३९ ॥ दैत्य
भीताइमेदेवामयासहसमागताः ॥ शरणंत्वंजगन्नाथत्वंकर्तात्वंचकारकः ॥
॥४०॥ त्वंमातासर्वलोकानांत्वमेवजगतःपिता ॥ त्वंस्थितिस्त्वंतथोत्पत्तिस्त्वंच
संहारकारकः ॥ ४१ ॥ सहायस्त्वंचदेवानांत्वंचशांतिकरःप्रभो ॥ त्वंधराचत्वमा

श्रीगणेशायनमः ॥ ॥ अथकथा ॥ ॥ सूतउवाच ॥ ॥ एवंप्रीत्यापुराविप्राः
श्रीकृष्णेनपरंव्रतम् ॥ कथितंतत्प्रयत्नेनयःकुर्याद्भुविमानवः ॥१॥ भुक्त्वाभो-
गाननेकांस्तुविष्णुलोकंप्रयातिसः ॥ ॥पार्थउवाच ॥ ॥ उपवासस्यनक्तस्यत
थैवायाचितस्यभो ॥ किंपुण्यंकिंविधानंहिब्रूहिसर्वंजनार्दन ॥२॥ श्रीकृष्णउ-
वाच ॥ ॥हेमंतेचैवसंप्राप्तेमासिमार्गशिरेशुभे ॥ शुक्लपक्षेतथापार्थएकाद-
श्यामुपोष्यच ॥३॥दशम्यांचैवयत्किंचित्प्रकुर्यात्सुदृढंव्रतम् ॥ नक्तंचैतद्धि
नकृत्वादशम्यांदंतधावनम् ॥४॥ दिवसस्याष्टमेभागेमंदीभूतेदिवाकरे ॥
तन्नक्तंविजानीयान्ननक्तंनिशिभोजनम् ॥५॥ ततःप्रभातसमयेसंक-
ल्प्यनियमांश्चरेत् ॥ मध्यान्हेचतथापार्थशुचिःस्नातःसमाहितः ॥६॥ नद्यां
तडागेवाप्यांवाउत्तमंमध्यमंत्वधः ॥ कमाज्ज्ञेयंतथाकूपेतदभावेप्रशस्यते ॥
॥७॥ अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे ॥ मृत्तिकेहरमेपापंयन्मयापूर्व-
संचितम् ॥८॥ त्वयाहतेनपापेनगच्छामिपरमांगतिम् ॥ अनेनमृत्तिकास्ना
नंविदधीतव्रतीनरः ॥९॥ नालपेत्पतितैश्चोरैस्तथापाखंडिभिःसह ॥ मिथ्या

य्यीशसोमनिर्ऋतिपाशिनाम् ॥ पदेषुस्वयमेवासीत्सूर्योभूत्वातपत्यपि ॥५३॥
पर्जन्यः स्वयमेवासीत्देवसर्वाश्चदेवताः ॥ जहितंदानवंविष्णोसुराणांजयमा·
वह ॥५४॥ तस्यतद्वचनंश्रुत्वाकोपाविष्टोजनार्दनः ॥ उवाचशक्रंदेवेंद्रहनिष्येतं
महाबलम् ॥५५॥ प्रयांतुसहिताःसर्वेचंद्रावत्यांमहाबलाः ॥ इत्युक्त्वाप्रययुः
सर्वेपुरस्कृत्यहरिंसुराः ॥५६॥ दृष्टोदेवैस्तुदैत्येंद्रोगर्जमानस्तुदानवैः ॥ असं·
ख्यातसहस्रैस्तुदिव्यप्रहरणायुधैः ॥५७॥ हन्यमानास्तदादेवा असुरैर्बाहुश॥
लिभिः ॥ संग्रामंतेसमुत्सृज्यापलायंतदिशोदश ॥५८॥ ततोदृष्ट्वात्हृषीकेशं
संग्रामेसमुपस्थितं ॥ अन्वधावन्नभिक्रुद्धाविविधायुधपाणयः ॥५९॥ अथ
तान्प्रद्रुतान्दृष्ट्वाशंखचक्रगदाधरः ॥ विव्याधसर्वगात्रेषुशरैराशीविषोपमैः॥
॥६०॥ तेनाहतास्तेशतशोदानवानिधनंगताः ॥ एकांगोदानवःस्थित्वायुद्ध्य
मानोमुहुर्मुहुः ॥ ६१॥ तस्योपरिहृषीकेशोयद्यदायुधमुत्सृजत् ॥ पुष्पवत्त-
समभ्येतिकुंठितंतस्यतेजसा ॥६२॥ शस्त्रास्त्रैर्विद्ध्यमानोऽपियदाजेतुंनशक्य
ते ॥ युयोधचतथाक्रुद्धोबाहुभिःपरिघोपमैः ॥६३॥ बाहुयुद्धंकृतंतेनदिव्यवर्षे

सहस्रकम् ॥ तेनश्रांतःसभगवान्ततोबदरिकाश्रमं ॥ ६४॥ तत्रहैमवती-
नाम्नीगुहापरमशोभना ॥ तांप्रविश्यमहायोगीशयनार्थंजगत्पतिः ॥६५॥-
योजनद्वादशायामाएकद्वाराधनंजय॥ अहंतत्रप्रसुप्तोऽस्मिभयभीतोनसंश
यः ॥ ६६॥ महायुद्धेनतेनैवश्रांतोहंपांडुनंदन ॥ दानवःपृष्ठतोलग्नःप्रविवेश-
सतांगुहाम् ॥ ६७ ॥ प्रसुप्तंमांतदादृष्ट्वाचिन्तयद्दानवोहृदि ॥ हरिमेनंहनिष्ये
ऽहंदानवानांक्षयावहम् ॥ ६८ ॥ एवंसुदुर्मतेरस्यव्यवसायंव्यवस्यतः ॥ स
मुद्भूताममांगेभ्यःकन्यैकाचमहाप्रभा ॥ ६९॥ दिव्यप्रहरणादेवीयुद्धायसमु
पस्थिता ॥ ईक्षितादानवेंद्रेणअरुणापांडुनन्दन ॥७०॥ युद्धंसमाहितंतेन
स्त्रियातत्रप्रयाचितम् ॥ तेनायुध्यतसानित्यंतांदृष्ट्वाविस्मयंगतः ॥७१॥
केनेयंनिर्मितारौद्राअत्युग्राऽशनिपातिनी ॥ इत्युक्त्वादानवेंद्रोऽसौयुयुधेक
न्ययातया ॥७२॥ ततस्तयामहादेव्यात्वरयादानवोबली ॥ छित्त्वासर्वाणि
शस्त्राणिक्षणेनविरथःकृतः ॥७३॥ बाहुप्रहरणोपेतोधावमानोमहाबलात्
॥ तलेनाहत्यहृदयेतयादेव्यानिपातितः ॥७४॥ पुनरुत्थायसोधावत्कन्या

मा॰कृ॰ ५

हन्ननकांक्षया ॥ दानवंपुनरायातंरोषेणाहत्यतच्छिरः ॥ ७५ ॥ क्षणान्निपात
यामासभूमौतत्रसमुज्ज्वलन् ॥ दैत्यः कृत्तशिराः सोऽथययौवैवस्वतालयम्
॥७६॥ शेषाभयार्दितादीनाः पातालंविविशुर्द्विषः ॥ ततःसमुत्थितोदेवः पु
रोदृष्ट्वाऽसुरंहतम् ॥७७॥ कन्यांपुरस्थितांचापिकृतांजलिपुटांनताम् ॥ वि-
स्मयोत्फुल्लवदनः प्रोवाचजगतांपतिः ॥७८॥ केनायंनिहतः प्रख्योदानवोदु
ष्टमानसः ॥ येनदेवाःसगन्धर्वाःसेंद्राश्चसमरुद्गणाः ॥७९॥ सनागाःसहलो
केशालीलयैवविनिर्जिताः ॥ येनाहंनिर्जितोभूत्वाभीतःसुप्तोगुहामिमां ॥८०॥
केनकारुण्यभावेनराक्षसोऽयंपलायितः ॥ ॥ कन्योवाच ॥ ॥मयाविनिह
तोदैत्यस्त्वदंशोद्भूतयाप्रभो ॥८१॥ दृष्ट्वासुप्तंहरेत्वांतुयतोहंतुंसमुत्थितः ॥
त्रैलोक्यकंटकस्येत्थंव्यवसायंप्रबुध्यच ॥८२॥ हतोमयादुरात्माऽसोदेवता-
निर्भयाःकृताः ॥ ॥ श्रीभगवानुवाच ॥ ॥ निहतेदानवेंद्रेऽस्मिन्संतु
ष्टोऽहंत्वयाऽनघे ॥८३॥ हृष्टाःपुष्टाश्चवैदेवा आनन्दःसमजायत ॥ आनंद
स्त्रिषुलोकेषुदेवानांयस्त्वयाकृतः ॥८४॥ प्रसन्नोऽस्म्यनघेतुभ्यंवरंवरयसु

ए॰क॰ ५

काशः सर्वविश्वोपकारकः ॥ ४२ ॥ भवस्त्वंचस्वयंब्रह्मात्रैलोक्यप्रतिपालकः ॥ त्वं
रविस्त्वंशशांकश्चत्वंचदेवोहुताशनः ॥ ४३ ॥ हव्यंसोमोहुतस्त्वंचमंत्रतंत्रार्त्वि
जोजपः ॥ यजमानश्चयज्ञस्त्वंफलभोक्तात्वमीश्वरः ॥ ४४ ॥ नत्वयारहितं
किंचित्त्रैलोक्येसचराचरे ॥ भगवान्देवदेवेशशरणागतवत्सल ॥ ४५ ॥ त्राहि
त्राहिमहायोगिन्भीतानांशरणंभव ॥ दानवैर्निर्जितादेवाः स्वर्गभ्रष्टाः कृतावि
भो ॥ ४६ ॥ स्थानभ्रष्टाजगन्नाथ विचरंतिमहीतले ॥ रुद्रस्यवचनंश्रुत्वाविष्णु
र्वचनमब्रवीत् ॥ ४७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ कोऽसौदैत्योमहामायोदे
वायेनविनिर्जिताः ॥ किंस्थानंतस्यकिंनामकिंबलंकस्तदाश्रयः ॥ ४८ ॥ एत
त्सर्वंसमाचक्ष्वमघवन्निर्भयोभव ॥ ॥ इंद्रउवाच ॥ ॥ भगवन्देवदेवेशभ-
क्तानुग्रहकारक ॥ ४९ ॥ दैत्यः पूर्वंमहानासीन्नाडीजंघइतिस्मृतः ॥ ब्रह्मवंश
समुद्भूतोमहोग्रःसुरसूदनः ॥ ५० ॥ तस्यपुत्रोऽतिविख्यातोमरुनामामहाऽसुरः
तस्यचेन्द्रावतीनामनगरीचगरीयसी ॥ ५१ ॥ तस्यांवसन्सदुष्टात्माविश्वंनिर्जि
त्यवीर्यवान् ॥ सुरान्स्ववशमानिन्येनिराकृत्यत्रिविष्टपात् ॥ ५२ ॥ इंद्राग्नियमवा

एवंदत्त्वावरंतस्यास्तत्रैवांतरधीयत ॥ हृष्टातुष्टातुसाजातातदाएकादशीति-
थिः ॥९६॥ इमामेकादशींपार्थकरिष्यंतिनरास्तुये ॥ तेषांशत्रुंहनिष्यामिदा-
स्यामिपरमांगतिम् ॥९७॥ अन्येऽपियेकरिष्यंतिएकादश्यामहाव्रतम् ॥ ह
रामितेषांविघ्नांश्चसर्वसिद्धिंददामिच ॥९८॥ एवमुक्त्वासमुत्पत्तिरेकाद-
श्याःपृथासुताः ॥ इयमेकादशीनित्यासर्वपापक्षयंकरी ॥९९॥ एकैवचम
हापुण्यासर्वपापनिषूदनी ॥ उदितासर्वलोकेषुसर्वसिद्धिकरीतिथिः ॥१००
॥ शुक्लावाप्यथवाकृष्णाइतिभेदंनकारयेत् ॥ कर्तव्येउभयेपार्थनतुल्याद्वा
दशीतिथिः ॥१॥ अंतरंनैवकर्तव्यंसमस्तैर्व्रतकारिभिः ॥ तिथिरेकाभवे-
त्सर्वापक्षयोरुभयोरपि ॥२॥ उपवासंप्रकुर्वंतिएकादश्यांनराश्चये ॥ ते
यांतिपरमंस्थानंयत्रास्तेगरुडध्वजः ॥३॥ धन्यास्तेमानवालोकेविष्णुभ-
क्तिपरायणाः ॥ एकादश्यास्तुमाहात्म्यंसर्वलोकेषुयःपठेत् ॥४॥ अश्वमे
धस्ययत्पुण्यंतदाप्नोतिनसंशयः ॥ एकादश्यांनिराहारःस्थित्वाऽहंचपरेह-
नि ॥५॥ भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत ॥ इत्युच्चार्यततोविद्वान्

पुष्पांजलिमथार्पयेत् ॥६॥ अष्टाक्षरेणमंत्रेणत्रिर्जप्तेनाभिमंत्रितम् ॥उपवा
सफलप्रेप्सुः पिबेत्पात्रगतंजलम् ॥ ७॥ दिवानिद्रांपरान्नंचपुनर्भोजनमैथु
ने ॥ क्षौद्रंकांस्यामिषंतैलंद्वादश्यामष्टवर्जयेत् ॥८॥ असंभाष्यांहिसंभा
ष्यभक्षयेत्तुलसीदलम् ॥ आमलक्याःफलंवापिपारणेभक्ष्यशुद्ध्यति ॥
॥९॥ आमध्याह्नाच्चराजेंद्रद्वादश्यामरुणोदये ॥ स्नानार्चनक्रियाःकार्या
दानहोमादिसंयुताः ॥१०॥ संकटेविषमेप्राप्तेद्वादश्याःपारणंकथम् ॥अ
द्भिस्तुपारणंकुर्यात्पुनर्भुक्तंनदोषकृत् ॥ ११॥ यःशृणोतिदिवारात्रौनरो-
विष्णुपरायणः ॥ तद्भक्तमुखनिष्पन्नांकथांविष्णोःसुमंगलाम् ॥१२॥ ॥
कल्पकोटिसमायुक्तोविष्णुलोकेमहीयते ॥ एकादश्याश्चमाहात्म्यंपाद-
मेकंशृणोतियः ॥ १३॥ ब्रह्महत्यादिकंपापंनश्यतेनात्रसंशयः ॥ विष्णुधर्म
समंनास्तिव्रतंनामसनातनम् ॥ ११४ ॥ ॥ इतिश्रीभविष्योत्तरपुराणेश्री
कृष्णार्जुनसंवादेमार्गशीर्षकृष्णैकादशीमाहात्म्यंसम्पूर्णम् ॥ ॥ ७ ॥
॥ अथमार्गशीर्षशुक्लैकादशीकथा ॥ ॥ युधिष्ठिरउवाच ॥ ॥ वंदेविष्णुंप्र

भुंसाक्षाल्लोकत्रयसुखप्रदम् ॥ विश्वेशंविश्वकर्तारंपुराणंपुरुषोत्तमम् ॥१॥ पृ
च्छामिदेवदेवेशसंशयोऽस्तिमहान्मम ॥ लोकानांतुहितार्थायपापानांचक्ष-
यायच ॥२॥ मार्गशीर्षेसितेपक्षेकिन्नामैकादशीभवेत् ॥ कीदृशश्चविधि-
स्तस्याः कोदेवस्तत्रपूज्यते ॥३॥ एतदाचक्ष्वमेस्वामिन्विस्तरेणयथातथ
म् ॥ ॥ श्रीभगवानुच ॥ ॥ सम्यक्पृष्टंत्वयाराजन्साधुतेविपुलंयशः
॥४॥ कथयिष्यामिराजेंद्रहरिवासरमुत्तमम् ॥ उत्पन्नासासितेपक्षेद्वाद-
शीममवल्लभा ॥५॥ मार्गशीर्षेसमुत्पन्नाममदेहान्नराधिप ॥ मुरासुरव
धार्थायप्रख्याताममवल्लभा ॥६॥ कथितासामयाचैवत्वदग्रेराजसत्त-
म ॥ पूर्वमेकादशीराजन्त्रैलोक्येसचराचरे ॥७॥ मार्गशीर्षेऽसितेपक्षेचो
त्पत्तिरितिनामतः ॥ अतःपरंप्रवक्ष्यामिमार्गशीर्षसितातथा ॥८॥ तस्याः
श्रवणमात्रेणवाजपेयफलंभवेत् ॥ मोक्षानाम्नीतिविख्यातासर्वपापहरा
परा ॥९॥ देवंदामोदरंतस्यांपूजयेच्चप्रयत्नतः ॥ तत्रापिपूजनंचैवनृत्य-
गीतैः सुमंगलैः ॥१०॥ शृणुराजेन्द्रवक्ष्यामिकथांपौराणिकींशुभाम् ॥

व्रते ॥ ददामितंनसंदेहोयत्सुरैरपिदुर्लभम् ॥ ८५॥ ॥कन्योवाच॥ ॥
यदितुष्टोसिमेदेवयदिदेयोवरोमम ॥ तारयेहंमहापापादुपवासपरंनरम् ॥८६
॥ उपवासस्ययत्पुण्यंतस्यार्द्धंनक्तभोजने॥ तदर्धंचभवेत्तस्यएकभक्तंकरो-
तियः ॥८७॥यः करोतिव्रतंभक्त्यादिनेममजितेंद्रियः ॥ सगत्वावैष्णवंस्थानं
कल्पकोटिशतानिच ॥८८॥ भुंजानोविविधान्भोगानुपवासीजितेंद्रियः ॥भ
गवंस्त्वत्प्रसादेनभवत्वेषवरोमम ॥८९॥ उपवासंचनक्तंचएकभक्तं करोति
यः ॥ तस्यधर्मंचवित्तंचमोक्षंदेहिजनार्दन॥ ९०॥ ॥ श्रीभगवानुवाच॥
यत्त्वंवदसिकल्याणितत्सर्वंचभविष्यति ॥ ममभक्ताश्चयेलोकास्तवभक्ता
श्चतेनराः ॥ ९१ ॥ त्रिषुलोकेषुविख्याताःप्राप्स्यंतिममसन्निधिम् ॥ एकादश्यां
समुत्पन्नाममभक्तिपरायणा ॥९२॥ अतएकादशीत्येवंतवनामभविष्यति ॥
दग्ध्वापापानिसर्वाणिदास्यामिपदमव्ययम् ॥ ९३॥ तृतीयाचाष्टमीचैवनव
मीचचतुर्दशी ॥ एकादशीविशेषेणतिथयोमेमहाप्रियाः ॥९४॥ सर्वतीर्था
धिकंपुण्यंसर्वदानाधिकंफलम् ॥ सर्वव्रताधिकंचैवसत्यंसत्यंवदामिते ९५

स्यनरकेतस्यजन्मनिरर्थकम् ॥ ॥ ब्राह्मणाऊचुः ॥ ॥ पर्वतस्यमुनेरत्र आ- ए॰क
श्रमोनिकटेनृप ॥२२॥ गम्यतांराजशार्दूलभूतंभव्यंविजानतः ॥ तेषांश्रुत्वात
तोवाक्यंवैरवानोराजसत्तमः ॥ २३ ॥ जगामतत्रयत्रासौ आश्रमेपर्वतोमुनिः
॥ ब्राह्मणैर्वेष्टितःशांतैःप्रजाभिश्वसमंततः ॥२४ ॥ आश्रमोविपुलस्तस्यमु
निभिःसन्निषेवितः ॥ ऋग्वेदिभिर्यजुर्भिश्चसामाथर्वणकोविदैः ॥ २५ ॥ वे
ष्टितोमुनिभिस्तत्रद्वितीयइवपद्मजः ॥ दृष्ट्वातंमुनिशार्दूलंराजावैरवानसत्त
दा ॥२६॥ जगामचावनिंमूर्ध्नादंडवत्प्रणनामच ॥ पप्रच्छकुशलंतस्यसमस्तं
गेष्वसौमुनिः ॥ २७ ॥ राज्येनिष्कंटकत्वंचराज्यंसौरव्यसमन्वितम् ॥ ॥
॥ राजोवाच ॥ ॥ प्रसादात्कुशलंविप्र अंगेषुममसप्तसु ॥२८॥ विभवेष्वनु-
कूलेषुकश्चिद्विघ्नउपस्थितः ॥ एतंमेसंशयंब्रह्मन्प्रष्टुंत्वांचसमागतः ॥२९॥
एवंश्रुत्वानृपवचः पर्वतोमुनिसत्तमः ॥ ध्यानस्तिमिततनेत्रोऽसौभूतंभव्यंवि
चिंतयन् ॥३०॥ मुहूर्त्तमेकंध्यात्वाच प्रत्युवाचनृपोत्तमम् ॥ मुनिरुवाच ॥ ८
जानेऽहंतवराजेंद्रपितुःपापंविकर्मणः ॥३१॥ पूर्वजन्मनितेपित्रासपत्नीकृत

द्वेषतः ॥ कामासक्तेनचैकन्नऋतुभंगः कृतः स्त्रियः ॥३२॥ नाहिदेहीतिज
ल्पंत्याऋतुदानंनराधिप ॥ तेनवैतवपित्रातुनदत्तोऋतुराग्रहात् ॥३३॥ कर्म
णातेनसततंनरकेपतितोह्ययम् ॥ ॥ राजोवाच ॥ ॥ केनवैव्रतदानेनमोक्ष
स्तस्यभवेन्मुने ॥३४॥ निरयात्पापसंयुक्तात्तन्ममाचक्ष्वपृच्छतः ॥ ॥
॥ मुनिरुवाच ॥ ॥ मार्गशीर्षेसितेपक्षेमोक्षा नाम्नीहरेस्तिथिः ॥३५॥ सर्वै-
स्तुतद्व्रतंकृत्वापित्रेपुण्यंप्रदीयताम् ॥ तस्याः पुण्यप्रभावेनमोक्षस्तस्यभवि
ष्यति ॥३६॥ मुनेर्वाक्यंततः श्रुत्वानृपः स्वगृहमागतः ॥ आग्रहायणिकींकृ-
च्छ्रात्प्राप्तोभरतसत्तम ॥३७॥ अंतःपुरचरैः सर्वैः पुत्रदारैस्तथानृपः ॥ व्रतंकृ
त्वाविधानेनपुण्यंदत्वानृपायतत् ॥३८॥ तस्मिन्दत्तेतदापुण्येपुष्पवृष्टिरभूद्दि
वः ॥ वैखानसःपितातेनगतः स्वर्गंस्तुतोगणैः ॥३९॥ राजानमंतरिक्षात्त्वभ्युद्गां
गिरमभाषत ॥ स्वस्त्यस्तुतेपुत्रसदेत्युक्त्वासग्निर्दिवंगतः ॥४०॥ एवंयः कुरुते
राजन्मोक्षामेकादशीमिमाम् ॥ तस्यपापंक्षयंयातिमृतोमोक्षमवाप्नुयात् ॥
४१॥ नान्यापरतराकाचिन्मोक्षदाविमलाशुभा ॥ पुण्यसंख्यांतुराजेन्द्र नजा

नेहंतुयेः कृता ॥४२॥ चिंतामणिसमाह्येषास्वर्गमोक्षप्रदायिनी ॥ ४३ ॥ ॥ 
इतिब्रह्मांडपुराणेमार्गशीर्षशुक्लैकादश्यामोक्षानाम्न्यामाहात्म्यंसमाप्तम् ॥
॥ ॥अथपौषकृष्णैकादशीकथा ॥ ॥युधिष्ठिरउवाच ॥ ॥पौषस्यकृ
ष्णपक्षेतुद्वादशीयाभवेत्प्रभो ॥ किंनामकोविधिस्तस्याः कोदेवस्तत्रपूज्य
ते ॥१॥ एतदाचक्ष्वमेस्वामिन्विस्तरेणाजनार्दन ॥ ॥श्रीकृष्णउवाच ॥ ॥
कथयिष्यामिराजेंद्रभवतः स्नेहकारणात् ॥२॥ तथातुष्टिर्नमेराजन्क्रतुभि
र्भूरिदक्षिणैः ॥ यथातुष्टिर्भवेन्मह्यमेकादश्याव्रतेनवै ॥३॥ तस्मात्सर्वप्र·
यत्नेनकर्तव्योहरिवासरः ॥ पौषस्यकृष्णपक्षेतुद्वादशीयाभवेन्नृप ॥४॥ त
स्याश्चैवचमाहात्म्यंशृणुष्वैकाग्रमानसः ॥ गदितायाश्चवैराजन्नेकादश्योभ
वंतिहि ॥५॥ तासामपिहिसर्वासांविकल्पंनैवकारयेत् ॥ तथापिह्येकाद·
श्याश्चशृणुराजन्कथानकम् ॥६॥ अतः परंप्रवक्ष्यामिपौषस्यैकादशींतव ॥
लोकानांचहितार्थायकथयिष्येविधिंतव ॥७॥ पौषस्यकृष्णपक्षेयासफला 
नामनामतः ॥ नारायणोधिदेवोस्याः पूजयेत्तंप्रयत्नतः ॥८॥ पूर्वेणविधि·

अधोगतिंगता येवैपितृमातृसुतादयः ॥११॥ अस्याःपुण्यप्रभावेनस्वर्गेयांतिनसंशयः ॥ एतस्मात्कारणाद्राजन्महिमानंशृणुष्वतत् ॥१२॥ पुरावैनगरेरम्येगोकुलेन्यवसन्नृपः ॥ वैखानसेतिराजर्षिःपुत्रवत्पालयन्प्रजाः ॥१३॥ द्विजाश्चन्यवसंस्तत्रचतुर्वेदपरायणाः ॥ एवंसराज्यंकुर्वाणोरात्रौतुस्वप्नमध्यतः ॥१४॥ ददर्शजनकंस्वंतु अधोयोनिगतंनृपः ॥ एवंदृष्ट्वातुतंतत्रविस्मयोत्फुल्ललोचनः ॥१५॥ कथयामासवृत्तांतंद्विजाग्रेस्वप्नसंभवम् ॥ राजोवाच ॥ मयातुस्वपितादृष्टोनरकेपतितोद्विजाः ॥ तारयस्वेतिमांतात अधोयोनिगतंसुत ॥१६॥ इतिब्रुवाणःसतदामयादृष्टःपितास्वयम् ॥ तदाप्रभृतिभोविप्रानाहंशमलभाम्यहो ॥१७॥ एतद्राज्यंममम्हदसत्यमसुखंतदा ॥ अश्वागजारथाश्चैवनमांरोचंतिसर्वथा ॥१८॥ नकोशोपिसुखायेतिनकिंत्सुखदंमम ॥ नदारानसुतामह्यंरोचंति द्विजसत्तमाः ॥१९॥ किंकरोमिक्वगच्छामिशरीरंमेतुदह्यते ॥ दानंव्रतंतपोयोगोयेनैवममपूर्वजाः ॥२०॥ मोक्षमायांतिविप्रेंद्रास्तत्देवकथयंतुमे ॥ किंतेनजीवतालोकेसुपुत्रेणबलीयसा ॥२१॥ पितातुय-

पौ·कृ· तेषांमध्येतुयोज्येष्ठःसमहापापसंयुतः ॥२०॥ परदाराभिगामीचवेश्यासंगरतः ए·क·
१० सदा ॥ पितुर्द्रव्यंसपापिष्ठोगमयामाससर्वशः ॥२१॥ असद्वृत्तिरतोनित्यंदेवता
द्विजनिन्दकः ॥ वैष्णवानांचदेवानांनित्यंनिंदारतःसवै ॥२२॥ ईदृग्विधंतदादृ-
ष्ट्वापुत्रंमाहिष्मतोनृपः ॥ लुंपकोनामनाम्नेतिकृतवानत्यमर्षितः ॥२३॥ राज्या
न्निष्काशितस्तेनपित्राचैवापिबंधुभिः ॥ परिवारजनैःसर्वैस्त्यक्तोराज्ञोभया-
दिति ॥२४॥ लुंपकोपितदात्यक्तश्चिंतयामासदुःखकलः ॥ मयाऽत्रकिंप्रकर्तव्यं
त्यक्तःपित्राचबांधवैः ॥२५॥ इतिचिंतापरोभूत्वामतिंपापेतदाकरोत् ॥ मया
तुगमनंकार्यंवनेत्यक्त्वापुरींपितुः ॥२६॥ दिवावनेचरिष्यामिरात्रावपिपितुःपुरं
॥ तस्माद्धनापितुःसर्वंव्यापयिष्येपुरंनिशि ॥२७॥ इत्येवंसमतिंकृत्वालुंपकोदै
वपातितः ॥ निर्जगामपुरात्तस्माद्गतोऽसौगहनंवनम् ॥२८॥ जीवघातकरोनि
त्यंनित्यंस्तेयपरायणः ॥ सर्वंवनंचरंतेनमुषितंपापकर्मणा ॥२९॥ गृहीतश्च
परित्यक्तोराज्ञोमाहिष्मतेर्भयात् ॥ जन्मांतरीयपापेनराज्यभ्रष्टःसपापकृत् ॥ १०
॥३०॥ आमिषाभिरतोनित्यंनित्यंवैफलभक्षकः ॥ [illegible] तस्यदुष्टस्यवासुदेव

स्यसंमतः ॥ ३१ ॥ अश्वत्थोवर्ततेतत्रजीर्णोबहुलवार्षिकः ॥ देवत्वंतस्यवृक्ष-
स्यवर्त्ततेतद्वनेमहत् ॥ ३२ ॥ तत्रैववनिवसंश्चासौलुंपकः पापबुद्धिमान् ॥ एवंका
लक्रमेणैववसतस्तस्यपापिनः ॥ ३३ ॥ दुष्कर्मनिरतस्यास्याकुर्वतः कर्ममंगलं
॥ पौषस्यकृष्णपक्षेतुपूर्वाण्हेसफलादिने ॥ ३४ ॥ दशमीदिवसेराजन्निशायां
शीतपीडितः ॥ लुंपकोवस्त्रहीनोवैनिश्चेष्टोह्यभवत्तदा ॥ ३५ ॥ पीड्यमानस्तुशी
तेन अश्वत्थस्यसमीपतः ॥ ननिद्रानसुखंतस्य गतप्राणइवाभवत् ॥ ३६ ॥ पी
डयन्दशनैर्दंतानेवंचगमितानिशा ॥ भानूदयेपितस्याथनसंज्ञासमजायत ३७
लुंपकोगतसंज्ञस्तुसफलादिवसेतदा ॥ मध्याह्नसमयेप्राप्तेसंज्ञांलेभेसलुंपकः
॥ ३८ ॥ प्राप्तसंज्ञोमुहूर्त्तेनचोत्थितोऽसौतदाऽसनात् ॥ प्रस्खलंश्चपदन्यासैः
पंगुवच्चलितोमुहुः ॥ ३९ ॥ वनमध्येगतस्तत्रक्षत्तृषापीडितोभवत् ॥ नशक्ति
र्जीवघातस्यलुंपकस्यदुरात्मनः ॥ ४० ॥ फलानिभूमौपतितान्याजहारसलुंप-
कः ॥ यावत्सचागतस्तत्रतावदस्तमगाद्रविः ॥ ४१ ॥ किंभविष्यतितातेतिविल
लापातिदुःखितः ॥ फलानितानिसर्वाणिवृक्षमूलेन्यवेदयत् ॥ ४२ ॥ प्रत्युवाच-

फलैरेभिः प्रीयतांभगवान्हरिः ॥ उपविष्टोलुंपकश्चनिद्रांलेभेनवैनिशि ॥ ४३ ॥ ते
नजागरणंजातंभगवान्मधुसूदनः ॥ फलानांपूजनंमेनेसफलायास्तथाव्रतम् ॥
॥ ४४ ॥ कृतमेवंलुंपकेनह्यकस्माद्व्रतमुत्तमम् ॥ तेनव्रतप्रभावेनप्राप्तंराज्यमकं-
टकम् ॥ ४५ ॥ पुण्यांकुरोदयाद्राजन्यथाप्राप्तंतथाशृणु ॥ रवेरुदयवेलायां-
दिव्योऽश्वश्चाजगामह ॥ ४६ ॥ दिव्यवस्तुपरीवारोलुंपकस्यसमीपतः ॥ त
स्थौसतुरगोराजन्वागुवाचाऽशरीरिणी ॥ ४७ ॥ प्राप्नुहित्वंनृपसुतस्वराज्यंह
तकंटकम् ॥ वासुदेवप्रसादेनसफलायाःप्रभावतः ॥ ४८ ॥ पितुःसमीपंगच्छ
त्वंभुंक्ष्वराज्यमकंटकम् ॥ तथेत्युक्त्वासौतत्रदिव्यरूपधरोऽभवत् ॥ ४९ ॥
कृष्णेमतिश्चतस्यासीत्परमावैष्णवीतथा ॥ दिव्याभरणशोभाढ्यस्तातंन-
त्वास्थितोगृहे ॥ ५० ॥ वैष्णवायततोदत्तंपित्राराज्यमकंटकम् ॥ कृतंराज्यं
तुतेनैववर्षाणिसुबहून्यपि ॥ ५१ ॥ हरिवासरसंलीनोविष्णुभक्तिरतःसदा-
॥ मनोज्ञास्तस्यपुत्राःस्युर्दाराःकृष्णप्रसादतः ॥ ५२ ॥ ततःसवार्धकेराज्ये ११
प्राप्तेपुत्रंनिवेश्यच ॥ वनंगतःसंयतात्माविष्णुभक्तिपरायणः ॥ ५३ ॥ साध

नाराजन्कर्तव्यैकादशीजनैः ॥ नागानांचयथाशेषःपक्षिणांगरुडोयथा ॥९॥
यथाऽश्वमेधोयज्ञानांनदीनांजाह्नवीयथा ॥ व्रतानांचतथाराजन्प्रवरैकादशी-
तिथिः ॥१०॥ तेजनाभरतश्रेष्ठममपूज्याश्चसर्वशः ॥ हरिवासरसंयुक्तावर्त्तने-
येजनाभृशं ॥११॥ सफलानामसाप्रोक्तातस्याःपूजाविधिंशृणु ॥ फलैर्मांपूज
येत्तत्रकालदेशोद्भवैःशुभैः ॥१२॥ नारिकेलफलैःशुद्धैस्तथावैबीजपूरकैः ॥
जंबीरैर्दाडिमैश्चैवतथापूगीफलैरपि ॥१३॥ लवंगैर्विविधैश्चान्यैस्तथाचाम्रफ
लादिभिः ॥पूजयेद्देवदेवेशंधूपैर्दीपैर्यथाक्रमम ॥१४॥ सफलायांदीपदानंविशेषे
णप्रकीर्त्तितम् ॥ रात्रौजागरणंतत्रकर्तव्यंचप्रयत्नतः ॥१५॥ यावदुन्मीलयेन्ने
त्रंतावज्जागर्त्तियोनिशि ॥ एकाग्रमानसोभूत्वातस्यपुण्यंशृणुष्वतत् ॥१६॥
तत्समोनास्तिवैयज्ञस्तीर्थंतत्सदृशंनहि ॥ तत्समंनव्रतंकिंचिदिहलोकेनराधि
प ॥१७॥ पंचवर्षसहस्राणितपस्तप्त्वाचयत्फलम् ॥ तत्फलंसमवाप्नोतिसफला
याव्रतेनवै ॥१८॥ श्रूयतांराजशार्दूलसफलायाःकथानकम् ॥ चंपावतीतिवि-
ख्यातापुरीमाहिष्मतस्यच ॥१९॥ माहिष्मतस्यराजर्षेश्चत्वारश्चाभवन्सुताः॥

राचरे ॥ विद्यावंतंयशस्वंतंकरोतिचनरंहरिः ॥ ५ ॥ शृणुराजन्प्रवक्ष्यामिक-
थांपापहरांपराम् ॥ पुरीभद्रावतीनाम्नीराजातत्रसुकेतुमान् ॥ ६ ॥ तस्यरा
ज्ञोऽथराज्ञीचशैब्यानाम्नीतिविश्रुता ॥ पुत्रहीनेनराज्ञाचकालोनीतोमनोरथैः
॥ ७ ॥ नैवात्मजंनृपोलेभेवंशकर्त्तारमेवच ॥ तेनैवराज्ञाधर्मेणचिंतितंबहुका
लतः ॥ ८ ॥ किंकरोमिक्वगच्छामिसुतप्राप्तिः कथंभवेत् ॥ नराष्ट्रेनपुरेसौख्यं
लेभेराजासुकेतुमान् ॥ शैब्ययाकांतयासार्द्धंप्रत्यहंदुःखितोभवत् ॥ ९ ॥ ता
वुभौदंपतीनित्यंचिंताशोकपरायणौ ॥ पितरस्तुजलंदत्तंकवोष्णमुपभुंजते
॥ १० ॥ राज्ञः पश्चान्नपश्यामोयोऽस्मान्संतर्पयिष्यति ॥ इत्येवंसंस्मरंतोस्य-
पितरोदुःखिनोभवन् ॥ तेषांतद्दुःखमूलंचज्ञात्वाराजाप्यतप्यत ॥ ११ ॥ नबां-
धवानमित्राणिनामात्याः सुहृदस्तथा ॥ रोचंतेतेस्यभूपस्यनगजाश्वपदात-
यः ॥ १२ ॥ नैराश्यंभूपतेस्तस्यमनस्येवमजायत ॥ नरस्यपुत्रहीनस्यनास्तिवै
जन्मनःफलम् ॥ १३ ॥ अपुत्रस्यगृहंशून्यंहृदयंदुःखितंसदा ॥ पितृदेवमनु
ष्याणांनानृणात्वंसुतंविना ॥ १४ ॥ तस्मात्सर्वप्रयत्नेनसुतमुत्पादयेन्नरः ॥

इहलोकेयशस्तेषांपरलोकेशुभागतिः ॥१५॥ येषांतुकर्मकर्तॄणांपुण्यंजन्मश
तोद्भवम् ॥ आयुरारोग्यसंपत्तिस्तेषांगेहेप्रवर्त्तते ॥१६॥ पुत्राःपौत्राश्चलोका
श्चभवेयुःपुण्यकर्मणाम् ॥ पुण्यंविनानचप्राप्तिर्विष्णुभक्तिंविनातथा ॥१७
पुत्राणांसंपदोवापिविद्यायाश्चेतिमेमतिः ॥ एवंविचिंत्यमानोसौराजाशर्मनल
ध्ववान् ॥१८॥ प्रत्यूषेचिंतयद्राजानिशीऽथेचिंतयत्तथा ॥ ततश्चात्मविना
शंवैविचार्याथसुकेतुमान् ॥१९॥ आत्मघातेदुर्गतिंचचिन्तयित्वातदानृपः
॥दृष्ट्वाऽत्मदेहंप्रक्षीणमपुत्रत्वंतथैवच ॥२०॥ पुनर्विचार्यात्मबुद्ध्यात्मात्म
नोहितकारणम् ॥ अश्वारूढस्ततोराजाजगामगहनंवनम् ॥२१॥ पुरोहि-
तादयःसर्वेनजानंतिगतंनृपम् ॥ गंभीरेविपिनेराजामृगपक्षिनिषेविते ॥२२॥
विचचारतदातस्मिन्वनेवृक्षान्विलोकयन् ॥ वटानश्वत्थबिल्वांश्चखर्जूरान्प
नसांस्तथा ॥२३॥ बकुलांश्चसदापर्णान्तिंदुकांस्तिलकानपि ॥ शालांस्ता
लांस्तमालांश्चददर्शसरलान्नृपः ॥२४॥ इंगुदीककुभांश्चैवश्लेष्मातबिभी-
तकान् ॥ शल्लकीकरमर्दांश्चपाटलान्खदिरानपि ॥२५॥ शारवांश्चैवपला

शांश्चशोभितान्ददर्शनृपः ॥ मृगव्याघ्रवराहांश्चसिंहान्शाखामृगानपि ॥
॥२६॥ ददर्शभुजगान्राजावल्मीकादभिनिःसृतान् ॥ तथावनगजान्मत्ता-
न्कलभैःसहसंगतान् ॥२७॥ गवयान्कृष्णसारांगान्सृग लान्शशकानपि ॥ व
नमार्जारकान्क्रूरान्शल्लकांश्चमरानपि ॥ २८ ॥ यूथपांश्चचतुर्दंतान्करिणी
गणमध्यगान् ॥ तान्दृष्ट्वाचिंतयामासस्वात्मनःसगजान्नृपः ॥२९॥ तेषां
सविचरन्मध्येराजाशोकमवापह ॥ महदाश्चर्यसंयुक्तंददर्शविपिनंनृपः ॥
३० ॥ क्वचित्शिवारुतंशृण्वन्नुलूकविरुतंतथा ॥ तांस्तान्पक्षिगणान्पश्य
न्बभ्रामवनमध्यगः ॥ ३१ ॥ एवंददर्शगहनंनृपोमध्यंगतेरवौ ॥ क्षुत्तृड्-
भ्यांपीडितोराजाइतश्चेतश्चधावति ॥ ३२ ॥ चिंतयामासनृपतिःसंशुष्कग
लकन्धरः ॥ मयातुकिंकृतंकर्मप्राप्तंदुःखंयदीदृशम् ॥३३॥ मयावैतोषि
तादेवायज्ञैःपूजाभिरेवच ॥ तथवब्राह्मणादानैस्तोषितामिष्टभोजनैः ॥३४
॥ प्रजाश्चैवयथाकालंपुत्रवत्परिपालिताः ॥ कस्माद्दुःखंमयाप्राप्तमीदृशंदा
रुणंमहत् ॥ ३५ ॥ इतिचिंतापरोराजाजगामाथाग्रतोवनम् ॥ सुकृतस्यप्रभा

यित्वातथाऽत्मानंविष्णुलोकंजगामह ॥ गतःकृष्णास्यसान्निध्येयत्रगत्वान
शोचति ॥५४॥ एवंयेवैप्रकुर्वंतिसफलैकादशीव्रतम् ॥ इहलोकेयशःप्रा-
प्यमोक्षंयास्यंत्यसंशयः ॥ ५५ ॥ धन्यास्तेमानवालोकेसफलाव्रतकारिणः
॥ तस्मिन्जन्मनितेमोक्षंलभंतेनात्रसंशयः ॥५६॥ सफलायाश्चमाहात्म्य
श्रवणाद्धिविशांपते ॥ राजसूयफलंप्राप्यवसेत्स्वर्गेचमानवः ॥ ५७ ॥ ॥
इतिश्रीपौषकृष्णाएकादश्यासफलानाम्न्यामाहात्म्यंसम्पूर्णम् ॥ ७ ॥
॥ अथपौषशुक्लैकादशीकथा ॥ ॥ युधिष्ठिरउवाच ॥ ॥ कथितावैत्व
याकृष्णसफलैकादशीशुभा ॥ कथयस्वप्रसादेनशुक्लापौषस्ययाभवेत् ॥१॥
किंनामकोविधिस्तस्याः कोदेवस्तत्रपूज्यते ॥ कस्मैतुष्टोहृषीकेशस्त्वमेवपुरु-
षोत्तमः ॥२॥ ॥ श्रीकृष्णउवाच ॥ ॥ शृणुराजन्प्रवक्ष्यामिशुक्लापौ
षस्ययाभवेत् ॥ तस्याविधिंमहाराजलोकानांचहितायवै ॥ ३ ॥ पूर्वेणविधि
नाराजन्कर्तव्यैषाप्रयत्नतः ॥ पुत्रदेतिचनाम्नाऽसौसर्वपापहरापरा ॥ नाराय
णोधिदेवोस्याः कामदः सिद्धिदायकः ॥ ४ ॥ नातःपरतराकाचित्त्रैलोक्येसच

॥ ॥ एषवैसंशयोमर्त्यंसुतस्योत्पादनेमहान् ॥ यदितुष्टाभवंतोमेपुत्रोवैदी
यतांतदा ॥ ४७ ॥ ॥ मुनयऊचुः ॥ ॥ अस्मिन्नेवदिनेराजन्पुत्रदानामवर्तते
॥ एकादशीतिविख्याताक्रियतांव्रतमुत्तमं ॥ ४८ ॥ आशीर्वादेनचास्माकं
केशवस्यप्रसादतः ॥ अवश्यंतवराजेंद्रपुत्रप्राप्तिर्भविष्यति ॥ ४९ ॥ इत्येवंव
चनात्तेषांकृतंराज्ञाव्रतंशुभम् ॥ द्वादश्यांपारणंकृत्वामुनीन्नत्वापुनःपुनः ॥
॥ ५० ॥ आजगामगृहंराजाराज्ञीगर्भंसमादधौ ॥ मुनीनांवचनेनैवपुत्रदायाः
प्रभावतः ॥ ५१ ॥ पुत्रोजातस्तथाकालेतेजस्वीपुण्यकर्मकृत् ॥ पितरंतोष
यामासप्रजापालोबभूवसः ॥ ५२ ॥ एतस्मात्कारणाद्राजन्कर्तव्यंपुत्रदाव्रत
म् ॥ लोकानांचहितार्थायतवाग्रेकथितंमया ॥ ५३ ॥ एतद्व्रतंतुयेमर्त्याःकुर्वं
तिपुत्रदाभिधम् ॥ तेषांचैवभवेत्पुत्रोह्यवश्यंमोक्षभागिनः ॥ ५४ ॥ पठनाच्छ्र
वणाद्राजन्नश्वमेधफलंलभेत् ॥ ५५ ॥ ॥ इतिश्रीभविष्यो॰ ॥ पुराणेपौ
षशुक्लैकादश्यापुत्रदानाम्न्यामहात्म्यंसंपूर्णम् ॥ ॥ अथमाघकृष्णैकादशी
कथा ॥ ॥ दाल्भ्यउवाच ॥ ॥ मर्त्यलोकेतुसंप्राप्ताःपापंकुर्वंतिजंत

वः ॥ ब्रह्महत्यादिपापैश्च ह्यन्यैश्चविविधैर्युताः ॥ १ ॥ परद्रव्यापहाराश्चपरव्य
सनमोहिताः ॥ कथंनयांतिनरकान्ब्रह्मन्तद्ब्रूहितत्त्वतः ॥ २ ॥ अनायासेनभ
गवन्दानेनाल्पेनकेनचित् ॥ पापंप्रशममायातियेनतद्वक्तुमर्हसि ॥ ३ ॥ ॥
॥ ॥ गभस्तिरुवाच ॥ ॥ साधुसाधुमहाभागगुह्यमेतदुदाहृतम् ॥ यन्न
कस्यचिदाख्यातंब्रह्मविष्ण्वींद्रदेवतैः ॥ ४ ॥ तदहंकथयिष्यामित्वयापृष्टो
द्विजोत्तम ॥ ततोमाघेतुसंप्राप्तेशुचिः स्नातोजितेंद्रियः ॥ ५ ॥ कामक्रोधा
भिमानेर्ष्यालोभपैशून्यवर्जितः ॥ देवदेवंचसंस्मृत्यपादौप्रक्षाल्यवारिणा ॥
॥ ६ ॥ भूमौचपतितंगृह्यगोमयंतत्रमानवः ॥ तिलान्प्रक्षिप्यकार्पासंपिंड
कांश्चैवकारयेत् ॥ ७ ॥ अष्टोत्तरशतंचैवनात्रकार्याविचारणा ॥ ततोमाघे
चसंप्राप्तेह्यार्द्राचैवभवेद्यदि ॥ ८ ॥ मूलेवाकृष्णपक्षस्यैकादश्यांनियमंततः
॥ गृण्हीयात्पुण्यफलदंविधानंतत्रमेशृणु ॥ ९ ॥ देवदेवंसमभ्यर्च्यसुस्नातःप्र
यतःशुचिः ॥ कृष्णनामानिसंकीर्त्यक्षुतजृंभास्वसर्वदा ॥ १० ॥ रात्रौजागर
णंकुर्याद्द्विजैर्होमंचकारयेत् ॥ अर्चयेद्देवदेवेशंशंखचक्रगदाधरम् ॥ ११ ॥

चंदनागरुकर्पूरंनैवेद्यंकृसरंतथा ॥ संस्मृत्यनाम्नाचततः कृष्णाख्येनपुनःपुनः
॥ १२ ॥ कूष्मांडैर्नारिकेलैश्चह्यथवाबीजपूरकैः ॥ सर्वाभावेपिविप्रेंद्रशस्तंपूगी
फलंतथा ॥१३॥ अर्घ्यंदत्वाविधानेनपूजयित्वाजनार्दनम् ॥ कृष्णकृष्णकृ
पालुस्त्वमगतीनांगतिप्रद ॥१४॥ संसारार्णवमग्नानांप्रसीदपरमेश्वर ॥ नम
स्तेपुंडरीकाक्षनमस्तेविश्वभावन ॥१५॥ सुब्रह्मण्यनमस्तेस्तुमहापुरुषपूर्वज
॥ गृहाणार्घ्यंमयादत्तंलक्ष्म्यासहजगत्पते ॥१६ ॥ ततस्तुपूजयेद्विप्रमुदकुंभं
प्रदापयेत् ॥ छत्रोपाहनवस्त्रैश्चकृष्णोमेप्रीयतामिति ॥१७॥ कृष्णाधेनुःप्र
दातव्यायथाशक्त्याद्विजोत्तम ॥ तिलपात्रंद्विजश्रेष्ठदद्यात्तत्रविचक्षणः ॥
॥१८॥ स्नानप्राशनयोःशस्ताःश्वेताःकृष्णास्तिलामुने ॥ तान्प्रदद्यात्प्रय-
त्नेनयथाशक्त्याद्विजोत्तम ॥१९॥ तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते-
॥ तिलस्नायीतिलोद्वर्तीतिलहोमीतिलोदकी ॥२०॥ तिलभुक्तिलदाताचष
ट्तिलाःपापनाशकाः ॥ ॥ नारदउवाच ॥ ॥ कृष्णकृष्णमहाबाहोनम
स्तेभक्तभावन ॥२१॥ षट्तिलैकादशीभूतंकीदृशंफलमश्नुते ॥ सोपाख्या

वेनसरोदृष्टंमनोरमम् ॥३६॥ मानसंस्पर्धमानंचपद्मिनीपरिशोभितम् ॥
कारंडवैश्चक्रवाकैराजहंसैश्चनादितं ॥३७॥ मकरैर्बहुभिर्युक्तमन्यैर्जलचरैर्यु
तम् ॥ समीपेसरसस्तत्रमुनीनामाश्रमान्बहून् ॥३८॥ ददर्शराजालक्ष्मीवा-
न्निमित्तैःशुभशंसिभिः ॥ सव्यात्परतरंचक्षुःप्रस्फुरच्चतथाकरः ॥३९॥ स्फु
रितैस्तस्यराज्ञश्चप्रशंसितंशुभलक्षणम् ॥ तस्यतीरेमुनीन्दृष्ट्वाकुर्वाणान्नैगमं
जपम् ॥४०॥ अवतीर्यहयात्तस्मान्मुनीनामग्रतःस्थितः ॥ पृथक्पृथक्ववं
देसमुनींस्तान्संशितव्रतान् ॥४१॥ कृतांजलिपुटोभूत्वादंडवच्चप्रणम्यसः ॥
हर्षेणमहताविष्टोबभूवन्नृपसत्तमः ॥४२॥ तमूचुस्तेपिमुनयःप्रसन्नास्मोवयं-
तव ॥ कथयस्वाद्यवैराजन्यत्तेमनसिवर्त्तते ॥४३॥ ॥ राजोवाच ॥ ॥
केयूयमग्रतपसःकिमाख्याभवतामपि ॥ किमर्थमागतायूयंवदंतुममतत्त्वतः
॥४४॥ ॥ मुनयऊचुः ॥ ॥ विश्वेदेवावयंराजन्स्नानार्थमिहचागताः ॥
माघोनिकटमायातएतस्मात्पंचमेहनि ॥४५॥ अद्यत्वेकादशीराजन्पुत्रदा
नामनामतः ॥ पुत्रंददात्यसौशक्लापुत्रदापुत्रमिच्छताम् ॥४६॥ राजोवाच

॥ ३२ ॥ मृत्पिंडस्यप्रभावेनगृहंप्रासंमनोरमम् ॥ संजातंचैवविप्रर्षेधान्यकोे
शविवर्जितम् ॥ ३३ ॥ गृहंयावन्निरीक्षेतनकिंचित्तत्रपश्यती ॥ तावद्गृहाद्दि
निष्क्रांताममांतेचागताद्विज ॥ ३४ ॥ क्रोधेनमहताविष्टाइदंवचनमब्रवीत् ॥
मयाव्रतैश्चकृच्छ्रैश्चह्युपवासैरनेकशः ॥ ३५ ॥ पूजयाऽराधितोदेवःसर्व
लोकस्यभावनः ॥ नधनंदृश्यतेकिंचिद्गृहेममजनार्दन ॥ ३६ ॥ ततश्चोक्ता
मयासातुगृहंगच्छयथागतम् ॥ आगमिष्यंतिसुतरांकौतूहलसमन्विताः
॥ ३७॥ देवपत्न्यस्त्वद्द्रष्टुंविस्मयेनसमन्विताः ॥ द्वारंनोद्घाटनीयंहिषट्तिला
पुण्यवाचनात् ॥ ३८ ॥ एवमुक्तागतासातुयदावैमानुषीतदा ॥ अत्रांतरेस
मायातादेवपत्न्यश्चनारद ॥ ३९ ॥ ताभिश्चकथितंतत्रत्वांद्रष्टुंहिसमागताः
॥ द्वारमुद्घाटयत्वंचपश्यामस्त्वांशुभानने ॥ ४० ॥ ॥ मानुष्युवाच ॥
यदिद्रष्टुंमयाकार्यंसत्यंवाच्यंविशेषतः ॥ षट्तिलाव्रतंपुण्यंद्वारोद्घाटनका
रणात् ॥ ४१ ॥ एकापितत्रनवदत्षट्तिलाव्रतनाशतः ॥ अन्ययाकथितं
तत्रद्रष्टव्यामानुषीमया ॥४२॥ ततोद्वारंसमुद्घाट्यदृष्टाताभिश्चमानुषी ॥ न

देवीनचगंधर्वीनासुरीनचपन्नगी ॥ दृष्टापूर्वंतयानारीईदृशीसाद्विजर्षभ ॥
॥४३॥ रूपकांतिसमायुक्ताक्षणेनसमपद्यत ॥ धनंधान्यंचवस्त्रादिसुवर्णरौ
प्यमेवच ॥४४॥ सर्वंभवनसंपन्नंषट्तिलायाःप्रसादतः॥ अतितृष्णानक
र्तव्यावित्तशाठ्यंविवर्जयेत् ॥४५॥ आत्मवित्तानुसारेणतिलान्वस्त्रादिदा
पयेत् ॥ लभंतेचैवमारोग्यंततोजन्मनिजन्मनि ॥४६॥ दारिद्र्यंनचकष्टंचैन
चदौर्भाग्यमेवच ॥ नभवेद्द्विजश्रेष्ठषट्तिलायाउपोषणात् ॥४७॥ अनेन
विधिनाराजन्तिलदानान्नसंशयः ॥ मुच्यतेपातकैःसर्वैर्नात्रकार्याविचार
णा ॥४८॥ दानंचविधिनासम्यक्सर्वपापप्रणाशनम् ॥ नानर्थभूतोना
यासःशरीरेमुनिसत्तम ॥४९॥ ॥इतिश्रीभवि० माघकृष्णैकादशी-
षट्तिलामाहात्म्यंसमाप्तम् ॥ ॥अथमाघशुक्लैकादशीकथा ॥ ॥
॥युधिष्ठिरउवाच ॥ ॥ साधुकृष्णात्वयाप्रोक्ता आदिदेवजगत्पते ॥
स्वेदजा अंडजाश्चैवउद्भिजाश्चजरायुजाः ॥१॥ तेषांकर्ताविकर्ताचपाल-
कःक्षयकारकः ॥ माघस्यकृष्णपक्षेतुषट्तिलाकथितात्वया ॥२॥ शुक्ले

चैकादशीयाचकथयस्वप्रसादतः ॥ किंनामकोविधिस्तस्याः कोदेवस्तत्रपू
ज्यते ॥ ३ ॥ ॥श्रीकृष्णउवाच ॥ ॥ कथयिष्यामिराजेंद्रशुक्लेमाघस्य
याभवेत् ॥ जयानाम्नीतिविख्यातासर्वपापहरापरा ॥ ४ ॥ पवित्रापापहं
त्रीचपिशाचत्वविनाशिनी ॥ नैवतस्याव्रतेचीर्णेप्रेतत्वंजायतेनृणाम् ५
नातःपरतराकाचित्पापघ्नीमोक्षदायिनी ॥ एतस्मात्कारणाद्राजन्कर्तव्ये
यंप्रयत्नतः ॥ ६ ॥ श्रूयतांराजशार्दूलकथांपौराणिकींशुभाम् ॥ पंकजे
चपुराणेस्यामहिमाकथितोमया ॥ ७ ॥ एकदानाकलोकेवैइंद्रोराज्यंच
कारह ॥ देवास्तत्रसुखेनैवनिवसंतिमनोरमे ॥ ८ ॥ पीयूषपाननिरता
ह्यप्सरोगणसेविताः ॥ नंदनंतुवनंतत्रपारिजातोपशोभितम् ॥ ९ ॥ र
मयंतिरमंत्यत्रह्यप्सरोभिर्दिवौकसः ॥ एकदारममाणोऽसौदेवेंद्रःस्वेच्छ
यानृप ॥ १० ॥ नर्तयामासहर्षात्सपंचाशत्कोटिनायिकाः ॥ गन्धर्वास्तत्र
गायंतिगन्धर्वःपुष्पदंतकः ॥ ११ ॥ चित्रसेनश्चतत्रैवचित्रसेनसुतानथा ॥ १७
मालिनीतिचनाम्नातुचित्रसेनस्यकामिनी ॥ १२ ॥ मालिन्यांतुसमुत्पन्ना

नंममब्रूहियदितुष्टोऽसियादव ॥ २२ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ शृणुराज
न्यथावृत्तंहृष्टंतत्कथयामिते ॥ मृत्युलोकेपुराह्यासीद्ब्राह्मणीतत्रनारद ॥२३
॥ व्रतचर्यारितानित्यंदेवपूजारतासदा ॥ मासोपवासनिरताममभक्ताचसर्व
दा ॥ २४ ॥ कृष्णोपवाससंयुक्काममपूजापरायणा ॥ शरीरंक्लेशितंनित्यमुप
वासैर्द्विजोत्तम ॥२५ ॥ दीनानांब्राह्मणानांचकुमारीणांचभक्तितः ॥ गृहा-
दिकंप्रयच्छंतीसर्वकालंमहामतिः ॥२६॥ अतिकृच्छ्ररतासातुसर्वकालेषुवै
द्विज ॥ शुद्धमस्याःशरीरंहिव्रतैःकृच्छ्रैर्नसंशयः ॥२७॥ अर्थिनंवैष्णवंलोकं
कायक्लेशेनवैत्वया ॥ नदत्तमन्नदानंहियेनतृप्तिःपराभवेत् ॥ २८ ॥ एतज्ज्ञा
तंमयाब्रह्मन्मृत्युलोकमुपागतः ॥ कापिलंरूपमास्थायभिक्षापात्रेणयाचिता
॥२९॥ ॥ ब्राह्मण्युवाच ॥ ॥ कस्मात्त्वमागतोब्रह्मन्वदयस्मात्समाग-
तः ॥ पुनरेवमयाप्रोक्तंदेहिभिक्षांचसुंदरि ॥ ३० ॥ तयाकोपेनमहतामृत्पिं
डस्ताम्रभाजने ॥ क्षिप्तोयावत्तयादेव्यापुनःस्वर्गंगतोद्विज ॥ ३१ ॥ ततःका
लेनमहतातापसीसुमहाव्रता ॥ कदाचित्स्वर्गमायाताव्रतचर्याप्रसादतः ॥

मा·श्रु· कुपितश्चतयोरित्थंशापंदास्यन्निदंजगौ ॥२३॥ धिग्वांपापरतौमूढावाज्ञा ए·क·
१८ भंगकरौमम॥ युवांपिशाचौभवतांदंपतीरूपधारिणौ ॥२४॥ मृत्युलोक-
मनुप्राप्तौभुंजानौकर्मणःफलम् ॥ एवंमघवताशप्तावुभौदुःखितमान-
सौ ॥२५॥ हिमवंतमनुप्राप्तौविंद्रशापविमोहितौ ॥ उभौपिशाचतांप्रा
प्तौदारुणंदुःखमेवच ॥२६॥ संतप्तमनसौतत्रमहाकृच्छ्रगतावुभौ ॥गं
धरसंचस्पर्शञ्चनजानंतौविमोहितौ ॥२७॥पीड्यमानौतुदाहेनदेहपातक
रेणच॥ तौननिद्रासुखंप्राप्तौकर्मणातेनपीडितौ ॥२८॥ परस्परंवादमा-
नौचेरतुर्गिरिगह्वरम् ॥ पीड्यमानौतुशीतेनतुषारप्रभवेनतौ ॥२९॥ दं
तघर्षंप्रकुर्वाणौरोमांचितवपुर्धरौ ॥ ऊचेपिशाचःशीतार्तःस्वपत्नींतुपिशा
चिकाम् ॥३०॥ किमावाभ्यांकृतंपापमत्यंतंदुःखदायकम् ॥ येनप्राप्तंपि
शाचत्वंस्वेनदुष्कृतकर्मणा ॥३१॥ नरकंदारुणंमत्वापिशाचत्वंचगर्हितं
॥ तस्मात्सर्वप्रयत्नेनपापंनैवसमाचरेत् ॥३२॥ इतिचिंतापरौतत्रस्थास्तौ १८
दुःखेनकर्षितौ ॥ दैवयोगात्तयोःप्राप्तामाघस्यैकादशीसिता ॥३३॥ज-

यानाम्नीतिविख्यातातिथीनामुत्तमातिथिः ॥ तस्मिन्दिनेतुसंप्राप्तेतावा
हारविवर्जितो ॥ ३४ ॥ आसातेतत्रनृपतेजलपानविवर्जितो ॥ नकृतोजीव-
घातश्चनपत्रफलभक्षणम् ॥ ३५ ॥ अश्वत्थस्यसमीपेतुपतितोदुःखसंयु-
तौ ॥ रविरस्तंगतोराजन्तथैवस्थितयोस्तयोः ॥ ३६ ॥ प्राप्तान्चैवनिशाघो
रादारुणाशीतकारिणी ॥ वेपमानौतुतौतत्रहिमेनचजडीकृतौ ॥ ३७ ॥ प
रस्परेणसल्लग्नौगात्रयोर्भुजयोरपि ॥ ननिद्रांनरतिंतत्रनतौसौख्यमविंद
ताम् ॥ ३८ ॥ एवंतौराजशार्दूलशापेनेंद्रस्यपीडितौ ॥ इत्थंतयोर्दुःखि
तयोर्निर्जगामतदानिशी ॥ जयायास्तुव्रतेचीर्णेरात्रौजागरणेकृते ॥ ३९ ॥
तयोर्व्रतप्रभावेनयथाह्यासीत्तथाशृणु ॥ द्वादशीदिवसेप्राप्तेताभ्यांचीर्णे
जयाव्रते ॥ ४० ॥ विष्णोःप्रभावान्नृपतेःपिशाचत्वंतयोर्गतम् ॥ पुष्पवं-
तीमाल्यवांश्चपूर्वरूपौबभूवतुः ॥ ४१ ॥ पुरातनस्नेहयुतौपूर्वालंकारसंयु
तौ ॥ विमानमधिरूढौतावप्सरोगणसेवितौ ॥ ४२ ॥ स्तूयमानौतुगंधर्वै-
स्तुंबरुप्रमुखैस्तथा ॥ हावभावसमायुक्तौगतौनाकेमनोरमे ॥ ४३ ॥ देवें

द्रस्याग्रतोगत्वाप्रणामंचक्रतुर्मुदा ॥ तथाविधौतुतौदृष्ट्वामघवाविस्मितो
ऽब्रवीत् ॥४४॥ ॥इंद्रउवाच॥ वदतंकेनपुण्येनपिशाचत्वंविनिर्गतौ॥मम
शापवशंप्राप्तौकेनदेवेनमोचितौ ॥४५॥ ॥माल्यवानुवाच॥ ॥
वासुदेवप्रसादेनजयायाःसुव्रतेनच ॥ पिशाचत्वंगतंस्वामिन्सत्यंभक्ति
प्रसादतः ॥४६॥ इतिश्रुत्वावचस्तस्यप्रत्युवाचसुरेश्वरः ॥ पवित्रौपाव
नौजातौवंदनीयौममापिच ॥४७॥ हरिवासरकर्तारौविष्णुभक्तिपराय
णौ ॥ हरिभक्तिरतायेचशिवभक्तिरतास्तथा ॥४८॥ अस्माकमपिते
मर्त्याःपूज्यावंद्यानसंशयः ॥ विहरस्वयथासौख्यंपुष्पवत्यासुरालये ॥
॥४९॥ एतस्मात्कारणाद्राजन्कर्तव्योहरिवासरः ॥ जयाव्रतंतुराजेंद्र
ब्रह्महत्यापहारकम् ॥५०॥ सर्वदानानिदत्तानियज्ञास्तेनकृतान्नृप ॥
सर्वतीर्थेषुसुस्नातःकृतंयेनजयाव्रतम् ॥५१॥ यःकरोतिनरोभक्त्या
श्रद्धायुक्तोजयाव्रतम् ॥ कल्पकोटिशतंयावद्वैकुंठेमोदतेध्रुवम् ॥५२
पठनाच्छ्रवणाद्राजन्नग्निष्टोमफलंलभेत् ॥५३ ॥ ॥इतिश्री-

पुष्पवान्निति नामतः ॥ पुष्पदंतस्य पुत्रो वै माल्यवान्नामनामतः ॥ १३ ॥
गंधर्वी पुष्पवत्याख्या माल्यवत्यतिमोहिता ॥ कामस्य च शरैस्तीक्ष्णैर्विद्धां
गी सा बभूव ह ॥१४॥ तया भावकटाक्षैश्च माल्यवांश्च वशीकृतः ॥ लाव-
ण्यरूपसंपन्ना तस्या रूपं नृप शृणु ॥१५॥ बाहू तस्यास्तु कामेन कंठपाशौ
कृताविव ॥ चंद्रवद्वदनं तस्या नयने श्रवणायते ॥ १६॥ कर्णौ तु शोभितौ
तस्याः कुंडलाभ्यां नृपोत्तम ॥ कंबुग्रीवायुता नैव दिव्याभरणभूषिता ॥१७
॥ पीनोन्नतौ कुचौ तस्या मुष्टिमात्रं च मध्यमम् ॥ नितंबौ विपुलौ तस्या विस्ती
र्णं जघनस्थलम् ॥१८॥ चरणौ शोभमानौ तौ रक्तोत्पलसमद्युती ॥ ईदृ-
श्या पुष्पवत्या च माल्यवानतिमोहितः ॥१९॥ शक्रस्य परितोषाय नृत्यार्थं
तौ समागतौ ॥गायमानौ च तौ तत्र स्वप्सरोगणसंगतौ ॥२०॥ न शुद्धगानं
गायेतां चित्तभ्रमसमन्वितौ ॥ बद्धदृष्टी तथाऽन्योऽन्यं कामबाणवशं गतौ
॥२१॥ ज्ञात्वा लेखवर्षभस्तत्र संगतं मानसं तयोः ॥ तालः कालः क्रियामान
लोपाङ्गीनाव भंजनात् ॥२२॥ चिंतयित्वा तु मघवा अवज्ञानं तथाऽऽत्मनः ॥

फा॰कृ॰ जटायुषंतत्र ददर्शविगतायुषम् ॥ कबंधोनिहतःपश्चात्भ्रमतारण्यमध्यतः ए॰क॰
२० ॥ १० ॥ राज्ञेविज्ञाप्यतत्सर्वंसोपिमृत्युवशंगतः ॥ सुग्रीवेणसमंसख्यंरामस्य
समजायत ॥ ११ ॥ वानराणामनीकानिरामार्थंसंगतानिवै ॥ ततोहनूम
ताद्दृष्टालंकोद्यानेतुजानकी ॥ १२ ॥ रामसंज्ञापनंतस्यैदत्तंकर्ममहत्कृतम् ॥
समेत्यरामेणापुनःसर्वंतत्रनिवेदितम् ॥ १३ ॥ अथश्रुत्वारामचन्द्रोवाक्यंचैव
हनूमतः ॥ सुग्रीवानुमतेनैवप्रस्थानंसमरोचयत् ॥ १४ ॥ सगत्वावानरैः
सार्द्धंतीरंनदनदीपतेः ॥ दृष्ट्वाब्धिंदुस्तरंरामोविस्मितोभूत्कपिप्रियः ॥
॥ १५ ॥ प्रोत्फुल्ललोचनोभूत्वालक्ष्मणंवाक्यमब्रवीत् ॥ सौमित्रेकेनपुण्येन
तीर्यतेवरुणालयः ॥ १६ ॥ अगाधसलिलःपूर्णोनक्रैरूर्मिभिःसमाकुलः ॥
उपायंनैवपश्यामियेनैवंसुतरोभवेत् ॥ १७ ॥ ॥ लक्ष्मणउवाच ॥ ॥
आदिदेवस्त्वमेवासिपुराणपुरुषोत्तम ॥ बकदाल्भ्योमुनिश्चात्रवर्त्ततेद्वीप
मध्यतः ॥ १८ ॥ अस्मात्स्थानाद्योजनार्धमाश्रमस्तस्यराघव ॥ अनेनदृ २०
ष्टाब्रह्माणोबहवोरघुनन्दन ॥ १९ ॥ तंपृच्छगत्वाराजेंद्रपुराणमृषिपुंगवं

॥ इतिवाक्यंततः श्रुत्वालक्ष्मणस्यातिशोभनम् ॥२० ॥ जगामराघवोद्रष्टुंब
कदाल्भ्यमहामुनिम् ॥ प्रणनाममुनिंमूर्ध्नारामोविष्णुमिवामराः ॥ २१ ॥ मु
निर्ज्ञात्वाततोरामंपुराणपुरुषोत्तमम् ॥ केनापिकारणेनैवप्रविष्टंमानुषींतनु
म् ॥२२॥ उवाचसऋषिस्तत्रकुतोरामतवागमः॥ ॥ रामउवाच ॥ ॥
त्वत्प्रसादादहंविप्रवरुणालयसन्निधिम् ॥ २३॥ आगतोस्मिससैन्योऽत्र
लंकांजेतुंसराक्षसीम् ॥ भवतश्चानुकूल्येनतीर्यतेऽब्धिर्यथामया ॥२४ ॥
तमुपायंवदमुनेप्रसादंकुरुसुव्रत ॥ एतस्मात्कारणादेवद्रष्टुंत्वाहमुपागतः ॥
॥२५॥ कथयिष्याम्यहंराम व्रतानामुत्तमंव्रतम् ॥ कृतेनयेनसहसाविजय
स्तेभविष्यति ॥२६॥ लंकांजित्वाराक्षसांश्चदीर्घकीर्तिमवाप्स्यसि ॥ एका
ग्रमानसोभूत्वाव्रतमेतत्समाचर ॥२७॥ फाल्गुनस्यासितेपक्षेविजयैका
दशीभवेत् ॥ तस्याव्रतेकृतेरामविजयस्तेभविष्यति ॥ २८ ॥ निःसंशयंस
मुद्रंचतरिष्यसिसवानरः ॥ विधिस्तुश्रूयतांरामव्रतस्यास्यफलप्रदः ॥२९
॥ दशमीदिवसेप्राप्तेकुंभमेकंचकारयेत् ॥ हैमंवाराजतंवापिताम्रंवाप्यथमृ

न्मयम् ॥३०॥ स्थापयेच्छोभितंकुंभंजलपूर्णंसपल्लवम् ॥ तस्योपरिन्यसेद्दे
वंहैमंनारायणंप्रभुम् ॥३१॥ एकादशीदिनेप्राप्तेप्रातःस्नानंसमाचरेत् ॥ नि-
श्चलंस्थापयेत्कुंभंगन्धमाल्यानुलेपनैः ॥३२॥ दाडिमैर्नारिकेलैश्चपूजयेच्च
विशेषतः ॥ सप्तधान्यान्यधस्तत्रयवानुपरिविन्यसेत् ॥३३॥ गंधैर्धूपैस्तथा
दीपैर्नैवेद्यैर्विविधैरपि ॥ कुंभाग्रेतद्दिनंरामनीयतेभक्तिभावतः ॥३४ ॥रात्रौ
जागरणंतत्रतस्याग्रेकारयेद्बुधः ॥द्वादशीदिवसेप्राप्तेमार्तंडस्योदयंप्रति ॥
३५॥ नीत्वाकुंभंजलोद्देशेनद्यांप्रस्रवणेतथा ॥ तडागेस्थापयित्वावापूजयि
त्वायथाविधि ॥३६॥ दद्यात्सदैवतंकुंभंब्राह्मणेवेदपारगे ॥ कुंभेनसहराजेंद्र
महादानानिदापयेत् ॥ ३७ ॥ अनेनविधिनारामयूथपैःसहसंगतः ॥ कुरुव्रतं
प्रयत्नेनविजयस्तेभविष्यति ॥३८॥ इतिश्रुत्वावचोरामोयथोक्तमकरोत्तथा
॥ कृतेव्रतेसविजयीबभूवरघुनंदनः ॥३९॥ अनेनविधिनाराजन्येकुर्वंतिन
राव्रतम् ॥ इहलोकेजयस्तेषांपरलोकस्तथाक्षयः ॥४०॥ एतस्मात्कारणात्तु
त्वकर्तव्यंविजयाव्रतम् ॥ विजयायाश्चमाहात्म्यंसर्वकिल्बिषनाशनम् ॥ पठना

भविष्योत्तरपु० माघशुक्लैका० जयामाहात्म्यंसमाप्तम् ॥ ॥अथफाल्गुन
कृष्णैकादशीकथा ॥ ॥फाल्गुनस्यासितेपक्षेकिंनामैकादशीभवेत् ॥ वा
सुदेवप्रसादेनकथयस्वप्रसादतः ॥ १ ॥ कथयिष्यामिराजेंद्र कृष्णायाफाल्गु
नेभवेत् ॥ विजयेतिचसाप्रोक्ताकर्तॄणांजयदासदा ॥ २ ॥ तस्याश्चव्रतमा
हात्म्यंसर्वपापहरंपरम् ॥ ॥श्रीकृष्णउवाच ॥ ॥ नारदः परिपप्रच्छ
ब्रह्माणंकमलासनं ॥ ३ ॥ फाल्गुनस्यासितेपक्षेविजयानामयातिथिः ॥
तस्याव्रतंसुरश्रेष्ठकथयस्वप्रसादतः ॥ ४ ॥ इतिपृष्टोनारदेनप्रत्युवाचपि-
तामहः ॥ ॥ ब्रह्मोवाच ॥ ॥ शृणुनारदवक्ष्यामिकथांपापहरांपराम्
॥ ५ ॥ पुरातनंव्रतंह्येतत्पवित्रंपापनाशनम् ॥ यन्नकस्यचिदाख्यातंमये
तद्विजयाव्रतम् ॥ ६ ॥ जयंददातिविजयानॄणांचैवनसंशयः ॥ रामस्तपोव
नंयातोवर्षाण्येवचतुर्दश ॥ ७ ॥ न्यवसत्पंचवट्यांतुससीतश्चसलक्ष्मणः
॥ तत्रैववसतस्तस्यराघवस्यमहात्मनः ॥ ८ ॥ रावणेनहृताभार्यासीता
नाम्नीतपस्विनी ॥ तेनदुःखेनरामोसौमोहमभ्यागतस्तदा ॥ ९ ॥ भ्रमन्

न्राज्यंप्रशासति ॥९॥ विष्णुभक्तिरतालोकातस्मिन्पुरवरेसदा ॥हरिपूजा
रताश्चैवराजाचापिविशेषतः ॥१०॥ नशुक्लांनैवकृष्णांचद्वादशींभुंजतेजनाः
॥सर्वधर्मान्परित्यज्यहरिभक्तिपरायणाः ॥११॥एवंसंवत्सराजग्मुर्बहवोरा
जसत्तम ॥जनस्यसौख्ययुक्तस्यहरिभक्तिरतस्यच ॥१२॥ अथकालेनसं
प्राप्ताद्वादशीपुण्यसंयुता ॥ फाल्गुनस्यसितेपक्षेनाम्नात्वामलकीस्मृता ॥
॥१३॥ तामवाप्यजनाःसर्वेबालकाःस्थविरान्नृप ॥ नियमंचोपवासंचसर्वेचक्रु
र्नराविभो ॥१४॥ महाफलंव्रतंस्नात्वास्नानंकृत्वानदीजले ॥ तत्रदेवालये
राजालोकयुक्तोमहाप्रभुः ॥१५॥ पूर्णकुंभमवस्थाप्यछत्रोपानहसंयुतम्
॥पंचरत्नसमायुक्तंदिव्यगन्धादिवासितम् ॥१६॥ दीपमालान्वितंचैवजामद-
ग्न्यसमन्विताम् ॥पूजयामासुरव्यग्राधात्रींचमुनिभिर्जनाः ॥१७॥ जामद
ग्न्यनमस्तेऽस्तुरेणुकानंदवर्धन ॥ आमलकीकृतच्छाय भुक्तिमुक्तिवरप्रद१८
॥ धात्रीधातृसमुद्भूतेसर्वपातकनाशिनि ॥ आमलकिनमस्तुभ्यंगृहाणार्घ्यो
दकंमम ॥१९॥ धात्रिब्रह्मस्वरूपासित्वंतुरामेणपूजिता ॥प्रदक्षिणाविधाने

नसर्वपापहराभव ॥ २० ॥ तत्रजागरणंचक्रुर्जनाः सर्वेस्वभक्तितः ॥ एतस्मिन्ने
वकालेतुव्याधस्तत्रसमागतः ॥ २१ ॥ क्षुधाश्रमपरिव्याप्तोमहाभारेणपीडितः
॥ कुटुंबार्थेजीवघातीसर्वधर्मबहिष्कृतः ॥ २२ ॥ जागरंतत्रसोपश्यदामल-
क्यांक्षुधान्वितः ॥ दीपमालाकुलंदृष्ट्वातत्रैवनिषसादसः ॥ २३ ॥ किमेतदि-
तिसंचिंत्यप्राप्तोविस्मयतांभृशम् ॥ ददर्शकुंभतत्रस्थंदेवंदामोदरंतथा ॥ २४ ॥
ददर्शामलकीवृक्षंतत्रस्थांश्चैवदीपकान् ॥ वैष्णवंचतथाऽख्यानंसुश्रावपठतां
नृणाम् ॥ २५ ॥ एकादश्याश्चमाहात्म्यंसुश्रावक्षुधितोऽपिसन् ॥ जाग्रतस्त
स्यसारात्रिर्गताविस्मितचेतसः ॥ २६ ॥ ततः प्रभातसमयेविविशुर्नगरंजनाः
॥ व्याधोऽपिगृहमागत्यबुभुजेप्रीतमानसः ॥ २७ ॥ ततः कालेनमहताव्या
धः पंचत्वमागतः ॥ एकादश्याः प्रभावेनरात्रौजागरणेनच ॥ २८ ॥ राज्यंप्रपे
देसुमहच्चतुरंगबलान्वितम् ॥ जयंतीनामनगरीतत्रराजाविदूरथः ॥ २९ ॥ त
स्मात्सतनयोजज्ञेनाम्नावसुरथोबली ॥ चतुरंगबलोपेतोधनधान्यसमन्वितः
॥ ३० ॥ दशायुतानिग्रामाणांबुभुजेभयवर्जितः ॥ तेजसाऽदित्यसदृशःकांत्या

चंद्रसमप्रभः ॥३१॥ पराक्रमेविष्णुसमः क्षमयापृथिवीसमः ॥ धार्मिकःसत्य
वादीचविष्णुभक्तिपरायणः ॥३२॥ ब्रह्मज्ञःकर्मशीलश्चप्रजापालनतत्परः ॥य
जतेविविधान्यज्ञान्सराजापरदर्पहा ॥३३॥ दानानिविविधान्येवप्रददातिचस
र्वदा ॥ एकदामृगयांयातोदैवमार्गपरिच्युतः ॥३४॥ नदिशोनैवविदिशोवेत्ति
तत्रमहीपतिः ॥उपधार्यचदोर्मूलमेकाकीगहनेवने ॥३५॥ श्रांतश्चक्षुधितोऽ
त्यन्तंसंविवेशमहीपतिः ॥ अत्रांतरेम्लेच्छगणःपर्वतांतरवासभुक् ॥३६॥ आ
ययौतत्रयत्रास्तेराजापरबलार्दनः ॥ कृतवैरास्तुतेराज्ञासर्वदैवोपतापिताः ॥३७
॥ परिवार्यततस्तस्थूराजानंभूरिदक्षिणम् ॥ हन्यतांहन्यतांचायंपूर्ववैरविरुद्ध
धीः ॥ ३८॥ अनेननिहताःपूर्वेपितरोभ्रातरःसुताः ॥ पौत्राश्चभागिनेयाश्च
मातुलाश्चनिपातिताः ॥३९॥ निष्कासिताश्चस्वस्थानाद्विक्षिप्ताश्चदिशोदश॥
एतावदुक्त्वातेसर्वेतत्रैनंहंतुमुद्यताः ॥४०॥ पाशैश्चपट्टिशैःखड्गैर्बाणैर्धनुषिसं
स्थितैः ॥ सर्वतोऽरिगणास्तेचराजानंहन्तुमुद्यताः ॥४१॥ सर्वाणिशस्त्राणिस
माद्रवंतिनवैशरीरेप्रविशंतितस्य ॥ तेचापिसर्वेहतशस्त्रसंघाम्लेच्छाबभूवु

च्छ्रवणात्तस्यवाजपेयफलंलभेत् ॥ ४१ ॥ ॥ इतिश्रीस्कंदपुराणेफाल्गुनकृ-
ष्णैकादशीविजयामाहात्म्यंसमाप्तम् ॥ ॥ अथफाल्गुनशुक्लैकादशीकथा
॥ मान्धातोवाच ॥ ॥ वदब्रह्मन्महाभागयेनश्रेयोभवेन्मम ॥ ईदृग्ब्रूहिब्र
ह्मयोनेयद्यनुग्रहतामयि ॥ १ ॥ सरहस्यंसेतिहासंव्रतानामुत्तमंव्रतम् ॥
॥ वसिष्ठउवाच ॥ ॥ कथयाम्यधुनातुभ्यंसर्वव्रतफलप्रदम् ॥ २ ॥ आमल
क्याव्रतंराजन्महापातकनाशनम् ॥ मोक्षदंसर्वलोकानांगोसहस्रफलप्रदम्
॥ ३ ॥ अत्रैवोदाहरंतीममितिहासंपुरातनम् ॥ यथामुक्तिमनुप्राप्तोव्याधोहिं
सासमन्वितः ॥ ४ ॥ विदिशंनामनगरंहृष्टपुष्टजनैर्वृतम् ॥ ब्राह्मणैः क्षत्रियै
र्वैश्यैः शूद्रैश्चसमलंकृतम् ॥ ५ ॥ रुचिरंनृपशार्दूलब्रह्मघोषनिनादितम् ॥ न
नास्तिकोदुष्कृतिकस्तस्मिन्पुरवरेसदा ॥ ६ ॥ तत्रसोमान्वयोराजाविख्या
तःशाशबिंदुकः ॥ राजाचैत्ररथोनामधर्मात्मासत्यसंगरः ॥ ७ ॥ नागायुत
बलःश्रीमान्शस्त्रशास्त्रार्थपारगः ॥ तस्मिन्शासतिधर्मज्ञेधर्मात्मनिधराप्र
भो ॥ ८ ॥ कृपणोनैवकुत्रापिदृश्यतेनैवनिर्धनः ॥ सुकालःक्षेममारोग्यंतस्मि

राजन्येकुर्वंतिनरोत्तमाः ॥ तेयांतिवैष्णवंलोकंनात्रकार्याविचारणा ॥५३॥
॥ इतिश्रीब्रह्मांडपुराणेफाल्गुनशु० आमलकीमाहात्म्यंसमाप्तम् ॥ ॥
अथचैत्रकृष्णैकादशीकथा ॥ ॥ युधिष्ठिरउवाच ॥ ॥ फाल्गुन-
स्यासितेपक्षेश्रुतासाऽमलकीमया ॥ चैत्रस्यकृष्णपक्षेतुकिंनामैकादशीभ
वेत् ॥१॥ श्रीकृष्णउवाच ॥ ॥शृणुराजेंद्रवक्ष्यामिअज्ञातपापनाशनम्॥
यल्लोमशोऽब्रवीत्पृष्टोमांधात्राचक्रवर्तिना ॥२॥ ॥मान्धातोवाच ॥ ॥
भगवन्श्रोतुमिच्छामिलोकानांहितकाम्यया ॥ चैत्रमास्यसितेपक्षेकिंनामै-
कादशीभवेत् ॥३॥ कोविधिःकिंफलंतस्याःकथयस्वप्रसादतः ॥ लोमशउ-
वाच ॥ ॥श्रूयतांराजशार्दूलकामदासिद्धिदांतथा ॥ कथांविचित्रांशुभदां
पापहांधर्मदायिनीम् ॥४॥ पुराचैत्ररथोद्देशेअप्सरोगणसेविते ॥ वसन्त-
समयेप्राप्तेपुष्पैराकुलितेवने ॥५॥गन्धर्वकन्यास्तत्रैवरमंतिसहकिन्नरैः ॥
पाकशासनमुख्याश्चक्रीडंतेचदिवौकसः ॥६॥ नापरंसुन्दरंकिंचिद्वनाच्चैत्र २४
रथाद्वनम् ॥ तस्मिन्वनेतुमुनयस्तपंतिबहुलंतपः ॥७॥ सहदेवैस्तुमघवा-

रमतेमधुमाधवौ ॥ एकोमुनिवरस्तत्रमेधावीनामनामतः ॥ ८ ॥ अप्सरास्तंमुनिवरं
मोहनायोपचक्रमे ॥ मंजुघोषेतिविख्याताभावंतस्यविचिन्वती ॥ ९ ॥ क्रोशमात्रं
स्थितास्तस्यभयादाश्रमसन्निधौ ॥ गायंतीमधुरंसाधुपीडयंतीविपंचिकाम् ॥
॥ १० ॥ गायंतीतामथालोक्यपुष्पचन्दनवेष्टिताम् ॥ कामोऽपिविजयाकांक्षीशि
वभक्तंमुनीश्वरम् ॥ ११ ॥ तस्याःशरीरसंसर्गीशिववैरमनुस्मरन् ॥ तुल्यभ्रु
वोर्धनुःकोटौगुणंकृत्वाकटाक्षकम् ॥ १२ ॥ मार्गणौनयनेकृत्वापक्ष्मयुक्तौयथा
क्रमम् ॥ कुचौकृत्वापटकुटींविजयायोपसंस्थितः ॥ १३ ॥ मंजुघोषाऽभवत्तत्र
कामस्यैववरूथिनी ॥ मेधाविनंमुनिंदृष्ट्वासापिकामेनपीडिता ॥ १४ ॥ यौवनो
द्भिन्नदेहोऽसौमेधाव्यतिविराजते ॥ सितोपवीतसहितोदंडीस्मरइवापरः ॥ मे
धावीवसतिस्मासौच्यवनस्याश्रमेशुभे ॥ १५ ॥ मंजुघोषास्थितातत्रदृष्ट्वातंमु
निपुंगवम् ॥ १६ ॥ मदनस्यवशंप्राप्तामंदंमंदमयायत ॥ रणद्वलयसंयुक्तासिंजन्नू
पुरमेखला ॥ १७ ॥ गायंतीभावसंयुक्तांविलोक्यमुनिपुंगवः ॥ मदनेनससैन्येन
नीतोमोहवशंबलात् ॥ १८ ॥ मंजुघोषासमागम्यमुनिंदृष्ट्वातथाविधम् ॥ हास्य

भावकटाक्षैस्तुमोहयामासचांगना ॥१९॥ अधःसंस्थाप्यवीणांसासस्वजेतं
मुनीश्वरम् ॥ वल्लीवाकुलितावृक्षंवातवेगेनवेपिता ॥२०॥ सोपिरेमेतयासार्द्धं
मेधावीमुनिपुंगवः ॥ तस्मिन्नेववनोद्देशेदृष्ट्वातद्देहमुत्तमम् ॥२१॥ शिवतत्त्वं
तंतस्यकामतत्त्ववशंगतः ॥ ननिशांनदिनंसोपिरमन्जानातिकामुकः ॥२२॥
बहुलश्चगतःकालोमुनेराचारलोपकः ॥ मंजुघोषादेवलोकंगमनायोपचक्रमे ॥
॥२३॥ गच्छंतीप्रत्युवाचाथरमंतंमुनिपुंगवम् ॥ आदेशोदीयतांमह्यंस्वधामग
मनायमे ॥२४॥ ॥मेधाव्युवाच॥ ॥ अद्यैवत्वंसमायाताप्रदोषादौवरानने॥
यावत्प्रभातसंध्यास्यात्तावत्तिष्ठममांतिके ॥२५॥ इतिश्रुत्वामुनेर्वाक्यंभयभी
ताबभूवसा ॥पुनर्वैरमयामासतंमुनिंऋषिसत्तमम् ॥२६॥ मुनिशापभयाद्भी
ताबहुलान्परिवत्सरान् ॥ वर्षाणांपंचपंचाशच्छतंमासान्दिनत्रयम् ॥२७॥
सारेमेमुनिनातेननिशार्द्धमिवचाभवत् ॥ साचतंप्रत्युवाचाथतस्मिन्कालेगतेमु
निम् ॥२८॥ आदेशोदीयतांब्रह्मन्गन्तव्यंस्वगृहेमम ॥ ॥मेधाव्युवाच ॥ ॥
प्रातःकालोधुनैवास्तेश्रूयतांवचनंमम ॥ कुर्वेसंध्यांदिनंयावत्तावत्त्वंवैस्थिराभ

गंतदेहजीवाः ॥४२॥ तदापिचलितुंतत्रनशेकुस्तेऽरयोभृशम् ॥ शस्त्राणिकुं
ठतांजग्मुःसर्वेषांहतचेतसां ॥४३॥ दीनाबभूवुस्तेसर्वेयेतंहंतुंसमागताः ॥
एतस्मिन्नेवकालेतुतस्यराज्ञःशरीरतः ॥४४॥ निःसृताप्रमदाह्येकासर्वावयव
शोभना ॥ दिव्यगंधसमायुक्तादिव्याभरणभूषिता ॥४५॥ दिव्यमाल्यांबर
धराभ्रुकुटीकुटिलानना ॥ स्फुलिंगाभ्यांचनेत्राभ्यांपावकंवमतीबहु ॥४६॥
चक्रोद्यतकराचैवकालरात्रिरिवापरा ॥ अभ्यधावतसंक्रुद्धान्म्लेच्छानत्यंतदुः
खितान् ॥४७॥ निहताश्चयदाम्लेच्छास्तेविकर्मरतास्तथा ॥ ततोराजाविबु-
द्धःसन्ददर्शमहदद्भुतम् ॥४८॥ हतान्म्लेच्छगणान्दृष्ट्वाराजाहर्षमवापसः
॥इहकेनहताम्लेच्छाअत्यंतंवैरिणोमम ॥४९॥ केनचेदंमहत्कर्मकृतमस्मद्धि
तार्थिना ॥ एतस्मिन्नेवकालेतुवागुवाचाऽशरीरिणी ॥५०॥ तंस्थितंनृप
तिंदृष्ट्वानिष्कामंविस्मयान्वितम् ॥ शरणंकेशवादन्योनास्तिकोपिद्वितीयकः
॥५१॥ वनात्तस्मात्सकुशलीसमायातोपिभूमिभुक् ॥ राज्यंचकारधर्मा-
त्माधरायांदेववत्तेशवत् ॥५२॥ ॥युधिष्ठिरउवाच॥ ॥तस्मादामलकीं

प:॥३९॥ चैत्रस्यकृष्णपक्षेयाभवत्येकादशीशुभा ॥पापमोचनिकानामसर्वपा
पक्षयंकरी ॥४०॥ तस्याव्रतेकृतेसुभ्रुपिशाचत्वंप्रयास्यति ॥ इत्युक्त्वातांसमे
धावीजगामपितुराश्रमम् ॥४१॥ तमागतंसमालोक्यवचनंप्रत्युवाचह ॥ किं
मेतद्विहितंपुत्रत्वयापुण्यक्षयः कृतः ॥४२॥ ॥मेधाव्युवाच॥ ॥पापंकृ
तमहत्तातरमिताचाप्सरामया ॥ प्रायश्चित्तंब्रूहितातयेनपापक्षयोभवेत् ॥
॥४३॥ ॥च्यवनउवाच॥ ॥चैत्रस्यचासितेपक्षेनाम्नावैपापमोचनी ॥अ
स्याव्रतेकृतेपुत्रपापराशिः क्षयंव्रजेत् ॥४४॥ इतिश्रुत्वापितुर्वाक्यंकृतंतेनव्र
तोत्तमम् ॥ गतंपापंक्षयंतस्यपुण्ययुक्तोबभूवसः ॥४५॥ साप्येवंमंजुघोषा
चकृत्वातद्व्रतमुत्तमम् ॥ पिशाचत्वविनिर्मुक्तापापमोचनिकाव्रतात् ॥४६॥
दिव्यरूपधरासापिगतानाकंवराऽप्सरा॥ ॥लोमशउवाच॥ ॥इत्थंभूतप्र
भावंहिपापमोचनिकाव्रतम् ॥४७॥ पापमोचनिकांराजन्येकुर्वन्तिचमानवाः
॥ तेषांपापंचयत्किंचित्तत्सर्वंक्षयतांव्रजेत् ॥४८॥ पठनाच्छ्रवणाद्राजन्गो-
सहस्रफलप्रदा ॥ ब्रह्महाभ्रूणहाचैवसुरापोगुरुतल्पगः ॥४९॥ व्रतस्यचास्य

करणात्पापमुक्ता भवंतिते ॥ बहुपुण्यप्रदं ह्येतत्करणाद्व्रतमुत्तमम् ॥ ५० ॥
इतिश्री भवि० चैत्रकृष्णापापमोचनिकानामैकादशीमाहात्म्यंसमाप्तम् ॥ ॥
॥ ॥ अथचैत्रशुक्लैकादशीकथा ॥ ॥ सूतउवाच ॥ ॥ देवकीनंदनंकृष्णं
वसुदेवात्मजंहरिम् ॥ नमस्कृत्वाप्रवक्ष्यामिमहापातकहानितु ॥ १ ॥ युधिष्ठि
रायकृष्णेनकथितानिमहात्मना ॥ एकादशीमहात्म्यानिनानापापहराणिच
॥ २ ॥ अष्टादशपुराणेभ्योविविच्यसुमहात्मना ॥ चतुर्विंशतिसंख्यानिनाना-
ख्यानैर्युतानिच ॥ ३ ॥ तानिवक्ष्यामिभोविप्राः शृणुध्वंसुसमाहिताः ॥ ॥
॥ युधिष्ठिरउवाच ॥ ॥ वासुदेवनमस्तुभ्यंकथयस्वममाग्रतः ॥ ४ ॥ चैत्रस्यशु
क्लपक्षेतुकिंनामैकादशीभवेत् ॥ ॥ श्रीकृष्णउवाच ॥ ॥ शृणुष्वैकमनाराे
जन्कथामेतांपुरातनीं ॥ ५ ॥ वसिष्ठोयामकथयत्प्राग्दिलीपायपृच्छते ॥ ॥
॥ दिलीपउवाच ॥ ॥ भगवन्श्रोतुमिच्छामिकथयस्वप्रसादतः ॥ ६ ॥ चैत्रमा
सिसितपक्षे किंनामैकादशीभवेत् ॥ ॥ वसिष्ठउवाच ॥ ॥ साधुपृष्टंनृपश्रेष्ठ
कथयामितवाग्रतः ॥ ७ ॥ एकादशीपुण्यतमापापेंधनदवानला ॥ शृणुराजन्

कथामेतांपापघ्नींपुत्रदायिनीम् ॥८॥ पुराभोगिपुरेरम्ये हेमरत्नविभूषिते ॥ पुंड
रीकमुखानागा निवसंतिमदोत्कटाः ॥ ९॥ तस्मिन्पुरेपुंडरीकोराजाराज्यंकरोति
च ॥ गन्धर्वैः किन्नरैश्चैवस्त्वप्सरोभिः सुसेव्यते ॥१०॥ वराऽप्सरातुललितागंध
र्वोललितस्तथा ॥ उभौरागेणसंयुक्तौदम्पतीकामपीडितौ ॥११॥ रेमातेस्वगृहे
रम्येधनधान्ययुतेसदा ॥ ललितायास्तुहृदयेपतिर्वसतिसर्वदा ॥१२॥ हृदयेतस्य
ललितानित्यंवसतिभामिनी ॥ एकदापुंडरीकाद्याः क्रीडंतिसदसिस्थिताः ॥१३
गीतमानंप्रकुरुतेललितोदयितांविना॥ पदबंधेऽस्खलज्जिव्हो बभूवललितां
स्मरन् ॥१४॥ मनोभावंविदित्वाऽस्यकर्कोटोनागसत्तमः ॥ पदबंधच्युतिंतस्य
पुंडरीकेन्यवेदयेत् ॥१५॥ शशापललितंतत्रमदनातुरचेतसम् ॥ राक्षसोभवदु
र्बुद्धेक्रव्यादःपुरुषादकः ॥१६॥ यतःपत्नीवशोजातोगायमानोममाग्रतः ॥
वचनात्तस्यराजेन्द्ररक्षोरूपोबभूवह ॥१७॥ रौद्राननोविरूपाक्षोदृष्टमात्रोभयं
करः ॥ बाहूयोजनविस्तीर्णौमुखंकंदरसन्निभम् ॥१८॥ चन्द्रसूर्यनिभेनेत्रे
ग्रीवापर्वतसन्निभा ॥ नासारन्ध्रेतुविवरेअधरौयोजनार्धकौ ॥१९॥ शरीरंतस्य

व ॥ २९ ॥ इतिवाक्यंमुनेः श्रुत्वाभयेनचसमाकुला ॥ स्मितंकृत्वातुसाकिंचित्प्र
त्युवाचसुविस्मिता ॥ ३० ॥ ॥ अप्सरोवाच ॥ ॥ कियत्प्रमाणाविप्रेन्द्रतवसं
ध्यागतानवा ॥ मयिप्रसादंकृत्वातुगतःकालोविचार्यताम् ॥ ३१ ॥ इतितस्याव
चःश्रुत्वाविस्मयोत्फुल्ललोचनः ॥ सध्यात्वाहृदिविप्रेंद्रःप्रणाममकरोत्तदा ॥
॥ ३२ ॥ मासाश्चसप्तपंचाशाङ्गतामयतयासह ॥ नेत्राभ्यांविस्फुलिंगान्समुंचमा
नोऽतिकोपनः ॥ ३३ ॥ कालरूपांचतांदृष्ट्वातपसःक्षयकारिणीम् ॥ दुःखार्जि
तंममतपोनीतंमदनयाक्षयम् ॥ ३४ ॥ सकंपोष्ठोमुनिस्तत्रप्रत्युवाचाकुलेंद्रियः
॥ सतांशशापमेधावीत्वंपिशाचीभवेतिच ॥ ३५ ॥ धिक्त्वांपापेदुराचारेकु
लटेपातकप्रिये ॥ तस्यशापेनसादग्धाविनयावनतास्थिता ॥ ३६ ॥ उवाचव
चनंसुभ्रूः प्रसादंवांछतीमुनिम् ॥ प्रसादंकुरुविप्रेंद्रशापस्यानुग्रहंकुरु ॥ स-
तांसंगोहिफलतिवचोभिः सप्तभिःपदैः ॥ ३७ ॥ त्वयासहममब्रह्मन्गताःसुबह
वः समाः ॥ एतस्मात्कारणात्स्वामिन्प्रसादंकुरुसुव्रत ॥ ३८ ॥ मुनिरुवाच
॥ शृणुभद्रेवचनंभद्रेममानुग्रहकारकम् ॥ किंकरोमित्वयापापेक्षयंनीतंमहत्त

येनपुण्येनविप्रेंद्रराक्षसत्वाद्विमुच्यते ॥ ॥ ऋषिरुवाच ॥ ॥ चैत्रमासस्यरंभो
रुशुक्लपक्षस्यसांप्रतम् ॥ ३१ ॥ कामदैकादशीनाम्नीयाकृताकामदानृणाम् ॥
कुरुष्वतद्व्रतंभद्रेविधिपूर्वंमयोदितम् ॥ ३२ ॥ तस्यव्रतस्ययत्पुण्यंतत्स्वभर्त्रे
प्रदीयताम् ॥ दत्तेपुण्येक्षणात्तस्यशापदोषःप्रशाम्यति ॥ ३३ ॥ इतिश्रुत्वामुने
र्वाक्यंललिताहर्षिताभवत् ॥ उपोष्यैकादशींराजन्द्वादशीदिवसेतदा ॥ ३४ ॥
विप्रस्यैवसमीपेतुवासुदेवाग्रतःस्थिता ॥ वाक्यमूचेतुललितास्वपत्युस्तारणा
यवै ॥ ३५ ॥ मयातुतद्व्रतंचीर्णंकामदायाउपोषणम् ॥ तस्यपुण्यप्रभावेनगच्छ
त्वस्यपिशाचता ॥ ३६ ॥ ललितावचनादेववर्तमानोपितत्क्षणे ॥ गतपापःस
ललितोदिव्यदेहोबभूवह ॥ ३७ ॥ राक्षसत्वंगतंतस्यप्राप्तोगन्धर्वतांपुनः ॥
हेमरत्नसमाकीर्णोरेमेललितयासह ॥ ३८ ॥ तौविमानसमारूढौपूर्वरूपाधि
कावुभौ ॥ दंपतीचापिशोभेतांकामदायाःप्रभावतः ॥ ३९ ॥ इतिज्ञात्वानृपश्रे
ष्ठकर्तव्यैषाप्रयत्नतः ॥ लोकानांचहितार्थायतवाग्रेकथितामया ॥ ४० ॥ ब्रह्मह
त्यादिपापघ्नीपिशाचत्वविनाशिनी ॥ नातःपरतराकाचित्त्रैलोक्येसचराचरे ॥

पठनाच्छ्रवणाद्वापिवाजपेयफलंलभेत ॥ ४१ ॥ ॥ इतिश्रीवाराहपुराणेचैत्रशुक्लकामदानामैकादशीमाहात्म्यंसमाप्तम् ॥ अथवैशाखकृष्णैकादशीकथा ॥ ॥ ॥ युधिष्ठिरउवाच ॥ ॥ वैशाखस्यासितेपक्षेकिंनामैकादशीभवेत् ॥ महिमानंकथयमेवासुदेवनमोस्तुते ॥ १ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ सौभाग्यदायिनीराजन्निहलोकेपरत्रच ॥ वैशाखकृष्णपक्षेतुनाम्नाचैववरूथिनी ॥ २ ॥ वरूथिन्याव्रतेनैवसौख्यंभवतिसर्वदा ॥ पापहानिश्चभवतिसौभाग्यप्राप्तिरेवच ॥ ३ ॥ दुर्भगापिकरोत्येनांस्त्रीसौभाग्यमवाप्नुयात् ॥ लोकानांचैवसर्वेषांभुक्तिमुक्तिप्रदायिनी ॥ ४ ॥ सर्वपापहरान्नृणांगर्भवासनिकृंतनी ॥ वरूथिन्याव्रतेनैवमांधातास्वर्गतिंगतः ॥ ५ ॥ धुंधुमारादयश्चान्येराजानोबहवस्तथा ॥ ब्रह्मकपालनिर्मुक्तोबभूवभगवान्भवः ॥ ६ ॥ दशवर्षसहस्राणितपस्तप्यतियोनरः ॥ तत्तुल्यंफलमाप्नोतिवरूथिन्याव्रतादपि ॥ ७ ॥ श्रद्धावान्यस्तुकुरुतेवरूथिन्याव्रतंनरः ॥ वांछितंलभतेसोपिइहलोकेपरत्रच ॥ ८ ॥ पवित्रापावनीह्येषामहापातकनाशिनी ॥ भुक्तिमुक्तिप्रदाह्येषाकर्तृणांनृपसत्तम ॥ ९ ॥ अश्व

दानान्नृपश्रेष्ठगजदानंविशेषतः ॥ गजदानाद्भूमिदानंतिलदानंततोऽधिकम् ॥
॥१०॥ ततःसुवर्णदानंतु अन्नदानंततोऽधिकम् ॥ अन्नदानात्परंदानंनभूतं
नभविष्यति ॥११॥ पितृदेवमनुष्याणांतृप्तिरन्नेनजायते ॥ तत्समंकविभिः
प्रोक्तंकन्यादानंनृपोत्तमम् ॥१२॥ धेनुदानंचतत्तुल्यमित्याहभगवान्स्वयम् ॥
प्रोक्तेभ्यःसर्वदानेभ्योविद्यादानंविशिष्यते ॥१३॥ तत्फलंसमवाप्नोतिनरःकृ
त्वावरूथिनीम् ॥ कन्यावित्तेनजीवंतियेनराःपापमोहिताः ॥१४॥ तेनरानरकं
यांतियावदाभूतसंप्लवम् ॥ तस्मात्सर्वप्रयत्नेननग्राह्यंकन्यकाधनम् ॥१५॥
यश्चगृण्हातिलोभेनकन्यांक्रीत्वाचतन्द्धनम् ॥ सोऽन्यजन्मनिराजेंद्रओतुर्भवि
तिनिश्चितम् ॥१६॥ कन्यांवित्तेनयोदद्याद्यथाशक्तिस्वलंकृताम् ॥ तत्पुण्यसं-
ख्यांकर्त्तुंहिचित्रगुप्तोभवत्यलम् ॥१७॥ तत्फलंसमवाप्नोतिनरःकृत्वावरूथि
नीम् ॥ कांस्यंमांसंमसूरान्नंचणकान्कोद्रवांस्तथा ॥ शाकंमधुपरान्नंचपुन-
र्भोजनमैथुने ॥१८॥ वैष्णवोव्रतकर्त्ताचदशम्यांदशवर्जयेत् ॥ द्यूतक्रीडांच
निद्रांचतांबूलंदंतधावनम् ॥१९॥ परापवादपैशून्यंपतितैःसहभाषणम् ॥

राजेंद्र उच्छ्रितं योजनाष्टकम् ॥ ईदृशो राक्षसः सोऽभूद्भुंजानः कर्मणः फलम् ॥ २०
॥ ललिता तमथालोक्य स्वपतिं विकृताकृतिम् ॥ चिंतयामास मनसा दुःखेन महता
र्दिता ॥ २१ ॥ किं करोमि क्व गच्छामि पतिः पापेन पीडितः ॥ इति संस्मृत्य मनसा
न शर्म लभते तु सा ॥ २२ ॥ चचार पतिना सार्द्धं ललिता गहने वने ॥ बभ्राम विपिने
दुर्गे कामरूपः स राक्षसः ॥ २३ ॥ निर्घृणः पापनिरतो विरूपः पुरुषादकः ॥ न
सुखं लभते रात्रौ न दिवा पापपीडितः ॥ २४ ॥ ललिता दुःखिताऽतीव पतिं दृ-
ष्ट्वा तथाविधम् ॥ भ्रमंती तेन सार्धं सा रुदंती गहने वने ॥ २५ ॥ कदाचिदगमद्विं
ध्यशिखरे बहुकौतुके ॥ ऋष्यशृंगमुनेस्तत्र दृष्ट्वाऽऽश्रमपदं शुभम् ॥ २६ ॥ शी
घ्रं जगाम ललिता विनयावनता स्थिता ॥ तस्थुवाच मुनिर्दृष्ट्वा का त्वं कस्य सुता
शुभे ॥ २७ ॥ किमर्थं हि समायाता सत्यं वद ममाग्रतः ॥ ललितोवाच ॥ ॥
वीरधन्वेति गन्धर्वः सुता तस्य महात्मनः ॥ २८ ॥ ललितां नाम मां विद्धि पत्यर्थ
मिह चागताम् ॥ भर्त्ता मे शापदोषेण राक्षसोऽभून्महामुने ॥ २९ ॥ रौद्ररूपो दुरा
चारस्तं दृष्ट्वा नास्ति मे सुखम् ॥ सांप्रतं शाधि मां ब्रह्मन्प्रायश्चित्तं वद प्रभो ॥ ३०

जानिवै ॥ ततोऽहंभयभीतोऽस्मिपृच्छामित्वांमहामुने ॥ ४॥ वसिष्ठउवाच ॥ 
साधुपृष्टंत्वयारामतवैषानैष्ठिकीमतिः ॥ त्वन्नामग्रहणेनैवपूतोभवतिमानवः ॥
॥५॥ तथापिकथयिष्यामिलोकानांहितकाम्यया ॥ पवित्रंपावनानांचव्रताना
मुत्तमंव्रतम् ॥ ६ ॥ वैशाखस्यसितेपक्षेद्वादशीरामयाभवेत् ॥ मोहिनीनामसा
प्रोक्तासर्वपापहरापरा ॥ ७॥ मोहजालात्प्रमुच्येतपातकानांसमूहतः ॥ अस्या
व्रतप्रभावेनसत्यंसत्यंवदाम्यहम् ॥ ८ ॥ अतस्तुकारणाद्रामकर्तव्यैषाभवादृ
शैः ॥ पातकानांक्षयकरीमहादुःखविनाशिनी ॥ ९ ॥ शृणुष्वैकमनारामक-
थांपुण्यप्रदांशुभाम् ॥ अस्याःश्रवणमात्रेणमहापापंप्रणश्यति ॥ १० ॥ सर-
स्वत्यास्तटेरम्येपुरीभद्रावतीशुभा ॥ द्युतिमान्नामनृपतिस्तत्रराज्यंकरोतिवै ॥
॥ ११ ॥ सोमवंशोद्भवोरामधृतिमान्सत्यसंगरः ॥ तत्रवैश्योनिवसतिधनधा
न्यसमृद्धिमान् ॥ १२॥ धनपालइतिख्यातःपुण्यकर्मप्रवर्तकः ॥ प्रपासत्रा
द्यायतनतडागारामकारकः ॥ १३॥ विष्णुभक्तिपरःशांतस्तस्यासन्पंचपुत्र- 
काः ॥ सुमनाद्युतिमांश्चैवमेधावीसुकृतीतथा ॥ १४॥ पंचमोधृष्टबुद्धिश्चम

हापापरतः सदा ॥ वारस्त्रीसंगतिरतोविटगोष्ठीविशारदः ॥१५॥ द्यूतादिव्यसना
सक्तः परस्त्रीरतिलालसः ॥ नदेवान्नातिथीन्वृद्धान्नपितॄश्चैवद्विजानपि ॥ १६॥
अन्यायकर्त्तादुष्टात्मापितुर्द्रव्यक्षयंकरः ॥ अभक्ष्यभक्षकः पापः सुरापानरतः स
दा ॥१७॥ वेश्याकंठक्षिप्तबाहुर्भ्रमद्दृष्टिश्चतुष्पथे ॥ पित्रानिष्काशितोगेहात्परि
त्यक्तश्चबांधवैः ॥१८॥ स्वदेहभूषणान्येवक्षयंनीतानितेनवै ॥ गणिकाभिः परि
त्यक्तोनिंदितश्चधनक्षयात् ॥१९॥ ततश्चिंतापरोजातोवस्त्रहीनः क्षुधार्दितः ॥
किंकरोमिक्वगच्छामिकेनोपायेनजीव्यते ॥ २०॥ तस्करत्वंसमारब्धंतत्रैवनगरे
पुनः ॥ गृहीतोराजपुरुषैर्मुक्तश्चपितृगौरवात् ॥ २१॥ पुनर्बद्धः पुनर्मुक्तः पुनर्मु-
क्तः ससंभ्रमैः ॥ धृष्टबुद्धिर्दुराचारोनिबद्धोनिगडैर्दृढैः ॥२२॥ कशाघातैस्ता
डितश्चपीडितश्चपुनःपुनः ॥ नस्थातव्यंहिमंदात्मन्त्वयामद्देशगोचरे ॥२३॥
एवमुक्त्वाततोराज्ञामाचितोदृढबंधनात् ॥ निर्जगामभयात्तस्यगतोऽसौगह
नंवनम् ॥ २४ ॥ क्षुत्तृषापीडितश्चायमितश्चेतश्चधावति ॥ सिंहवन्निजघा
नासौमृगस्तकरचित्तलान् ॥२५ ॥आमिषाहारनिरतोवनेतिष्ठतिसर्वदा ॥

 

कूटसाक्षीसमाह्येते विज्ञेया नरकौकसः ॥ अपरासेवनाद्राजन्पापमुक्ता भवं
तिते ॥ ७ ॥ क्षत्रियः क्षात्रधर्मं यस्त्यक्त्वा युद्धात्पलायते ॥ सयाति नरकं घोरं स्वीयधर्म
बहिष्कृतः ॥ ८ ॥ अपरासेवनाद्राजन्पापत्यक्त्वा दिवं व्रजेत् ॥ विद्यामधीत्य
यः शिष्यो गुरुनिंदां करोति च ॥ ९ ॥ महापातकयुक्तोऽपि निरयं याति दारुणं
॥ अपरासेवनात्सोपि सद्गतिं प्राप्नुयान्नरः ॥ १० ॥ महिमानमपरायाः शृणु रा
जन्वदाम्यहम् ॥ पुष्करत्रितये स्नात्वा कार्तिक्यां यत्फलं लभेत् ॥ ११ ॥ गंगा-
यां पिंडदानेन पितृणां तृप्तिदा यथा ॥ सिंहस्थिते देवगुरौ गोतमीस्नातको नरः
॥ १२ ॥ यत्फलं समवाप्नोति कुंभे केदारदर्शनात् ॥ बदर्याश्रमयात्रायां तत्तीर्थ
सेवनादपि ॥ १३ ॥ यत्फलं समवाप्नोति कुरुक्षेत्रे रविग्रहे ॥ गजाश्वहेमदाना
नि यज्ञे कृत्स्न सुवर्णदः ॥ १४ ॥ यत्फलं समवाप्नोति अपरायाव्रतान्नरः ॥ अर्ध
प्रसूतां गां दत्वा सुवर्णं वसुधां तथा ॥ १५ ॥ नरस्तत्फलमाप्नोति अपराव्रतसेव
नात् ॥ पापद्रुमकुठारोयं पापेंधनदवानलः ॥ १६ ॥ पापांधकारसूर्योयं पापसा
रंगकेसरी ॥ बुद्बुदा इव तोयेषु पुत्तिका इव जंतुषु ॥ १७ ॥ जायंते मरणायैव ए

कादश्याव्रतंविना ॥ अपरांसमुपोष्यैवपूजयित्वात्रिविक्रमम् ॥ १८ ॥ सर्वपा
पविनिर्मुक्तोविष्णुलोकंव्रजेन्नरः ॥ लोकानांचहितार्थायितवाग्रेकथितंमया ॥
॥१९॥ पठनाच्छ्रवणाद्राजन्सर्वपापैः प्रमुच्यते ॥२०॥ इतिश्रीब्रह्मांडपुराणे
ज्येष्ठकृष्णेकादश्यपरामाहात्म्यंसमाप्तम् ॥ ॥अथज्येष्ठशुक्लैकादशीकथा
॥ भीमसेनउवाच ॥ ॥पितामहमहाबुद्धेशृणुमेपरमंवचः ॥ युधिष्ठिरश्चकुं
तीचतथाद्रुपदनंदिनी ॥१॥ अर्जुनोनकुलश्चैवसहदेवस्तथैवच ॥ एकादश्यां
नभुंजंतिकदाचिदपिसुव्रत ॥२॥ नेमांब्रुवंतिवैनित्यंमाभुंक्ष्वत्वंवृकोदर ॥अ
हंतानब्रुवंस्तातबुभुक्षादुःसहामम ॥३॥ दानंदास्यामिविधिवत्पूजयिष्यामि
केशवम् ॥ विनोपवासंलभ्येतकथमेकादशीव्रतम् ॥४॥ भीमसेनवचःश्रुत्वा
व्यासोवचनमब्रवीत् ॥ ॥व्यासउवाच ॥ ॥यदिस्वर्गोत्यभीष्टस्तेनरकोदुष्ट
एवच ॥५॥ एकादश्यांनभोक्तव्यंपक्षयोरुभयोरपि ॥ ॥भीमसेनउवाच ॥
पितामहमहाबुद्धेकथयामितवाग्रतः ॥ ६॥ एकभुक्तेनशक्तोहमुपवासः कथं
मुने ॥ वृकोनामापियोवह्निःससदाजठरेमम ॥ ७॥ अतीवान्नंयदाश्नामितं

दासमुपशाम्यति ॥ एकंशक्तोस्म्यहंकर्तुंचोपवासंमहामुने ॥ ८ ॥ येनैवप्राप्य
तेस्वर्गस्तत्करोमियथातथम् ॥ तदेकंवदनिश्चित्ययेनश्रेयोऽहमाप्नुयाम् ॥ ९
॥ व्यासउवाच ॥ ॥ श्रुतामेमानवाधर्मावैदिकाश्चश्रुतास्त्वया ॥ कलौयुगेन
शक्यंतेतेवैकर्तुंनराधिप ॥१०॥ सुखोपायंचाल्पधनमल्पक्लेशंमहाफलं ॥ पुरा
णानांचसर्वेषांसारभूतंवदामिते ॥ ११ ॥ एकादश्यांनभुंजीतपक्षयोरुभयोरपि
॥ एकादश्यांनभुंक्तेयोनयातिनरकंतुयः ॥१२॥ व्यासस्यवचनंश्रुत्वाकंपितो
श्वत्थपत्रवत् ॥ भीमसेनोमहाबाहुर्भीतोवाक्यमभाषत ॥१३॥ ॥भीमसे
नउवाच॥ ॥ पितामहनशक्तोहमुपवासेकरोमिकिम् ॥ ततोबहुफलंब्रूहिव्र
तमेकंममप्रभो ॥ १४॥ ॥व्यासउवाच॥ ॥ वृषस्थेमिथुनस्थेवाशुक्लोह्ये
कादशीभवेत् ॥ज्येष्ठमासेप्रयत्नेनसोपोष्याजलवर्जिता ॥१५॥स्नानेचाच
मनेचैववर्जयित्वोदकंबुधः ॥ माषमात्रसुवर्णस्ययत्रमज्जतिवैमणिः ॥१६॥
एतदाचमनंप्रोक्तंपवित्रंकायशोधनम् ॥ गोकर्णकृतहस्तेनमाषमात्रंजलंपि
बेत् ॥१७॥ तन्न्यूनमधिकंपीत्वासुरापानसमंभवेत् ॥उपयुंजीतनैवान्यद्व्रत

पश्श्रेष्ठहतपापोबभूवसः ॥ ३६ ॥ दिव्यदेहस्ततोभूत्वागरुडोपरिसंस्थितः ॥
जगामवैष्णवंलोकंसर्वोपद्रववर्जितम् ॥ ३७ ॥ इतीदृशंरामचंद्रतमोमोहनि
कृंतम् ॥ नातःपरतरंकिंचित्त्रैलोक्येसचराचरे ॥ ३८ ॥ यज्ञादितीर्थदानानिक
लांनार्हन्तिषोडशीम् ॥ पठनाच्छ्रवणाद्राजन्गोसहस्रफलंलभेत् ॥ ३९ ॥ ॥
इतिश्रीकूर्मपुराणेवैशाखशुक्कमोहिन्येकादशीमाहात्म्यंसमाप्तम् ॥ ॥ अथ
ज्येष्ठकृष्णैकादशीकथा ॥ ॥ युधिष्ठिरउवाच ॥ ॥ ज्येष्ठस्यकृष्णपक्षेतुकिं
नामैकादशीभवेत् ॥ श्रोतुमिच्छामिमाहात्म्यंतद्वदस्वजनार्दन ॥ १ ॥ श्रीकृ
ष्णउवाच ॥ ॥ साधुपृष्टंत्वयाराजन्लोकानांहितकाम्यया ॥ बहुपुण्यप्रदा
ह्येषामहापातकनाशिनी ॥ २ ॥ अपरानामराजेन्द्रअपारफलदायिनी ॥ लोके
प्रसिद्धतांयातिअपरांयस्तुसेवते ॥ ३ ॥ ब्रह्महत्याभिभूतोऽपिगोत्रहाभ्रूणहा
तथा ॥ परापवादवादीचपरस्त्रीरसिकोपिच ॥ ४ ॥ अपरासेवनाद्राजन्विपा
प्माभवतिध्रुवम् ॥ कूटसाक्ष्यंमानकूटंतुलाकूटंकरोतियः ॥ ५ ॥ कूटवेदंपठे
द्विप्रःकूटशास्त्रंकरोतिच ॥ ज्योतिषीकूटगणकःकूटायुर्वेदकोभिषक् ॥ ६ ॥

षितानरव्याघ्रइतिसत्यंवदामिते ॥ यमदूतामहाकायाः करालाः कृष्णपिंगलाः ॥
॥३०॥ दंडपाशधरारौद्रानोपसर्पंतितंनरम् ॥ पीतांबरधराः सौम्याश्चक्रहस्ताम
नोजवाः ॥ ३१ ॥ अंतकालेनयंत्येवंमानवंवैष्णवींपुरीम् ॥ तस्मात्सर्वप्रयत्नेन
सोपोष्योदकवर्जिता ॥ ३२ ॥ जलधेनुंततोदत्वासर्वपापैः प्रमुच्यते ॥ इतिश्रुत्वा
तदाचक्रुः पांडवाजनमेजय ॥ ३३ ॥ तथात्वमपिभूपालसोपवासार्चनंहरेः ॥ कु
रुत्वंचप्रयत्नेनसर्वपापप्रशांतये ॥ ३४ ॥ करिष्याम्यद्यदेवेशजलवर्जमुपोषणम्
॥ भोक्ष्येपरेह्निदेवेशत्वनंततववासरात् ॥ ३५ ॥ इत्युच्चार्यततोमंत्रमुपवासप
रोभवेत् ॥ सर्वपापविनाशायश्रद्धादमसमन्वितः ॥ ३६ ॥ मेरुमंदरमानंतुस्त्रि
योऽथपुरुषस्यवा ॥ सर्वंतद्भस्मतांयातिएकादश्याप्रभावतः ॥ ३७ ॥ सकांचवः
प्रदातव्योघटोवस्त्रेणसंवृतः ॥ तोयस्यानियमंतस्यांकुरुतेवैसपुण्यभाक् ॥ ३८
पलकोटिसुवर्णस्ययामेयामेश्रुतेफलम् ॥ स्नानंदानंजपंहोमंयदस्यांकुरुतेनरः
॥ ३९ ॥ तत्सर्वंचाक्षयंप्रोक्तमेतत्कृष्णस्यभाषितम् ॥ किंवापरेणधर्मेणनिर्ज
लैकादशींनृप ॥ ४० ॥ उपोषितान्वविधिवद्वैष्णवंपदमाप्नुयात् ॥ सुवर्णमन्नंवा-

सांसियदस्यांसंप्रदीयते ॥४१॥ तस्यैवञ्चकुरुश्रेष्ठसर्वेञ्चाप्यक्षयंभवेत् ॥ एका
दशीदिनेयोऽन्नंभुंक्तेपापंभुनक्तिसः ॥ ४२॥ इहलोकेसचांडालोमृतःप्राप्नो
तिदुर्गतिम् ॥ येप्रदास्यंतिदानानिद्वादशींसमुपोष्यच ॥४३॥ ज्येष्ठमासिसिते
पक्षेप्राप्स्यंतिपरमंपदम् ॥ ब्रह्महामद्यपस्तेनोगुरुद्वेषीसदानृती ॥ ४४ ॥ मु
च्यंतेपातकैः सर्वैर्द्वादशीयैरुपोषिता ॥ विशेषंशृणुकौंतेयनिर्जलैकादशीदि
ने ॥ ४५॥ यत्कर्तव्यंनरैःस्त्रीभिःश्रद्धादमसमन्वितैः ॥ जलशायीतुसंपूज्योदे
याधेनुश्चतन्मयी ॥४६॥ प्रत्यक्षांवानृपश्रेष्ठघृतधेनुरथापिवा ॥ दक्षिणाभि-
श्चश्रेष्ठाभिर्मिष्टान्नैश्चपृथग्विधैः ॥ ४७॥ तोषणीयाःप्रयत्नेनद्विजाधर्मभृतां
वर ॥ तुष्टोभवतिवैक्षिप्रंतुष्टिमोक्षप्रदोहरिः ॥४८॥ आत्मद्रोहःकृतस्तैस्तु
यैर्नैषासमुपोषिता ॥ पापात्मानोदुराचारादुष्टास्तेनात्रसंशसंशयः ॥ ४९ ॥
कुलानांचशतंसाग्रमनाचाररतंसदा ॥ आत्मनासहसन्नीतंवासुदेवस्यमंदिर
म् ॥ ५०॥ शांतैर्दानपरैश्चैवअर्चद्भिश्चतथाहरिम् ॥ कुर्वद्भिर्जागरंरात्रौयैनरैः
समुपोषिता ॥५१॥ अन्नंपानंतथागावोवस्त्रंशय्याऽऽसनंशुभं ॥ कमंडलुस्त

थाछत्रंदातव्यंनिर्जलादिने ॥ ५२ ॥ उपानहौचयोदद्यात्सात्रभूतेद्विजोत्तमे ॥
ससौवर्णेनयानेनस्वर्गलोकेव्रजेद्ध्रुवम् ॥ ५३ ॥ यश्चेमांशृणुयाद्भक्त्यायश्चापि
परिकीर्त्तयेत् ॥ उभौतौस्वर्गतौस्यातांनात्रकार्याविचारणा ॥ ५४ ॥ यत्फलंतु
सिनीवाल्याराहुग्रस्तेदिवाकरे ॥ कृत्वाश्राद्धंलभेन्मर्त्यस्तदस्याः श्रवणादपि ॥
॥ ५५ ॥ नियमंचप्रकुर्वीतदंतधावनपूर्वकम् ॥ एकादश्यांनिराहारोवर्जयि-
ष्यामिवैजलम् ॥ ५६ ॥ केशवप्रीणनार्थायअन्यदाचमनादृते ॥ द्वादश्यांदेव
देवेशः पूजनीयस्त्रिविक्रमः ॥ ५७ ॥ गंधपुष्पैस्तथादीपैर्वारिभिः प्रीणयेद्धरि
म् ॥ पूजयित्वाविधानेनमंत्रमेतमुदीरयेत् ॥ ५८ ॥ देवदेवहृषीकेशसंसारा-
र्णवतारक ॥ उदकुंभप्रधानेननयमांपरमांगतिम् ॥ ५९ ॥ ततः कुंभाः प्रदात-
व्याब्राह्मणेभ्यः स्वशक्तितः ॥ सान्नावस्त्रयुताभीमछत्रोपानत्फलान्विताः
॥ ६० ॥ दानान्यन्यानिदेयानिजलधेनुर्विशेषतः ॥ भोजयित्वाततोविप्रान्स्वयं
भुंजीतवाग्यतः ॥ ६१ ॥ एवंयः कुरुतेपूर्णांद्वादशींपापनाशिनीम् ॥ सर्वपापवि
निर्मुक्तः पदंगच्छंत्यनामयं ॥ ६२ ॥ ततः प्रभृतिभीमेनकृताह्येकादशीशुभा ॥

भंगोऽन्यथा भवेत् ॥१८॥ उदयादुदयं यावद्वर्जयित्वा तथोदकम् ॥ अप्रयत्नादवा
प्नोति द्वादश्यां द्वादशीफलम् ॥ १९॥ प्रभाते विमले जाते द्वादश्यां स्नानमाचरेत् ॥
जलं सुवर्णं दत्वा च द्विजातिभ्यो यथाविधि ॥२०॥ भुंजीत कृतकृत्यस्तु ब्राह्मणैः स
हितो वशी ॥ एवं कृते तु यत्पुण्यं भीमसेन शृणुष्व तत् ॥२१॥ संवत्सरस्य या मध्ये
एकादश्यो भवंति वै ॥ तासां फलमवाप्नोति अत्र मे नास्ति संशयः ॥२२॥ इति मां
केशवः प्राह शंखचक्रगदाधरः ॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ॥ २३ ॥
एकादश्यां निराहारान्नरः पापात्प्रमुच्यते ॥ द्रव्यशुद्धिः कलौ नास्ति संस्कारः स्मार्त
एव च ॥२४॥ वैदिकश्च कुतश्चास्ति प्राप्ते दुष्टे कलौ युगे ॥ किं तु ते बहुनोक्तेन वायु
पुत्र पुनः पुनः ॥ २५॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि ॥ एकादश्यां सिते
पक्षे ज्येष्ठस्योदकवर्जितम् ॥२६॥ उपोष्य फलमाप्नोति तच्छृणुष्व वृकोदर ॥ स
र्वतीर्थेषु यत्पुण्यं सर्वदानेषु यत्फलम् ॥ २७॥ तत्फलं समवाप्नोति इमां कृत्वा वृको
दर ॥ संवत्सरेण याश्च स्युः शुक्लाः कृष्णा वृकोदर ॥२८॥ उपोषितास्ताः सर्वाः
स्युरेकादश्यो न संशयः ॥ धनधान्यबलायुर्दाः पुत्रारोग्यफलप्रदाः ॥२९॥ उपो

णिप्रसमीक्षिते ॥ ९ ॥ हेममालीस्वभवनेरमतेहितयासह ॥ यक्षराट्प्रत्युवाचवा
थकालातिक्रमकोपितः ॥ १० ॥ कस्मान्नायातिभोयक्षाहेममालीदुरात्मवान्
॥ निश्चयःक्रियतामस्यप्रत्युवाचपुनःपुनः ॥ ११ ॥ यक्षाऊचुः ॥ वनिताकामु
कोगेहेरमतेस्वेच्छयानृप ॥ तेषांवाक्यंसमाकर्ण्यकुबेरःकोपपूरितः ॥ १२ ॥
आव्हयामासतंतूर्णंबटुकं हेममालिनम् ॥ ज्ञात्वाकालात्ययंसोपिभयव्याकुल
लोचनः ॥ १३ ॥ आजगामनमस्कृत्यकुबेरस्याग्रतःस्थितः ॥ तंदृष्ट्वाधनदःक्रु
द्धःकोपसंरक्तलोचनः ॥ १४ ॥ प्रत्युवाचरुषाविष्टःकोपाद्विस्फुरिताधरः ॥
॥ धनदउवाच ॥ रेपापदुष्टदुर्वृत्तकृतवान्देवहेलनम् ॥ १५ ॥ अतोभवश्वित्र
युक्तोवियुक्तःकांतयासदा ॥ अस्मात्स्थानादपध्वस्तोगच्छस्थानमथाध
मम् ॥ १६ ॥ इत्युक्तेवचनेतेनतस्मात्स्थानात्सपातसः ॥ महादुःखाभिभू
तश्चकुष्टपीडितविग्रहः ॥ १७ ॥ नवैतोयंनभक्ष्यंचवनेरौद्रेलभत्यसौ ॥ नसु
खंदिवसेतस्यननिद्रांलभतेनिशि ॥ १८ ॥ छायायांपीडिततनुर्निदाघेऽत्यंत
पीडितः ॥ शिवपूजाप्रभावेनस्मृतिस्तस्यनलुप्यते ॥ १९ ॥ पातकेनाभिभू-

तोपिपूर्वकर्ममनुस्मरन् ॥ भ्रममाणस्ततोगच्छद्धिमाद्रिंपर्वतोत्तमम् ॥२०॥ त
त्रापश्यन्मुनिवरंमार्कंडेयंतपोनिधिंतस्यस्यायुर्विधातेराजन्ब्रह्मणोदिनसमकम्
॥२१॥ आश्रमंसगतस्तस्यऋषिर्ब्रह्मसदःसमम् ॥ ववंदेचरणौतस्यदूरतःपापक
र्मकृत् ॥२२॥ मार्कंडेयोमुनिवरोदृष्ट्वातंकुष्ठिनंतदा ॥ परोपकारणार्थायसमाहू
येदमब्रवीत् ॥२३॥ ॥ मार्कण्डेयउवाच ॥ ॥ कस्मात्कुष्ठाभिभूतस्त्वंकुतो
निंद्यतरोह्यसि ॥ इत्युक्तःप्रत्युवाचाथमार्कण्डेयेनधीमता ॥२४॥ हेममाल्यु-
वाच ॥ ॥ यक्षराजस्यानुचरोहेममालीतिनामतः ॥ मानसात्पुष्पनिचयमानी
यप्रत्यहंमुने ॥२५॥ शिवपूजनवेलायांकुबेरायसमर्पये ॥ एकस्मिन्दिवसे-
कालेलोपश्चविहितोमया ॥ २६ ॥ पत्नीसौख्यप्रसक्तेनकामव्याकुलचेतसा
॥ ततःक्रुद्धेनशप्तोऽहंराजराजेनवैमुने ॥२७॥ कुष्ठाभिभूतःसंजातोविप्र
क्तःकांतयासह ॥ अधुनातवसान्निध्यंप्राप्तोस्मिशुभकर्मणा ॥२८॥ सतां
स्वभावतश्चित्तंपरोपकरणक्षमम् ॥ इतिज्ञात्वामुनिश्रेष्ठशाधिमांचकृतेनस
म् ॥ २९॥ ॥ मार्कण्डेयउवाच ॥ ॥ त्वयासत्यमिहप्रोक्तंनासत्यंभाषि

आ॰कृ॰ तंयतः ॥अतोव्रतोपदेशंतेकरिष्यामिशुभप्रदम् ॥ ३०॥ आषाढेकृष्णपक्षे- ए॰क॰
३७ त्वंयोगिनीव्रतमाचर॥ अस्यव्रतस्यपुण्येनकुष्ठात्त्वंमुच्यसेध्रुवम् ॥ ३१ ॥इ
तिवाक्यंमुनेःश्रुत्वादंडवत्पतितोभुवि ॥ उत्थापितश्चमुनिनाबभूवातीवह
र्षितः ॥ ३२ ॥ मार्कण्डेयोपदेशेनकृतंतेनव्रतोत्तमम् ॥ तद्व्रतस्यप्रभावेनदेव
रूपोबभूवसः ॥ ३३ ॥ संयोगंकांतयालेभेबुभुजेसौख्यमुत्तमम् ॥ईदृग्वि
धंनृपश्रेष्ठकथितंयोगिनीव्रतम् ॥ ३४ ॥ अष्टाशीतिसहस्राणिद्विजान्भो
जयतेतुयः ॥ तत्फलंसमवाप्नोतियोगिनीव्रतकृन्नरः ॥ ३५॥ महापापप्रशम
नीमहापुण्यफलप्रदा ॥ शुचौकृष्णैकादशीचकथितायोगिनीनृप ॥ ३६ ॥
इतिश्रीब्रह्मवैवर्त्ते आषाढकृष्णैकादशीयोगिनीमाहात्म्यंसमाप्तम् ॥ ॥
॥अथाषाढशुक्लैकादशीकथा ॥ ॥ युधिष्ठिरउवाच ॥ ॥ आषाढस्यसिते
पक्षेकिंनामैकादशीभवेत् ॥ कोदेवःकोविधिस्तस्याएतदाख्याहिकेशव ॥
॥१॥ ॥ श्रीकृष्णउवाच ॥ ॥ कथयामिमहीपालकथामाश्चर्यकारिणीं ३७
॥ कथयामासयांब्रह्मानारदायमहात्मने ॥२॥ ॥नारदउवाच ॥ ॥

पांडवद्वादशीनाम्नालोकेख्याताबभूवह ॥ ६३॥ ॥ इतिश्रीब्रह्मवैवर्तपुराणे
ज्येष्ठशुक्लनिर्जलैकादशीमाहात्म्यंसमाप्तम् ॥ ॥ अथाषाढकृष्णैकादशीक-
था ॥ ॥ युधिष्ठिरउवाच ॥ ॥ ज्येष्ठशुक्लेनिर्जलायामाहात्म्यंवैश्रुतंमया ॥
आषाढकृष्णपक्षेतुकिंनामैकादशीभवेत् ॥ १ ॥ कथयस्वप्रसादेनममाग्रेम
धुसूदन ॥ ॥ श्रीकृष्णउवाच ॥ ॥ व्रतानामुत्तमंराजन्कथयामितवाग्रतः
॥ २॥ सर्वपापक्षयकरंभुक्तिमुक्तिप्रदायकम् ॥ आषाढस्यासितेपक्षेयोगिनी
नामनामतः ॥ ३॥ एकादशीनृपश्रेष्ठमहापातकनाशिनी ॥ संसारार्णवमग्ना
नांपाररूपासनातनी ॥ ४ ॥ जगत्त्रयेसारभूतायोगिनीतिनराधिप ॥ कथया
मिकथांतस्याःपौराणींपापहारिणीम् ॥ ५ ॥ अलकाधिपतिर्नाम्नाकुबेरःशि
वपूजकः ॥ तस्यासीत्पुष्पबटुकोहेममालीतिनामतः ॥ ६ ॥ तस्यपत्नीसुरू
पाचविशालाक्षीतिनामतः ॥ सतस्यांस्नेहसंयुक्तःकामपाशवशंगतः ॥ ७ ॥
मानसात्पुष्पनिचयमानीयस्वगृहेस्थितः ॥ पत्नीप्रेमसमायुक्तोनकुबेरालयंग
तः ॥ ८ ॥ कुबेरोदेवसदनेकरोतिशिवपूजनम् ॥ मध्यान्हसमयेराजन्पुष्पा-

आ॰भु॰ ३८ धयार्दिताः ॥१३॥ स्वाहास्वधावषट्कारवेदाध्ययनवर्जिताः ॥ बभूवुर्विष एं॰कं॰
यास्तत्यसस्याभावेनपीडिताः ॥१४॥ अथप्रजाः समागत्यराजानमिदमब्रुव
न् ॥ श्रूयतांवचनंराजन्प्रजानांहितकारकम् ॥१५॥ आपोनाराइतिप्रोक्तास्पु
राणेषुमनीषिभिः ॥ अयनंताभगवतस्तेननारायणःस्मृतः ॥१६॥ पर्जन्यरू
पीभगवान्विष्णुःसर्वगतःसदा ॥ सएवकुरुतेवृष्टिंवृष्टेरन्नंततःप्रजाः ॥१७॥
तदभावेननृपतेक्षयंगच्छंतिवैप्रजाः ॥ तथाकुरुनृपश्रेष्ठयोगःक्षेमोयथाभवेत्
॥१८॥ ॥राजोवाच॥ ॥ सत्यमुक्तंचभवतानमिथ्याभिहितंवचः ॥ अ
न्नंब्रह्ममयंप्रोक्तमन्नेसर्वंप्रतिष्ठितम् ॥१९॥ अन्नाद्भवंतिभूतानिजगदन्नेन
वर्तते ॥ इत्येवंश्रूयतेलोकेपुराणेबहुविस्तरे ॥२०॥ नृपाणामपचारेणाप्र-
जानांपीडनंभवेत् ॥ नाहंपश्याम्यात्मकृतंदोषंबुद्ध्याविचारयन् ॥२१॥ त
थापिप्रयतिष्यामिप्रजानांहितकाम्यया ॥ इतिकृत्वामतिंराजापरिमेयब-
लान्वितः ॥२२॥ नमस्कृत्यविधातारंजगामगहनंवनम् ॥ चचारमुनिमु- ३८
ख्यानामाश्रमांस्तपसेधितान् ॥२३॥ ददर्शाथब्रह्मसुतमृषिमंगिरसंनृपः

तेजसाद्योतितदिशंद्वितीयमिवपद्मजम् ॥२४॥ तंदृष्ट्वाहर्षितोराजा अवतीर्य
चवाहनात् ॥ ननामचक्रेऽस्यचरणौकृतांजलिपुटोवशी ॥२५॥ मुनिस्तमभिनं
द्याथस्वस्तिवाचनपूर्वकम् ॥ पप्रच्छकुशलंराज्येसमस्तांगेषुभूपतेः ॥२६॥
निवेदयित्वाकुशलंपप्रच्छानामयंनृपः ॥ ततश्चमुनिनाराजापृष्टोगमनकारणं
॥२७॥ अब्रवीन्मुनिशार्दूलंस्वस्यागमनकारणम् ॥ ॥राजोवाच ॥ ॥
भगवन्धर्मविधिनाममपालयतोमहीम् ॥ अनावृष्टिःसंप्रवृत्तानाहंवेद्मि
प्रकारणम् ॥२८॥ संशयच्छेदनार्थाय आगतोऽहंतवांतिकम् ॥ योगक्षे
मविधानेनप्रजानांनिर्वृतिंकुरु ॥२९॥ ऋषिरुवाच॥ ॥ एतत्कृतयुगं
राजन्युगानामुत्तमंस्मृतम् ॥ अत्रब्रह्मोत्तरालोकाधर्मश्चात्रचतुष्पथः ॥३०
॥ तस्मिन्युगेतपोयुक्ताब्राह्मणानेतरेजनाः ॥ विषयेतवराजेंद्रवृषलोयत्तप
स्यति ॥३१॥ अकार्यकरणात्तस्यनवर्षतिबलाहकः ॥ कुरुतस्यवधेयत्नंये
नदोषःप्रशाम्यति ॥३२॥ ॥राजोवाच॥ ॥ नाहमेनंवधिष्यामितपस्यंत
मनागसम् ॥ धर्मोपदेशंकथयउपसर्गविनाशनम् ॥३३॥ ॥ ऋषिरुवाच

 यद्येवंतर्हिनृपतेकुरुष्वैकादशीव्रतम् ॥ शुचिमासेसितेपक्षेपद्मानामेनिविश्रु- 
 ता ॥३४॥ तस्याव्रतप्रभावेनसुवृष्टिर्भविताध्रुवम् ॥ सर्वसिद्धिप्रदाह्येषास
र्वोपद्रवनाशिनी ॥३५॥ अस्याव्रतंकुरुनृपसप्रजःसपरिच्छदः ॥इतिवा-
क्यंमुनेःश्रुत्वाराजास्वगृहमागतः ॥३६॥ आषाढमासेसंप्राप्तेपद्माव्रतमथा
करोत् ॥ प्रजाभिःसहसर्वाभिश्चातुर्वर्ण्यसमन्वितः ॥३७॥ एवंकृतेव्रतेराज
न्प्रववर्षबलाहकः ॥ जलेनप्लाविताभूमिरभवत्सस्यमालिनी ॥३८॥ हृषीके
शप्रसादेनजनाःसौख्यंप्रपेदिरे ॥एतस्मात्कारणादेवकर्तव्यंव्रतमुत्तमम् ॥
॥३९॥ भुक्तिमुक्तिप्रदंचैवलोकानांसुखदायकम् ॥ पठनाच्छ्रवणादस्याःस
र्वपापैःप्रमुच्यते ॥४०॥ इयमेकादशीराजन्शयनीत्यभिधीयते ॥ विष्णोःप्र
सादसिद्ध्यर्थमस्यांचशयनव्रतम् ॥४१॥ कर्तव्यंराजशार्दूलजनैर्मोक्षेच्छु-
भिःसदा ॥ चातुर्मास्यव्रतारंभोप्यस्यामेवविधीयते ॥४२॥ युधिष्ठिरउवा॰
॥ कथंकृष्णप्रकर्तव्यंश्रीविष्णोःशयनव्रतम् ॥ तद्ब्रूहिकृपयादेवचातुर्मास्य 
व्रतानिच ॥४३॥ ॥श्रीकृष्णउवाच॥ ॥ शृणुपार्थप्रवक्ष्यामिगोविंदशय

कथयस्वप्रसादेनविष्णोराराधनार्थमे ॥ आषाढस्यशुक्लपक्षेतुकिंनामैकादशी
भवेत् ॥३॥ ॥ ब्रह्मोवाच ॥ ॥ वैष्णवोऽसिमुनिश्रेष्ठसाधुपृष्टंकलिप्रिय ॥
नातःपरतरंलोकेपवित्रंहरिवासरात् ॥ ४ ॥ कर्तव्यंतुप्रयत्नेनसर्वपापापनुत्त
ये ॥ तस्मात्तेऽहंप्रवक्ष्यामिशृणुष्वएकादशीव्रतम् ॥ ५ ॥ एकादश्याव्रतंपुण्यं
पापघ्नंसर्वकामदम् ॥ नकृतंयैर्नरैर्लोकेतेनरानिरयैषिणः ॥ ६ ॥ पद्मानामेति
विख्याताशुचौह्येकादशीसिता ॥ हृषीकेशप्रीतयेतुकर्तव्यंव्रतमुत्तमम् ॥
७ ॥ कथयामितवाऽग्रेहंकथांपौराणिकींशुभाम् ॥ यस्याःश्रवणमात्रेणमहा
पापंप्रणश्यति ॥ ८ ॥ मांधातानामराजर्षिर्विवस्वद्वंशसंभवः ॥ बभूवचक्र
वर्तीसिसत्यसंधःप्रतापवान् ॥ ९ ॥ धर्मतःपालयामासप्रजाःपुत्रानिवौरसा
न् ॥ नतस्यराज्येदुर्भिक्षंनाधयोव्याधयस्तथा ॥ १० ॥ निरातंकाःप्रजास्तस्य
धनधान्यसमन्विताः ॥ नान्यायोपार्जितंद्रव्यंकोशेतस्यमहीपतेः ॥ ११ ॥ तस्यै
वंकुर्वतोराज्यंबहुवर्षगणोगतः ॥ अथोकदाचित्संप्राप्तेविपाकेपापकर्मणः
॥ १२ ॥ वर्षत्रयंतद्विषयेनववर्षबलाहकः ॥ तेनोद्विग्नाःप्रजास्तत्रबभूवुःक्षु

कान्मासान्देवस्योत्थापनाविधि ॥ ५४॥ प्रातःसंध्यादिकंसर्वंनित्यंकर्मस
माप्यच ॥ ग्रहीष्येनियमान्शुद्धान्निर्विघ्नान्कुरुमेप्रभो ॥५५॥ इतिसंप्रा
र्थ्यदेवेशंप्रल्हःसंशुद्धमानसः ॥ स्त्रीवानरोवामद्भक्तोधर्मार्थीचधृतव्रतः ॥
५६॥ गृह्णीयान्नियमानेतान्दंतधावनपूर्वकम् ॥ ॥ व्रतप्रारंभकाला
स्तुप्रोक्ताःपंचैवविष्णुना ॥५७॥ उपक्रमंचतुर्मासव्रतानांचनरःशुचौ ॥
एकादशीद्वादशीचपौर्णिमाचतथाष्टमी ॥५८॥ कर्कटाचैवसंक्रांतिस्तेषुकु
र्याद्यथाविधि ॥ चतुर्धागृह्यवैचीर्णंचातुर्मास्यव्रतंनरः ॥५९॥ कार्तिकेशु
क्लपक्षेतुद्वादश्यांतत्समापयेत् ॥ तेषांफलानिवक्ष्यामिकर्तृणांतेपृथक्पृथ
क् ॥ ६०॥ आषाढेशुक्लपक्षेतुएकादश्यामुपोषितः ॥ चातुर्मास्यव्रतंकुर्याद्य
त्किंचिदवनीपते ॥ ६१॥ नान्यथाचाब्दकंपापंविनिहंतिप्रयत्नतः ॥ नशौशवं
चमोदत्वंचशुक्रगुर्वोर्नवार्धकम् ॥ ६२॥ खंडत्वेचिंतयेदादौचातुर्मास्यविधौ
नरः ॥ खंडागव्यापिमार्तंडोयद्यखंडाभवेत्तिथिः ॥ अशुचिर्वाशुचिर्वापि ४०
यदिस्त्रीयदिवापुमान् ॥ ६३॥ व्रतमेकंनरःकृत्वामुच्यतेसर्वपातकैः ॥ अ

संक्रांतंतथामासंदेवेपित्र्येचकर्मणि ॥६४॥ मलरूपमशौचंचवर्जयन्प्रतिमा
न्नरः ॥ प्रतिवर्षंतुयः कुर्याद्व्रतंवैसंस्मरन्हरिम् ॥६५॥ देहांतेतिप्रदीप्तेनविमा
नेनार्कतेजसा ॥ मोदतेविष्णुलोकेऽसौयावदाभूतसंप्लवम् ॥६६॥ देवताऽ
यतनेनित्यंमार्जनंजलसेचनम् ॥ प्रलेपनंगोमयेनरंगवल्यादिकंतथा ॥६७
यः करोतिनरश्रेष्ठश्चातुर्मास्यमतंद्रितः ॥ समाप्तौचयथाशक्त्याकृत्वाब्राह्म
णभोजनम् ॥६८॥ सप्तजन्मसुविप्रेंद्रः सत्यधर्मपरोभवेत् ॥ दध्नाक्षीरेण
चाज्येनक्षौद्रेणासितयातथा ॥६९॥ स्नापयेद्विधिनादेवंचातुर्मास्येजनाधि-
प ॥ सयातिविष्णुसारूप्यंसुखमक्षय्यमश्नुते ॥७०॥ नृपेणभूमिर्दातव्या
यथाशक्त्याचकांचनम् ॥ विप्रायदेवमुद्दिश्यसफलंचसदक्षिणम् ॥७१॥
अक्षयाल्लभतेभोगान्स्वर्गइंद्रइवापरः ॥ लोकंचसमवाप्नोतिविष्णोरत्र नसं
शयः ॥७२॥ देवायहेमपद्मंतुदद्यान्नैवेद्यसंयुतम् ॥ गंधपुष्पाक्षताद्यैर्योदेव
ब्राह्मणयोरपि ॥७३॥ पूजांयः कुरुतेनित्यंचातुर्मास्येव्रतीनरः ॥ अक्षयंसु
खमाप्नोतिपुरंदरपुरंव्रजेत् ॥७४॥ यस्तुवैचतुरोमासान्तुलस्यांहरिमर्चयेत्

येत् ॥ तुलसींकांचनींकृत्वाब्राह्मणायनिवेदयेत् ॥ ७५ ॥ कांचनेनविमानेन-
वैष्णवींलभतेगतिम् ॥ देवायगुग्गुलंयोवैदीपंचार्पयतेनरः ॥ ७६ ॥ सभोगी-
जायतेश्रीमान्तथासौभाग्यवानपि ॥७७॥ सप्तमैर्भूमिकांदद्याद्दीपिकांचविशेष-
तः ॥ ७७ ॥ प्रदक्षिणांतुयःकुर्यान्नमस्कारंविशेषतः ॥ अश्वत्थस्याथवाविष्णोः
कार्तिक्यामथधिर्मवित् ॥ ७८ ॥ पादंपादांतरेन्यस्यकरौकृत्वातुसंयतो ॥ स्तु
तिंवाचिहृदिज्ञानंचतुरंगाप्रदक्षिणा ॥ ७९ ॥ संध्यादीपप्रदोयस्तुप्रांगणेद्विज
देवयोः ॥ समासौदीपिकांदद्याद्रूम्भंतैलंसकांचनम् ॥ ८० ॥ वायुमालभतेय
स्तुतेजस्वीसभवेदिह ॥ वैमानिकोभवेद्दैवोगंधर्वाप्सरसेवितः ॥ ८१ ॥ विष्णु
पादोदकंयस्तुपिबेत्कृच्छ्रात्समन्वितः ॥ विष्णोर्लोकमवाप्नोतिनचास्मिंन्जाय
तेनरः ॥ ८२ ॥ शतमष्टोत्तरंयस्तुगायत्रीजपमाचरेत् ॥ त्रिकालंवैष्णवेहर्म्ये
नसपापेनलिप्यते ॥ ८३ ॥ अक्षसूत्रंपुस्तकंचधत्तेपद्मंकमंडलुम् ॥ चतुर्वक्त्रा
तुगायत्रीश्रोत्रियाणांगृहेस्थिता ॥ ८४ ॥ सर्वलोकमयीदेवीगायत्रीयात्रयीम
यी ॥ नित्याशास्त्रसमाख्यातालोकान्पातुप्रबोधयेत् ॥ ८५ ॥ व्यासस्तुष्य

नव्रतम् ॥ चातुर्मास्येचयान्युक्तान्यासंस्तानिव्रतानिच ॥ ४४ ॥ कर्कराशिग
तेसूर्येश्शुचौश्शुक्लेतुपक्षके ॥ एकादश्यांजगन्नाथंस्वापयेन्मधुसूदनम् ॥ ४५ ॥
तुलाराशिस्थितेतस्मिन्पुनरुत्थापयेन्हरिम् ॥ अधिमासेऽपिपतितेएषएववि
धिः क्रमात् ॥ ४६ ॥ नान्यथास्वापयेद्देवंतथैवोत्थापयेन्हरिम् ॥ आषाढस्य
सितेपक्षेएकादश्यामुपोषितः ॥ ४७ ॥ चातुर्मास्यव्रतानांतुकुर्वीतपरिकल्पनं
॥ एवंचप्रतिमांविष्णोःस्थापयित्वायुधिष्ठिर ॥ ४८ ॥ स्नापयेत्प्रतिमांविष्णोः
शंखचक्रगदाधराम् ॥ पीतांबरधरांसौम्यांपर्यंकेवैसितेश्शुभे ॥ सितवस्त्रस
माच्छन्नेसोपधानेयुधिष्ठिर ॥ ४९ ॥ इतिहासपुराणज्ञोब्राह्मणोवेदपारगः
॥ स्नापयित्वादधिक्षीरघृतक्षौद्रसितादिभिः ॥ ५० ॥ समालेप्यशुभैर्गंधैर्धूपैर्दी
पैश्चभूरिशः ॥ पूजयेत्कुसुमैःशस्तैर्मंत्रेणानेनपांडव ॥ ५१ ॥ शायितस्त्वंहृषी
केशपूजयित्वाश्रियासह ॥ प्रसादंकुरुदेवेशलक्ष्म्यासहजनार्दन ॥ ५२ ॥ सु
प्तेत्वयिजगन्नाथजगत्सुप्तंचराचरम् ॥ एवंतांप्रतिमांविष्णोःस्थापयित्वायु
धिष्ठिर ॥ ५३ ॥ तस्याएवाग्रतःस्थित्वागृण्हीयान्नियमान्नरः ॥ चत्वारोवार्षि

दिनेदिने ॥ भक्त्याव्याहृतिभिर्मंत्रैर्गायत्र्यावाव्रतान्वितः ॥९६॥ अष्टोत्तरशतं
चाथ अष्टाविंशतिरेववा ॥ तिलपात्रंसमाप्तौतुदद्याद्विप्रायधीमते ॥९७॥ वा-
ङ्मनःकायजनितैः पापैर्मुच्येतसंचितैः ॥ नरोगैरभिभूयेतलभेत्संततिमुत्तमा-
म् ॥९८॥ देवदेवजगन्नाथवांछितार्थफलप्रद ॥ तिलपात्रंप्रदास्यामितेनपा-
पंव्यपोहतु ॥९९॥ अन्नहोमंतुयःकुर्याच्चातुर्मास्यमतंद्रितः ॥ समाप्तोघृतकुं-
भंतुवस्त्रकांचनसंयुतम् ॥१००॥ आरोग्यंकांतिमतुलांपुत्रसौभाग्यसंपदः ॥
शत्रुक्षयंचलभतेब्रह्मणाप्रतिमोभवेत् ॥१॥ अश्वत्थसेवांयःकुर्यात्सर्वपापैः
प्रमुच्यते ॥ विष्णुभक्तोभवेत्पश्चाद्दंतेवस्त्रंप्रदापयेत् ॥२॥ सकांचनंब्राह्मणा-
यनैवरोगान्सविंदते ॥ तुलसींधारयेद्यस्तुविष्णुप्रीतिकरांशुभाम् ॥३॥ विष्णु
लोकमवाप्नोतिसर्वपापैःप्रमुच्यते ॥ ब्राह्मणान्भोजयेत्पश्चाद्विष्णुमुद्दिश्यपांड
व ॥४॥ यस्तुसुप्तेहृषीकेशेदूर्वाममृतसंभवाम् ॥ सदाप्रातर्वहेन्मूर्ध्निदशान्द्वा
त्माचऋतुद्वये ॥५॥ मंत्रेणानेनराजेंद्रलक्ष्मीनाथस्यतुष्टये ॥ त्वंदूर्वेऽमृतज
न्मासिवंदिताऽसिसुरासुरैः ॥६॥ सौभाग्यंसंततिंदत्वासद्यःकार्यकरीभव

॥ व्रतांतेचकुरुश्रेष्ठदूर्वांस्वर्णविनिर्मिताम् ॥ ७॥ साग्रसर्वदलोपेतांसवस्त्रांद्वि
जपुंगवे ॥ प्रदद्याद्दक्षिणासार्द्धंमंत्रेणानेनसुव्रत ॥ ८ ॥ यथाशतशाखा
भिर्विस्तृतासिमहीतले ॥ तथाममापिसंतानंदेहित्वमजरामरम् ॥ ९॥ एवंव्रतं
यःकुर्वीतचातुर्मास्यमतंद्रितः ॥ नचदुःखभयंतस्यनचरोगभयंभवेत् ॥ १० ॥
नाशुभंप्राप्नुयाज्जातुपापेभ्यःप्रविमुच्यते ॥ भुक्त्वातुसकलान्भोगान्स्वर्गलो
केमहीयते ॥११॥ गीतंतुदेवदेवस्यकेशवस्यशिवस्यवा ॥ करोतिनित्यमाप्नोति
नरोजागरणेफलम् ॥१२॥ व्रतांतेचव्रतीदद्याद्घंटांदेवायसुस्वराम् ॥ गुरोरवज्ञ
यायच्चानध्यायेध्ययनंकृतम् ॥ १३ ॥ सरस्वतीजगन्माथजगज्जाड्यापहारि
णी ॥ साक्षाद्ब्रह्मकलत्रंचविष्णुरुद्रादिभिःस्तुता ॥१४ ॥ तन्ममाध्ययनोत्पन्नं
जाड्यंहरवरानने ॥ घंटानादेनतुष्टात्वंब्रह्माणीलोकपावनी ॥१५॥ विप्रपादवि
निर्मुक्तंतोयंयः प्रत्यहंपिबेत् ॥ चातुर्मास्येनरोभक्त्याप्रद्रूपंब्राह्मणंस्मरन् ॥
॥१६॥ मनोवाक्कायजनितैर्मुक्तोभवतिकिल्बिषैः ॥ व्याधिभिर्नाभिभूयेतश्री
रायुस्तस्यवर्द्धते ॥१७॥ समाप्तौगोयुगंदद्याद्गामेकांवापयस्विनीम् ॥ तत्रा-

प्यशान्त्कोराजेंद्रदद्याद्वासोयुगंव्रती ॥१८॥ ब्राह्मणंवंदतेयस्तुसर्वदेवमयंस्मृतं
॥ कृतकृत्योभवेत्सद्यः सर्वपापैः प्रमुच्यते ॥ १९॥ अक्षय्यंसुखमाप्नोतिपि
तृभक्तिपरोनरः ॥ समासोभोजयेद्विप्रानायुर्वित्तंचविंदति ॥ २०॥ संध्यांप्रांत
नरः कृत्वासमासौघृतकुंभदः ॥ वस्त्रयुग्मंतिलान्धेनुंब्राह्मणायनिवेदयेत् ॥
॥२१॥ सारस्वतंयातितत्त्वंविद्यावांस्तुभवेदिति ॥ संस्पृशेत्कपिलांयोवैनित्यंस
चभवेद्धनी॥२२॥ नामेवालंकृतांदद्यात्सर्वांभूमिमथापिवा ॥ सार्वभौमोभवेद्राजादी
र्घायुश्चप्रतापवान् ॥ २३॥ दानशीलः सदारंभः सर्वकंटकवर्जितः ॥ रूपवान्
भाग्यसपन्नोलभतेसुखमक्षयम् ॥ २४ ॥ सवसेदिंद्रवत्स्वर्गेवत्सरान्रोमसंमि
तान् ॥ नमस्करोतियः सूर्यंगणेशंवापिनित्यशः ॥२५॥ आयुरारोग्यमैश्वर्यं
लभतेकांतिमुत्तमाम् ॥ विघ्नराजप्रसादेनप्राप्नुयादीप्सितंफलं ॥२६॥ सर्वत्र
विजयंचैवनात्रकार्याविचारणा॥ रविः कार्यः सुवर्णस्यसिंदूरारुणसन्निभः ॥
॥२७॥ निवेदयेद्ब्राह्मणायसर्वकामार्थसिद्धये ॥ उरसाशिरसादृष्ट्यामनसाव
चसातथा ॥ २८॥ पद्भ्यांकराभ्यांजानुभ्यांप्रणामोऽष्टांगउच्यते॥ अष्टांगसहि

नितस्याश्रुविष्णुलोकंसगच्छति ॥ अन्नचोद्यापनंशास्त्रपुस्तकंदानमेवच ॥
॥ ८६ ॥ सर्वविद्यासमंशांतकरणंललिताक्षरम् ॥ पुस्तकंसंप्रयच्छामिप्रीता
भवतुभारती ॥ ८७ ॥ पुराणंशृणुयान्नित्यंधर्मशास्त्रमथापिवा ॥ पुण्यवान्धन
वान्भोगीसत्यशौचपरायणः ॥ ८८ ॥ ज्ञानवान्लोकविख्यातोबहुशिष्यःसुधा
र्मिकः ॥ कांचनेनयुतंवस्त्रंपुस्तकंचनिवेदयत् ॥ ८९ ॥ नाममंत्रव्रतपरः शंभोर्वा
केशवस्यच ॥ समाप्तौमतिमांदद्यात्तस्यदेवस्यकांचनीम् ॥ ९० ॥ पंचवक्त्रोवृ-
षारूढः प्रतिवक्त्रंत्रिलोचनः ॥ कपालशूलखट्वांगीचंद्रमौलिःसदाशिवः ॥ ९१
॥ त्वयासुराणाममृतंविहायहालाहलंसंहृतमेवयस्मात् ॥ तथाऽसुराणांत्रि
पुरंचदग्धमेकेषुणालोकहितार्थमीश ॥ ९२ ॥ त्वद्रूपदा ताद्दहु पुण्यवांश्चदोषै-
र्विमुक्तश्चगुणालयोहम् ॥ तथाकुरुत्वांशरणंप्रपद्येममप्रभोदेववरप्रसीद ॥
॥ ९३ ॥ कृतनित्यक्रियोभूत्वासूर्यायार्घ्यंनिवेदयेत ॥ सूर्यमंडलमध्यस्थंदेवं-
ध्यात्वाजनार्दनम् ॥ ९४ ॥ समाप्तौकांचनंदद्याद्रक्तवस्त्रंचगांतथा ॥ आरो-
ग्यपूर्णमायुश्चकीर्तिर्लक्ष्मीर्बलंभवेत् ॥ ९५ ॥ तिलहोमंतुयःकुर्याच्चातुर्मास्ये

द्रैः किल्बिषापहम् ४०तस्माद्देयंप्रयत्नेनविष्णुर्दिशतिवांछितम् ॥ सप्तमासाव
पितद्द्यात्तुलापरिमितंशुभम् ॥४१॥ तदर्धंवातदर्धंवा सवस्त्रंचसदक्षिणाम्
॥ यस्तुसुप्तेहृषीकेशेमत्स्यहृत्तुव्रतान्वितः ॥४२॥ दद्याद्दक्षिणयासार्द्धंशर्करा
मपिवागुडम् ॥ अमृतस्यकलाभोक्ताइक्षुसारजशर्करा ॥४३॥ तस्यादानेन
संतुष्टोभानुर्दिशतिवांछितम् ॥ एवंव्रतेतुसंपूर्णेकुर्यादुद्यापनंबुधः ॥४४॥
कारयेत्ताम्रपात्राणिप्रत्येकंतुफलाष्टकम् ॥ वित्तशाठ्यमकुर्वाणोयद्वाफल
चतुष्टयम् ॥४५॥ अष्टौचत्वार्यथैकेकंप्रत्येकंचसशर्करम् ॥ दक्षिणाफलव
स्त्रेणप्रत्येकंवेष्टितानिच ॥४६॥ सहधान्यानिविप्रेभ्यः श्रद्धयाप्रतिपादयेत्
॥ ताम्रपात्रंसवस्त्रंचशर्कराहेमसंयुतम् ॥४७॥ सूर्यप्रीतिकरंयस्माद्रोग
घ्नंपापनाशनम् ॥पुष्टिदंकीर्तिदंनॄणांनित्यंसंतानकारकम् ॥४८॥ सर्वकाम
प्रदंस्वर्ग्यमायुर्वर्द्धनमुत्तमम् ॥ तस्मादस्यप्रदानेनकीर्तिरस्तुसदामम ॥४९
एवंव्रतंतुयःकुर्यात्तस्यपुण्यफलंशृणु ॥ गंधर्वविद्यासंपन्नः सर्वयोषित्प्रियो
भवेत् ॥५०॥ राजापिलभतेराज्यंपुत्रार्थीलभतेसुतान् ॥ अर्थार्थीप्राप्नुया

दर्थीनिष्कामोमोक्षमाप्नुयात् ॥५१॥ यस्तुवैचतुरोमासान्शाकमूलफलादिकम्
॥ नित्यंददातिविप्रेभ्यः शक्त्यायत्नंभवेद्द्विजः ॥५२॥ व्रतांतेवस्त्रयुग्मंचशक्त्या
दद्यात्सदक्षिणम् ॥ सुखीभूत्वाचिरंकालंराजयोगीभवेन्नरः ॥ ५३॥ सर्वदेव
प्रियंयस्माच्छाकंतृप्तिकरंनृणाम् ॥देवर्षिप्रीतिदंकंदमूलपत्रसपुष्पकम् ॥५४
॥ ददामितेनदेवाद्याः सदाकुर्वंतुमंगलम् ॥ यस्तुसुप्तेहृषीकेशेप्रत्यहंतुऋतुद्व
ये ॥ ५५ ॥ दद्यात्कटुत्रयंमर्त्योगृहपर्याप्तमादरात् ॥ ब्राह्मणायसुशीलायदीने
शप्रीतयेनघ ॥५६॥ दक्षिणासहितेविप्रेमंत्रेणानेनसुव्रत ॥ कटुत्रयमिदंयस्मा
द्रोगघ्नंसर्वदेहिनाम् ॥५७॥ तस्माद‌स्यप्रदानेनप्रीतोभवतुभास्करः ॥ एवंकृ
त्वाव्रतंसम्यक्कुर्यादुद्यापनंबुधः ॥ ५८ ॥ कृत्वास्वर्णमयींशुंठिंमरीचिंमागः
धीमपि ॥ सवस्त्रांदक्षिणायुक्तांदद्याद्विप्रायधीमते ॥ ५९ ॥ एवंव्रतंयःकुरुते
सजीवेच्छरदांशतम् ॥ प्राप्नुयादीप्सितानर्थानंतेस्वर्गंव्रजेदिति ॥ ६० ॥ मुक्ता
फलानियोदद्यान्नित्यंविप्रायसन्मतिः ॥ अन्नवान्कीर्तिमान्श्रीमान्जायतेव
सुधाधिप ॥६१॥ चातुर्मास्येप्रत्यहंतुक्षीरकुंभंप्रदापयेत् ॥ वेष्टयित्वासुवस्त्रे

 

णफलैर्दक्षिणयासह ॥ ६२ ॥ सुवासिनीं श्रियंमत्वागंधपुष्पैरथार्चयेत् ॥ तांबूलं
फलमेकंवादद्याच्छ्रीपतयेनमः ॥ ६३ ॥ समाप्तोयोषितंविप्रंसूक्ष्मवस्त्रविभूषणैः
॥ मिथुनंपूजयित्वातुजातिपुष्पैःसुशोभनैः ॥ ६४ ॥ पुमांस्तुस्त्रियमाप्नोतिनारी
भर्त्तारमाप्नुयात् ॥ पुमांस्तुश्रियमाप्नोतिसकलामिवमाधवः ॥ ६५ ॥ तांबूलदा
नंयःकुर्याद्वर्जयेद्वाजितेंद्रियः ॥ रक्तवस्त्रद्वयंदद्यात्करकंचसदक्षिणम् ॥ ६६
॥ महालावण्यमाप्नोतिसर्वरोगविवर्जितः ॥ मेधावीसुभगःप्राज्ञोरक्तकंठश्च
जायते ॥ ६७ ॥ गंधर्वत्वमवाप्नोतिस्वर्गलोकंचगच्छति ॥ तांबूलंश्रीकरंभद्रंब्र
ह्मविष्णुशिवात्मकम् ॥ ६८ ॥ अस्यप्रदानाद्ब्रह्माद्याःश्रियंददतुपुष्कलाम् ॥
पूगेब्रह्माहरिःपत्रेचूर्णेसाक्षान्महेश्वरः ॥ ६९ ॥ एतेषांसंप्रदानेनसंतुमेभाग्यसं
पदः ॥ पूरितंपूगचूर्णेननागवल्लीदलान्वितम् ॥ ७० ॥ सचूर्णखादिरंचैवपत्रीफ
लसमन्वितम् ॥ एलालवंगसंमिश्रंगंधर्वाप्सरसांप्रियम् ॥ ७१ ॥ कनकत्वंनिरा
तंकत्वंप्रसादात्कुरुष्वमाम् ॥ चातुर्मास्यव्रतोपेतःसुवासिन्यैद्विजायच ॥ ७२ ॥ ४५
नारीवापुरुषोवापिहरिद्रांसंप्रयच्छति ॥ लक्ष्मीमुद्दिश्यगौरींवातत्पात्रेदक्षि

तंभूमौनमस्कारेणयोऽर्चयेत् ॥ २९॥ सयांगतिमवाप्नोतिनतांक्रतुशतैरपि ॥ य
स्तुरौप्यंशिवप्रीत्यैदद्याद्दृषीकऋतुलये ॥३०॥ ताम्रंवाप्रत्यहंदद्यात्स्वशक्त्याशि-
वतुष्टये ॥ सुरूपाल्लभतेपुत्रान्रुद्रभक्तिपरायणान् ॥ ३१ ॥ समामेमधुपूर्णंतु
पात्रंराजतमुत्तमम् ॥ प्रदद्यात्ताम्रदानेनताम्रपात्रंगुडान्वितम् ॥ ३२ ॥ ताम्रं
पुष्टिकरंसर्वदेवप्रियकरंशुभम् ॥ सर्वरक्षाकरंनित्यमतः शांतिंप्रयच्छमे ॥ ३३ ॥
यस्तुसुप्तेहृषीकेशेस्वर्णदानंस्वशक्तितः ॥ वस्त्रयुग्मतिलैः सार्द्धं दत्वापापैः प्र-
मुच्यते ॥ ३४ ॥ इहभुक्त्वामहाभोगानंतेशिवपुरंव्रजेत् ॥ सुवर्णरजतंताम्रंनित्य
दानंचधान्यकम् ॥ ३५ ॥ नित्यश्राद्धंदेवपूजांसर्वंगेतत्सदक्षिणम् ॥ वस्त्रदानं
तुयःकुर्याच्चातुर्मास्येद्विजातये ॥ ३६ ॥ अभ्यर्च्यगंधपुष्पाद्यैःसविष्णुःप्रीयता
मिति ॥ शय्यांदद्यात्समासेतुवासः कांचनपट्टिकाम् ॥ ३७ ॥ अक्षय्यंसुखमाप्नो
तिधनंचधनदोपमम् ॥ यागोपीचंदनंदद्यान्नित्यंवर्षासुमानवः ॥ ३८ ॥ श्रीपति
स्तस्यसंतुष्टोभुक्तिंमुक्तिंददातिच ॥ यद्देवांगसंलग्नंकुंकुमादिविलेपनम् ॥
॥ ३९ ॥ जलक्रीडासुगोपीनांहारवस्त्रामुदान्वितम् ॥ गोपीचंदनमित्युक्तंमुनीं-

नित्यंवामनमुद्दिश्यदध्यन्नंस्वादुषड्रसम् ॥ भोजयेदथवादद्यादेकादश्यांनभोजयेत्
॥८५॥दानमेवंप्रकुर्वीतग्रहणादौतथैवच ॥ अशक्तोनित्यदानेतुकुर्यात्संचसुपर्व-
सु ॥ ८६ ॥ भूताष्टम्याममायांचपूर्णिमायांतथापिच ॥ प्रत्यर्कवारमथवाप्रति-
भार्गववासरम् ॥ ८७॥ पक्षद्वयेपिद्वादश्यामवश्यंदानमेवच ॥ एवंकृत्वासमाप्तौ
तुयथाशक्तिमहींददेत् ॥८८॥ अशक्तोभूमिदानेतुधेनुंदद्यादलंकृताम्॥ तथा-
प्यशक्तोवासश्चसुरुक्मंपादुकेतथा ॥ छत्रोपानद्धस्त्रयुतंदानंसर्वप्रशस्यते ॥
८९॥ द्विजानांभोजनंचैवक्षत्रियस्ययथासुखम् ॥ भूम्यादिमुनिशार्दूलवैश्यस्य
वसुधांविना ॥ ९०॥ ब्राह्मणस्यापिशक्तस्यशूद्रस्यापितथामतम् ॥ कुबेरेणपु-
राचीर्णंशंकरस्योपदेशतः ॥ ९१॥ जन्हुनागौतमेनापिशक्रेणापिकृतंपुरा ॥ अ
क्षय्यमन्नमाप्नोतिपुत्रपौत्रादिसंपदम् ॥ ९२॥ हृदंगः पूर्णमायुष्यंलभतेवैरिनाश
नम् ॥ सुस्थिरांविष्णुभक्तिंचप्रयातिहरिमंदिरम् ॥ ९३॥ आरोग्यंसौख्यमतुलं
रूपंसंपत्तिमेवच ॥ नवंध्याजायतेचेदमनंतफलदायकम् ॥ ९४ ॥ नित्यंपय-
स्विनींदद्यात्सालंकारांशुभावहाम् ॥ दत्वातुदक्षिणांशक्त्यासर्वज्ञानवान्भ

वेत् ॥९५॥ नपरप्रेष्यतांयातिब्रह्मलोकंचगच्छति ॥ अक्षय्यंसुखमाप्नोतिपितृ
भिः सहितोनरः ॥ ९६ ॥ वार्षिकान्चतुरोमासान्प्राजापत्यंचरेन्नरः ॥ समाप्तौ
गोयुगंदद्यात्कृत्वाब्राह्मणभोजनम् ॥९७ ॥ सर्वपापविशुद्धात्मायातिब्रह्मस-
नातनम् ॥एकांतरोपवासेतुदीपाण्यष्टौप्रदापयेत् ॥ ९८॥ वस्त्रकांचनयुक्तानि
शय्ययासहभामिनि ॥ अनडुह्यसंयुक्तंलांगलंकर्षणक्षमम् ॥ ९९ ॥ सर्वोप
स्करसंयुक्तंददामिप्रीयतांहरिः ॥ शाकमूलफलैर्वापिचातुर्मास्यंनयेन्नरः ॥
२००॥ समाप्तौगोप्रदानेनसगच्छेद्विष्णुमंदिरम् ॥ पयोव्रतीतथाऽप्नोतिब्रह्म-
लोकंसनातनम् ॥१॥ व्रतांतेचतथादद्याद्गामेकांचपयस्विनीम् ॥ रंभाफलप-
लाशेषुयोभुंक्तेचऋतुद्वये ॥२॥ वस्त्रयुग्मंचकांस्यंचशान्त्यादद्यात्सुखीभवेत्
॥ कांस्येब्रह्माशिवोलक्ष्मीः कांस्यमेवविभावसुः ॥३॥ कांस्यंविष्णुमयंयस्माद
तः शांतिंप्रयच्छमे ॥ नित्यंपलाशभोजीचतैलाभ्यंगविवर्जितः ॥४॥ सनिहंत्य
तिपापानितूलराशिमिवानलः ॥ ब्रह्मघ्नश्चसुरापश्चबालघातकरश्चयः ॥५॥
असत्यवादिनोयेचस्त्रीघातीव्रतघातकः ॥ अगम्यागामिनश्चैववविधवागामिन

स्तया ॥ ६॥ चांडालीगामिनश्चैवविप्रस्त्रीगामिनस्तथा ॥ तेसर्वेपापनिर्मुक्तात्र
तेनानेनकेशव ॥ ७॥ समासौकांस्यपात्रंतुचतुःषष्टिपलैर्युतम् ॥ सवत्सांगांच
वैदद्यात्सालंकारांपयस्विनीम् ॥ ८ ॥ अलंकृतायविदुषेसुवस्त्रायसुवेषिणे ॥
भूमौविलिप्यंयोभुंक्तेदेवंनारायणंस्मरन् ॥ ९॥ दद्याद्भूमिंयथाशक्तिकृष्यांबहु
जलांतिके ॥ आरोग्यपुत्रसंपन्नोराजाभवतिधार्मिकः ॥ १०॥ शत्रोर्भयंनलभं
तेविष्णुंलोकंसगच्छति ॥ अयाचितेत्वनड्वाहंसहिरण्यंसचंदनम् ॥११ ॥ षड्रसं
भोजनंदद्यात्सयातिपरमांगतिम् ॥ यस्तुसुप्तेहृषीकेशेनक्तंचकुरुतेव्रतम् ॥
१२॥ ब्राह्मणान्भोजयेत्पश्चाच्छिवलोकेमहीयते ॥ एकभक्तंनरः कृत्वामि-
ताशीचदृढव्रतः ॥१३॥ योऽर्चयेच्चतुरोमासान्वासुदेवंसनाकभाक् ॥ समा-
प्तौभोजयेद्विप्रान्शक्त्यादद्याच्चदक्षिणाम् ॥ १४ ॥ यस्तुसुप्तेहृषीकेशेक्षितिशा
यीभवेन्नरः ॥ शय्यांसोपस्करांदद्याच्छिवलोकेमहीयते ॥१५॥ पादाभ्यंगंन
रोयस्तुवर्जयेच्चऋतुद्वये ॥ पादाभ्यंगंनरःकुर्याद्ब्राह्मणानांचभोजनम् ॥१६॥
दक्षिणांचयथाशक्त्यासगच्छेद्विष्णुमंदिरम् ॥ आषाढादिचतुर्मासान्वर्जयेन्न

णान्वितम् ॥७३॥ प्रदद्याद्भक्तिसंयुक्तं देवीमेप्रीयतामिति ॥ भर्त्रासहसुखं
भुंक्तेनारीनार्यातथापुमान् ॥७४॥ सौभाग्यमक्षयंधान्यंधनपुत्रसमुन्नतिं
॥ संप्राप्यरूपलावण्येदेवीलोकेमहीयते ॥७५॥ उमामहेशमुद्दिश्यचातुर्मास्ये
दिनेदिने ॥ संपूज्यविप्रमिथुनंतस्मैविप्रायशक्तितः ॥७६॥ दद्यात्सदक्षिणंहै
मंउमेशःप्रीयतामिति ॥ उमेशप्रतिमांहैमींदद्यादुद्यापनेबुधः ॥७७॥ पंचोप
चारैः संपूज्यधेन्वाचवृषभेणच ॥ भोजयेदपिमिष्टान्नंतस्यपुण्यफलंशृणु ॥७८
॥सौभाग्यंपूर्णमायुष्यंसंपत्तिश्चानपायिनी ॥ संपत्तिरक्षयाकीर्तिर्जायतेव्रत
वैभवात् ॥ ७९॥ इहभुक्त्वाऽखिलान्कामानंतेशिवपुरंव्रजेत् ॥ तत्रस्थित्वाचिरं
कालमुपभुज्यसुखंमहत् ॥८०॥ पुण्यशेषादिहागत्यजायतेधरणीपतिः ॥फ
लदानंतुयःकुर्याच्चातुर्मास्यमतंद्रितः ॥८१॥ समासौकलधौतानितानिदद्या-
द्द्विजातये ॥ सर्वान्मनोरथान्प्राप्यसंततिंचानपायिनीम्॥ ८२॥ फलदानस्यमा
हात्म्यान्मोदतेनंदनेवने ॥ पुष्पदानव्रतेनापिस्वर्णपुष्पादिदापयेत् ॥८३॥ससौ
भाग्यंपरंप्राप्यगंधर्वपदमाप्नुयात् ॥ वासुदेवेप्रसुप्तेतुचातुर्मास्यमतंद्रितः॥८४॥

॥गोधूमाः सर्वजंतुनांबलपुष्टिविवर्द्धनाः ॥ मुख्याश्चहव्यकव्येषुतस्मान्मंददतुश्रि
यम् ॥२९॥ आषाढादिचतुर्मासान्वृंताकंवर्जयेन्नरः ॥ कारवल्लीफलंवापिअलां
बुंपडवलंतथा ॥३०॥ यद्दातद्दाफलंवापियच्चप्रियतमंभवेत् ॥ चातुर्मास्येततो
वृत्तेरौप्यान्येतानिकारयेत् ॥३१॥ मध्येविद्रुमयुक्तानिह्यर्चयित्वातुशक्तितः॥
दद्याद्दक्षिणयासार्द्धंब्राह्मणायातिभक्तितः ॥३२॥ अभीष्टंदेवमुद्दिश्यदेवो
मेप्रीयतामिति ॥ सदीर्घमायुरारोग्यंपुत्रपौत्रान्सुरूपताम् ॥३३॥ अक्षय्यां
संततिंकीर्तिंलब्ध्वास्वर्गेमहीयते ॥ फलत्यागीभवेद्यस्तुविष्णुलोकेसपूज्यते
॥३४॥ समासेकलधौतानितानिदद्याद्द्विजातये ॥ श्रावणेवर्जयेच्छाकंदधि-
भाद्रपदेतथा ॥३५॥ दुग्धमाश्वयुजेमासिकार्तिकेद्विदलंत्यजेत् ॥ चत्वार्येता
निनित्यानिचतुराश्रमवर्तिनां ॥३६॥ प्रथमेमासिकर्तव्यंनित्यंशाकव्रतंनरैः ॥
द्वितीयेमासिकर्तव्यंदधिव्रतमनुत्तमं ॥३७॥ पयोव्रतंतृतीयेतुचतुर्थेद्विदलं
तथा ॥ कूष्मांडंराजमाषांश्चमूलकंगृंजनंतथा ॥३८॥ करमर्द्दंचेक्षुदंडंचातु
र्मास्येत्यजेन्नरः ॥ मसूरंबहुबीजंचवृंताकंचैववर्जयेत् ॥३९॥ नित्यान्येतानि

विप्रेंद्रव्रतान्याहुर्मनीषिणः ॥ विशेषाद्बदरीं धात्रीमलाबुंचिंचिणीं त्यजेत् ॥ ४० ॥
जीर्णधात्रीफलंग्राह्यंजीर्णाग्राह्याचचिंचिणी ॥ वार्षिकान्चतुरोमासान्प्रसुप्ते
चजनार्दने ॥ ४१ ॥ मंचखट्वादिशयनंवर्जयेद्भक्तिमान्नरः ॥ अनतौवर्जयेद्भार्यां
ऋतौगच्छेन्नदुष्यति ॥ ४२ ॥ मधुवेल्लींचशिग्रुंचचातुर्मास्येत्यजेन्नरः ॥ वृंताकं
चकलिंगंचबिल्वोदुंबरभिःसदा ॥ ४३ ॥ उदरेयस्यजीर्यंतेतस्यदूरतरोहरिः ॥ उप
वासस्तथानक्तमेकभक्तमयाचितम् ॥ ४४ ॥ अशक्तस्तुयथाकुर्यात्सायंप्रात
रखंडितम् ॥ स्नानपूजादिसंयुक्तःसनरोहरिलोकभाक् ॥ ४५ ॥ गीतवाद्यकरो
विष्णोर्गांधर्वलोकमाप्नुयात् ॥ मधुभुक्त्वभवेद्राजापुरुषोगुडवर्जनात् ॥ ४६
॥ लभेद्वसंततिंदीर्घांपुत्रपौत्रादिवर्धिनीम् ॥ तैलस्यवर्जनाद्राजन्सुंदरांगःप्र-
जायते ॥ ४७ ॥ कौसुंभतैलसंत्यागाच्छत्रुनाशमवाप्नुयात् ॥ मधूकतैलत्यागा
त्सुसौभाग्यफलंलभेत् ॥ ४८ ॥ कटुतिक्तंचमधुरंकषायलवणान्रसान् ॥ व-
र्जयेत्सचवैरूप्यंदौर्गंध्यंनाप्नुयात्सदा ॥ ४९ ॥ पुष्पादिभोगत्यागेनस्वर्गेविद्याध
रोभवेत् ॥ योगाभ्यासीभवेद्यस्तुसब्रह्मपदवीमियात् ॥ ५० ॥ तांबूलवर्जनाद्भो

गीसद्योमुक्तामयोभवेत् ॥पादाभ्यंगपरित्यागाच्छिरोभ्यंगस्यपार्थिव ॥ ५१ ॥
दीप्तिमान्दीप्तकरणोयक्षद्रव्यपतिर्भवेत् ॥ ५२ ॥दधिदुग्धपरित्यागीगोलोकंल
भतेनरः ॥इहलोकमवाप्नोतिस्थालीपाकविवर्जनात् ॥ एकांतरोपवासेनब्रह्म
लोकेमहीयते ॥५३ ॥ चतुरोवार्षिकान्मासान्नरवरोमाणिधारयेत् ॥कल्पस्था-
यीभवेद्राजन्सनरोनात्रसंशयः ॥५४॥ नमोनारायणायेतिजपित्वाऽनंतकंफलम् ॥
विष्णुपादांबुजस्पर्शात्कृतकृत्योभवेन्नरः ॥५५॥ लक्षप्रदक्षिणायस्तुकरोतिहरि
मव्ययम् ॥ हंसयुक्तविमानेनसयातिवैष्णवींपुरीम् ॥५६॥ त्रिरात्रभोजनत्यागा
न्मोदतेदिविदेववत् ॥ परान्नवर्जनाद्राजन्देवोवैमानुषोभवेत् ॥५७॥ प्राजापत्यं
चरेद्योवैचातुर्मास्यव्रतन्नरः ॥ मुच्यतेपातकैः सर्वैस्त्रिविधैर्नात्रसंशयः ॥५८
॥ तप्तकृच्छ्रातिकृच्छ्राभ्यांयःक्षिपेच्छयनंहरेः ॥ सयातिपरमंस्थानंपुनरावृत्तिव
र्जितम् ॥५९॥ चांद्रायणेनयोराजन्क्षिपेन्मासचतुष्टयम् ॥ दिव्यदेहोभवेत्सोथ
शिवलोकंचगच्छति ॥६०॥ चातुर्मास्येनरोयोवैत्यजेदन्नादिभक्षणम् ॥सगः
च्छेद्धरिसायुज्यंनभूयस्तुप्रजायते ॥६१॥ भिक्षाभोजीनरोयोहिसभवेद्वेदपा

खवर्कुंतनम् ॥१७॥ आरोग्यपुत्रसंपन्नोराजाभवतिधार्मिकः॥ पायसंलवणंचैवम
धुसर्पिःफलानिच॥१८॥चातुर्मास्येवर्जयतिगौरीशंकरतुष्टये॥ कार्तिक्यांचपुन-
स्तानिब्राह्मणायनिवेदयेत् ॥ १९॥ सरुद्रलोकमाप्नोतिरुद्रव्रतनिषेवणात् ॥ य
वान्नंभक्षयेद्यस्तु अथवाशालयःशुभाः ॥२०॥पुत्रपौत्रादिभिः सार्द्धंशिवलो
केमहीयते ॥तैलाभ्यंगपरित्यागीविष्णुभक्तः सदाव्रती॥२१॥ वर्षासुविष्णु-
मभ्यर्च्यवैष्णवींलभतेगतिम् ॥समाप्तौकांस्यपात्रंचसुवर्णेनसमन्वितम् ॥२२
तैलेनपूरितंकृत्वाब्राह्मणायनिवेदयेत् ॥ वार्षिकान्चतुरोमासान्शाकादिपरिव
र्जयेत्॥२३॥ विष्णुलोकमवाप्नोतिपितृतृप्तिः प्रजायते ॥व्रतांतेहरिमुद्दिश्यपा
त्रंराजतमेवहि॥२४॥वस्त्रेणवेष्टयेद्धूपपत्रपुष्पैः समर्चयेत्॥ मूलपत्रकरी
राग्रफलकांडादिरूढकः ॥२५॥ त्वक्पुष्पंकवचंचेतिशाकमष्टविधंस्मृतम् ॥
समभ्यर्च्ययथाशक्त्याब्राह्मणान्वेदपारगान् ॥२६॥ दद्याद्दक्षिणया सार्द्धंव्रत
संपूर्णहेतवे ॥शिवसायुज्यमाप्नोतिप्रसादाच्छूलपाणिनः ॥२७॥ अपूपवर्जनं
कृत्वाभोजनव्रतमाचरेत् ॥कार्तिकेस्वर्णगोधूमोन्वस्त्रंदत्वाऽश्वमेधकृत्॥२८

श्रा॰कृ॰ ४९ ॥ब्रह्मोवाच ॥ शृणुनारदतेवच्मिलोकानांहितकाम्यया ॥ श्रावणेकादशीकृ- ए॰कृ॰
ष्णाकामिकेतिचनामतः ॥६॥ तस्याःश्रावणमात्रेणवाजपेयफलंलभेत् ॥
तस्यांयःपूजयेद्देवंशंखचक्रगदाधरम् ॥७॥ श्रीधराख्यंहरिंविष्णुंमाधवंम
धुसूदनम् ॥ यजतेध्यायतेयोवैतस्यपुण्यफलंशृणु ॥८॥ नगंगायांनकाश्यां
वैनैमिषेनचपुष्करे ॥ तत्फलंसमवाप्नोतियत्फलंविष्णुपूजनात् ॥९॥ केदारे
चकुरुक्षेत्रेराहुग्रस्तेदिवाकरे ॥ नतत्फलमवाप्नोतियत्फलंकृष्णपूजनात् ॥
१०॥ ससागरवनोपेतांयोददातिवसुंधराम् ॥ गोदावर्यांगुरौसिंहेव्यतीपातेच
गंडके ॥११॥ नतत्फलमवाप्नोतियत्फलंकृष्णपूजनात् ॥ कामिकाव्रतकारी
चद्वुभौफलसमौस्मृतौ ॥१२॥ प्रसूयमानांयोधेनुंदद्यात्सोपस्करांनरः ॥ तत्फ
लंसमवाप्नोतिकामिकाव्रतकारकः ॥ १३ ॥श्रावणेश्रीधरंदेवंपूजयेद्योनरोत्तमः
॥ तेनैवपूजितादेवागंधर्वोरगपन्नगाः ॥१४॥ तस्मात्सर्वप्रयत्नेनकामिकादिव
सेहरिः ॥ पूजनीयोयथाशक्त्यामनुष्यैःपापभीरुभिः ॥१५॥ संसारार्णवम ४९
ग्नायेपापपंकसमाकुलाः ॥ तेषामुद्धरणार्थायकामिकाव्रतमुत्तमम् ॥ १६ ॥

नातः परतराकाचित्सविन्नापापहारिणी ॥ एवंनारदजानीहिस्वयमाहपुराह-
रिः ॥१७॥ अध्यात्मविद्यानिरतैर्यत्फलंप्राप्यतेनरैः ॥ ततोबहुतरंविद्धिका
मिकाव्रतसेवनात् ॥१८॥ रात्रौजागरणंकुर्यात्कामिकाव्रतकृन्नरैः ॥ ॥
नपश्यतियमंरौद्रं नैवपश्यतिदुर्गतिम् ॥ ॥१९॥ ॥ नपश्यतिकुयोनि-
चकामिकाव्रतसेवनात् ॥ कामिकायाव्रतेनैवकैवल्यंयोगिनोगताः॥ सर्वैस्सर्व
प्रयत्नेनकर्तव्यानियतात्मभिः ॥२०॥ तुलसीप्रभवैःपत्रैर्योनरःपूजयेद्धरिम्
॥ नवैसलिप्यतेपापैःपद्मपत्रमिवांभसा ॥२१॥ सुवर्णभारमेकंतुरजतंचचतुर्गु
णम् ॥ तत्फलंसमवाप्नोतितुलसीदलसेवनात् ॥२२॥ रत्नमौक्तिकवैडूर्यप्र
वालादिभिरर्चितः ॥ नतुष्यतितथाविष्णुस्तुलसीपूजनाद्यथा ॥२३॥ तुलसीमं
जरीभिस्तुपूजितोयेनकेशवः ॥ आजन्मकृतपापस्यतेनसंमार्जितालिपिः ॥
॥२४॥ याद्दृष्टानिखिलाघसंघशमनीस्पृष्टावपुःपावनीरोगाणामभिवंदितानि
रसनीसिक्तांतकत्रासिनी ॥ प्रत्यासत्तिविधायिनीभगवतःकृष्णस्यसंरोपि
तान्यस्तातच्चरणेविमुक्तिफलदातस्यैतुलस्यैनमः ॥२५॥ दीपंददातियोमर्त्यो

दिवारात्रौहरेर्दिने ॥ तस्यपुण्यस्यसंख्यानंचित्रगुप्तोपिवेत्तिन ॥२६॥ कृष्णा
ग्रेदीपकोयस्यज्वलेदेकादशीदिने ॥ पितरस्तस्यतृप्यंति अमृतेनदिविस्थिताः
॥२७॥ घृतेनदीपंप्रज्वाल्यतिलतैलेनवापुनः ॥ प्रयातिसूर्यलोकेऽसौदीपको
टिशतैर्वृतः ॥२८॥ अयंतवाग्रेकथितःकामिकामहिमामया ॥ अतोनरैःप्रक
र्तव्यासर्वपातकहारिणी ॥२९॥ ब्रह्महत्याऽपहरणीभ्रूणहत्याविनाशिनी ॥
त्रिदिवस्थानदात्रीचमहापुण्यफलप्रदा ॥३०॥ श्रुत्वामाहात्म्यमेतस्यानरःश्रद्धा
समन्वितः ॥ विष्णुलोकमवाप्नोतिसर्वपापैःप्रमुच्यते ॥३१॥ ॥इतिश्रीब्रह्म
वैवर्तेश्रावणकृष्णैकादशीकामिकामाहात्म्यंसमाप्तम् ॥ ॥अथश्रावणशुक्लै
कादशीकथा ॥ ॥युधिष्ठिरउवाच ॥ ॥श्रावणस्यसितेपक्षेकिंनामैकादशी
भवेत् ॥कथयस्वप्रसादेनममाग्रेमधुसूदन ॥१॥ ॥श्रीकृष्णउवाच ॥ ॥शृ
णुष्वावहितोराजन्कथांपापहरांपराम् ॥ यस्याःश्रवणमात्रेणवाजपेयफलंल
भेत् ॥२॥ द्वापरस्ययुगस्यादौपुरामाहिष्मतीपुरे ॥ राजामहीजिदाख्यातोरा-
ज्यंपालयतिस्वयम् ॥३॥ पुत्रहीनस्यतस्यैवनतद्राज्यंसुखप्रदम् ॥ अपुत्रस्य

रगः ॥ पयोव्रतेनयोराजन्क्षिपेन्मासचतुष्टयम् ॥६२॥ तस्यवंशसमुच्छेदः क-
दाचिन्नोपपद्यते ॥ पंचगव्याशनःपार्थचांद्रायणफलंलभेत् ॥६३॥ दिनत्रयंज
लत्यागान्नरोगैरभिभूयते ॥ एवमादिव्रतैपार्थतुष्टिमायातिकेशवः ॥६४॥ दु
ग्धाब्धिर्वाचिशयनेभगवाननंतोयस्मिन्दिनेस्वपितिचाथविबुध्यतेच ॥ तस्मि-
न्ननन्यमनसामुपवासभाजांपुंसांददातिचगतिंगरुडासनोऽसौ ॥ ॥६५॥
इतिश्रीभविष्योत्तरपुराणेविष्णोः शयन्येकादशीचातुर्मास्यमाहात्म्यंसपूर्णम् ॥
॥ अथश्रावणकृष्णैकादशीकथा ॥ ॥युधिष्ठिरउवाच ॥ ॥ आषाढस्यशुक्लपक्षे
तुमहद्देवशयनव्रतं ॥ तन्मयाश्रुतपूर्वंहिपुराणेबहुविस्तरं ॥१॥ श्रावणेकृष्णपक्षे
तुकिंनामैकादशीभवेत् ॥ एतत्कथयगोविंदवासुदेवनमोस्तुते ॥२॥ ॥श्रीकृ-
ष्णउवाच ॥ शृणुराजन्प्रवक्ष्यामिव्रतंपापप्रणाशनम् ॥ नारदायपुराराजन्पृच्छ
तेचपितामहः ॥३॥ परंयदुक्तवान्तानतदहंतेवदामिच ॥ ॥नारदउवाच ॥
भगवन्श्रोतुमिच्छामित्वत्तोऽहंकमलासन ॥४॥ श्रावणस्यासितेपक्षेकिं
नामैकादशीभवेत् ॥ कोदेवः कोविधिस्तस्याः किंपुण्यंकथयप्रभो ॥५॥

॥ अतोलोमशनामानंत्रिकालज्ञंमहामुनिम् ॥ १५ ॥ तंदृष्ट्वाहर्षिताः सर्वेआग्मु-
स्तस्यसन्निधिम् ॥ यथान्यायंयथार्हंतेनमश्चक्रुर्यथोदितम् ॥१६॥ विनयाऽव
नताःसर्वेऊचुश्चैवपरस्परम् ॥ अस्मद्भाग्यवशादेवप्राप्तोऽयंमुनिसत्तमः ॥१७
॥ तांस्तथाप्रणतान्दृष्ट्वाप्युवाचमुनिसत्तमः ॥ लोमशउवाच ॥ ॥ किमर्थमिह
संप्राप्ताः कथयध्वंसकारणम् ॥ १८ ॥ मद्दर्शनाल्हादगिरःस्तुवंतइवमांकिमु
॥ असंशयंकरिष्यामिभवतांयद्धितंभवेत् ॥१९॥ परोपकृतयेजन्ममादृशा
नांनसंशयः ॥ ॥जनाऊचुः ॥ ॥ श्रूयतामभिधास्यामोवयमागमकारण
म् ॥ २० ॥ संशयच्छेदनार्थायतवसन्निधिमागताः ॥ पद्मयोनेःपरतरस्त्वत्तः
श्रेष्ठोनविद्यते ॥ २१ ॥ अतः कार्यवशात्प्राप्ताः समीपंभवतोवयम् ॥ महीजि
न्नामराजाऽसौपुत्रहीनोऽस्तिसांप्रतम् ॥ २२ ॥ वयंतस्यप्रजाब्रह्मन्पुत्रवत्ते
नपालिताः ॥ तंपुत्ररहितंदृष्ट्वातस्यदुःखेनदुःखिताः ॥ २३ ॥ तपःकर्तुमिहा
यातामतिंकृत्वातुनैष्ठिकीम् ॥ तस्यभाग्यवशाद्दृष्टस्त्वमस्माभिर्द्विजोत्तम ॥
॥२४॥ महतांदर्शनेनैवकार्यसिद्धिर्भवेन्नृणाम् ॥ उपदेशंवदमुनेराज्ञःपुत्रो-

यथा भवेत् ॥ २५ ॥ इतितेषांवचः श्रुत्वामुहूर्त्तंध्यानमास्थितः ॥ प्रत्युवाचमुनि
र्ज्ञात्वातस्यजन्मपुरातनम् ॥ २६ ॥ ॥ लोमशउवाच ॥ ॥ पूर्वजन्मनिवैश्योऽ
यंधनहीनोनृशंसकृत् ॥ वाणिज्यकर्मनिरतोग्रामाद्ग्रामांतरंभृशम् ॥ २७ ॥
ज्येष्ठमासिसितेपक्षेद्वादशीदिवसेतथा ॥ मध्यान्हेद्युमणौप्राप्तेग्रामसीम्नि
जलाशयम् ॥ २८ ॥ कूपिकांसजलांदृष्ट्वाजलपानेमनोदधौ ॥ सद्यःसूतासव
त्साचधेनुस्तत्रसमागता ॥ २९ ॥ तृषातुरानिदाघार्तातस्यामापःपपौतुसा
॥ पिबंतीवारयित्वातामसौतोयंस्वयंपपौ ॥ ३० ॥ कर्मणस्तस्यपापेनसपुत्ररहि
तोनृपः ॥ पूर्वजन्मकृतात्पुण्यात्प्राप्तराज्यमकंटकम् ॥ ३१ ॥ ॥ जनाऊचुः ॥
पुण्यात्पापंक्षयंयातिपुराणेश्रूयतेमुने ॥ पुण्योपदेशंकथययेनपापक्षयोभवेत्
॥ ३२ ॥ यथाभवत्प्रसादेनपुत्रोऽस्यभवितातथा ॥ ॥ लोमशउवाच ॥ ॥ श्राव
णेशुक्लपक्षेतुपुत्रदानामविश्रुता ॥ ३३ ॥ एकादशीतिथिस्त्वास्तिकुरुध्वंतद्व्रतंज
नाः ॥ यथाविधियथान्याययथोक्तंजागरान्वितम् ॥ ३४ ॥ तस्याःपुण्यंसुवि
मलंददंतुनृपतेर्जनाः ॥ एवंकृतेसुनियतंराज्ञःपुत्रोभविष्यति ॥ श्रुत्वेतल्लोम

श्रा·कृ शावचस्तंप्रणम्यद्विजोत्तमं ॥३५॥ प्रजग्मुःस्वगृहान्सर्वेहर्षोत्फुल्लविलोच ए·कु
५३ नाः ॥ श्रावणंतुसमासाद्यश्रुत्वालोमशभाषितम् ॥३६॥ राज्ञासहव्रतंचक्रुः
सर्वेश्रद्धासमन्विताः ॥ द्वादशीदिवसेपुण्येददुर्नृपतयेजनाः ॥३७॥ दत्तेपु-
ण्येयथाराज्ञीगर्भमाधत्तशोभनम् ॥ प्राप्तेप्रसवकालेसासुषुवेपुत्रमूर्जित
म् ॥३८॥ एवमेषानृपश्रेष्ठपुत्रदानामविश्रुता ॥ कर्त्तव्यासुखमिच्छद्भिरिह
लोकेपरत्रच ॥३९॥ श्रुत्वामाहात्म्यमेतस्याःसर्वपापैःप्रमुच्यते॥ इहपुत्र-
सुखंप्राप्यपरत्रस्वर्गतिर्भवेत् ॥४०॥ ॥ इतिश्रीभविष्योत्तरपुराणेश्रा
वणशुक्लैकादशीपुत्रदामाहात्म्यंसमाप्तम् ॥ ॥ अथभाद्रपदकृष्णैकाद-
शीकथा ॥ ॥युधिष्ठिरउवाच॥ ॥ भाद्रस्यकृष्णपक्षेतुकिंनामैकादशी
भवेत् ॥ एतदिच्छाम्यहंश्रोतुंकथयस्वजनार्दन ॥१॥ श्रीकृष्णउवाच॥
शृणुष्वैकमनाराजन्कथयिष्यामिविस्तरात्॥ अजानाम्नीतिविख्यातास
र्वपापप्रणाशिनी ॥२॥ पूजयित्वाहृषीकेशंव्रतंतस्याःकरोतियः ॥ पापा ५३
नितस्यनश्यंतिव्रतस्यश्रवणादपि ॥३॥ नातःपरतराराजल्लोकद्वयहिता

सुखंनास्तिइहलोकेपरत्रच ॥ ४ ॥ यततोऽस्यसुखमासोकालोबहुतरोगतः ॥
नप्राप्तश्चसुतोराज्ञासर्वसौख्यप्रदोनृणाम् ॥ ५ ॥ दृष्ट्वाऽऽत्मानंप्रवयसंराजाचिं
तापरोऽभवत् ॥ सदोगतःप्रजामध्येइदंवचनमब्रवीत् ॥ ६ ॥ इहजन्मनिभोलो-
कानमयापातकंकृतम् ॥ अन्यायोपार्जितंवित्तंक्षिप्तंकोशेमयानहि ॥ ७ ॥ ब्रह्म
स्वंदेवद्रविणंनगृहीतंमयाक्वचित् ॥ न्यासापहारोनकृतःपरस्यबहुपापदः ॥ ८
॥ सुतवत्पालितालोकाधर्मेणविजितामही ॥ दुष्टेषुपातितोदंडोबंधुपुत्रोपमेष्व
पि ॥ शिष्टाःसुपूजितालोकाद्वेष्याश्चापिमहाजनाः ॥ ९ ॥ इत्येवंव्रजतोमार्गेध
र्मयुक्तोद्विजोत्तमाः ॥ कस्मान्ममगृहेपुत्रोनजातस्तद्विचार्यताम् ॥ १० ॥ इतिवा
क्यंद्विजाःश्रुत्वासप्रजाःसपुरोहिताः ॥ मंत्रयित्वानृपहितंजग्मुस्तेगहनंवनम्
॥ ११ ॥ इतस्ततश्चपश्यंतआश्रमानृषिसेवितान् ॥ नृपतेर्हितमिच्छंतोददृशुर्मु
निसत्तमम् ॥ १२ ॥ तप्यमानंतपोघोरंचिदानंदंनिरामयम् ॥ निराहारंजितात्मानं
जितक्रोधंसनातनम् ॥ १३ ॥ लोमशंधर्मतत्त्वज्ञंसर्वशास्त्रविशारदम् ॥ दीर्घायु
षंमहात्मानमनेकब्रह्मसंमितम् ॥ १४ ॥ कल्पेगतेयस्यएकमेकंलोमविशीर्यते

रुव्रतंराजन्पापनाशोभविष्यति॥ तवभाग्यवशाद्देषासममेन्हिसमागता॥१५॥
उपवासपरोभूत्वारात्रौजागरणंकुरु ॥ एवंतस्याव्रतेचीर्णेसर्वपापक्षयोभवेत् ॥
१६॥ तवपुण्यप्रभावेनचागतोऽहंनृपोत्तम ॥ इत्येवंकथयित्वातुमुनिरंतरधीयत
॥१७॥ मुनिवाक्यंनृपःश्रुत्वाचकारव्रतमुत्तमम् ॥ कृतेतस्मिन्व्रतेराज्ञःपापस्यां
तोभवत्क्षणात् ॥१८॥ श्रूयतांराजशार्दूलप्रभावोऽस्यव्रतस्यच ॥ यद्दुःखंबलि
भिर्वर्षैर्भोक्तव्यंतत्क्षयोभवत् ॥१९॥ निस्तीर्णदुःखोराजासीद्व्रतस्यास्यप्र
भावतः ॥ पत्न्यासहसमायोगंपुत्रजीवनमापसः ॥२०॥ देवदुंदुभयोनेदुःपुष्प
वर्षमभूद्दिवः ॥ एकादश्याःप्रभावेणप्राप्तंराज्यमकंटकम् ॥२१॥ स्वर्गंलेभेहरि
श्चंद्रःसपुरःसपरिच्छदः॥ ईदृग्विधव्रतंराजन्येकुर्वंतिद्विजोत्तमाः ॥२२॥ सर्व
पापविनिर्मुक्तास्त्रिदिवंयांतितेध्रुवम् ॥ पठनाच्छ्रवणाद्राजन्नश्वमेधफलंलभे
त्॥२३॥ ॥ इतिश्रीब्रह्मवैवर्तपुराणेभाद्रपदकृष्णाअजानामैकादशीमाहात्म्यं
समाप्तम् ॥ ॥ अथभाद्रपदशुक्लैकादशीकथा॥ ॥ युधिष्ठिरउवाच॥ ॥
नभस्यसितपक्षेतुकिंनामैकादशीभवेत् ॥ कोदेवःकोविधिस्तस्याःकिंपुण्यंच

वदस्वनः ॥१॥ श्रीकृष्णउवाच ॥ ॥ कथयामिमहापुण्यांस्वर्गमोक्षप्रदायि
नीम् ॥ वामनैकादशींराजन्सर्वपापहरांपराम् ॥२॥ इमामेवजयंत्याख्यांप्रा
हुरेकादशींनृप ॥ तस्याः श्रवणमात्रेणसर्वपापक्षयोभवेत् ॥३॥ वाजपेयफ
लंप्रोक्तंनातःपरतरंनृणाम् ॥ पापिनांपापशमनंजयंतीव्रतमुत्तमम् ॥ ४ ॥
नातःपरतराराजन्नरवैमोक्षप्रदायिनी ॥ एतस्मात्कारणाद्राजन्कर्तव्यागति
मिच्छता ॥५॥ वैष्णवैर्मममभक्तैस्तुमनुजैर्मत्परायणैः ॥ नभस्येवामनोयै-
स्तुपूजितस्तैर्जगत्त्रयं ॥६॥ पूजितंनात्रसंदेहस्तेयांतिहरिसान्निधिम् ॥ वा
मनःपूजितोयेनकमलैःकमलेक्षणः ॥७॥ नभस्यसितपक्षेतुजयंत्येकादशी
दिनम् ॥ तेनार्चितंजगत्सर्वंत्रयोदेवाःसनातनाः ८ एतस्मात्कारणाद्राजन्क
र्तव्योहरिवासरः ॥ अस्मिन्कृतेनकर्तव्यंकिंचिदस्तिजगत्त्रये ॥९॥ अस्यांप्र
सुप्तोभगवानेत्यंगपरिवर्त्तनम् ॥ तस्मादेनांजनाःसर्वेवदंतिपरिवर्त्तिनीम् ॥
॥१०॥ ॥युधिष्ठिरउवाच ॥ ॥ संशयोऽस्तिमहान्मह्यंश्रूयतांचजनार्दन ॥
कथंसुप्तोसिदेवेशाकथंयास्यंगवर्तनम् ॥ ११ ॥ किमर्थंदेवदेवेशबलिर्बद्धस्त्व

 याऽसुरः ॥ संतुष्टाःपृथ्वीदेवाःकिमकुर्वन्जनार्दनं ॥ १२ ॥ कोविधिःकिंव्रतंचैव 
चातुर्मास्यमुपासताम् ॥ त्वयिसुप्तेजगन्नाथकिंकुर्वंतिजनाःप्रभो ॥ १३ ॥ ए
तद्विस्तरतोब्रूहिसंशयंहरमेप्रभो ॥ ॥ श्रीकृष्णउवाच ॥ ॥ श्रूयतांराज-
शार्दूलकथांपापहरांपराम् ॥ १४ ॥ बलिर्वैदानवःपूर्वमासीत्त्रेतायुगेनृप ॥ अ
पूजयच्चमांनित्यंमद्भक्तोमत्परायणः ॥ १५ ॥ जपैस्तुविविधैःसूक्तैर्यजतेमांस
नित्यशः ॥ द्विजानांपूजकोनित्यंयज्ञकर्मकृताशयः ॥ १६ ॥ कथंचिदकृतद्वेषी
देवलोकमजीजयत् ॥ महत्तमिहलोकेवैजितंतेनमहात्मना ॥ १७ ॥ विलोक्य
चततःसर्वेदेवाःसंहत्यमंत्रयन् ॥ सर्वैर्मिलित्वागंतव्यंदेवंविज्ञापितुंप्रभुम् ॥
॥ १८ ॥ ततश्चदेवऋषिभिःसाकमिंद्रोगतःप्रभुम् ॥ शिरसात्ववनींगत्वास्तु
तइंद्रेणसूक्तिभिः ॥ १९ ॥ गुरुणादेवतैःसार्द्धंबहुधापूजितोह्यहम् ॥ ततोवा
मनरूपेणह्यवतीर्णश्चपंचमे ॥ २० ॥ अत्युग्ररूपेणतदासर्वब्रम्हांडरूपिणा
॥ बालकेनजितःसोवैसत्यमालंब्यतस्थिवान् ॥ २१ ॥ ॥ युधिष्ठिरउवाच ॥ 
त्वयावामनरूपेणसोऽसुरश्चजितःकथम् ॥ एतत्कथयदेवेशमद्यंभक्तायवि

वहा ॥ सत्यमुक्तं मयाह्येतन्नासत्यं भाषितं मम ॥ ४ ॥ हरिश्चंद्र इति ख्या
तो बभूव नृपतिः पुरा ॥ चक्रवर्ती सत्यसंधः समस्तायाभुवः पतिः ५ तस्यापि
कर्मणो योगाद्राज्यभ्रष्टो बभूव सः ॥ विक्रीत्वा वनितां पुत्रान्स चकारात्मवि
क्रयम् ॥ ६ ॥ पुल्कसस्य च दासत्वं गतो राजा सपुण्यकृत् ॥ सत्यमालंब्य राजें
द्र मृतचेलोपहारकः ॥ ७ ॥ सोभवन्नृपतिश्रेष्ठो न सत्याच्चलितस्तथा ॥ एवं गन
स्य नृपतेर्बहवो वत्सरा गताः ॥ ८ ॥ ततश्चिंतापरो राजा बभूवात्यंतदुःखि
तः ॥ किं करोमि क्व गच्छामि निष्कृतिर्मे कथं भवेत् ॥ ९ ॥ इति चिंतयतस्तस्य
मग्नस्य वृजिनार्णवे ॥ आजगाम मुनिः कश्चिज्ज्ञात्वा राजानमातुरम् ॥ १०
॥ परोपकरणार्थाय निर्मितो ब्रह्मणा द्विजः ॥ स तं दृष्ट्वा द्विजवरं ननाम नृपसत्त
मः ॥ ११ ॥ कृतांजलिपुटो भूत्वा गौतमस्याग्रतः स्थितः ॥ कथयामास वृत्तांत
मात्मनो दुःखसंयुतम् ॥ १२ ॥ श्रुत्वा नृपतिवाक्यानि गौतमो विस्मयान्वितः
॥ उपदेशं नृपतये व्रतस्यास्य मुनिर्ददौ ॥ १३ ॥ मासि भाद्रपदे राजन्कृष्णपक्षे
तु शोभना ॥ एकादशी समायाता अजानाम्न्यतिपुण्यदा ॥ १४ ॥ तस्याः कु

ममैकातत्रमूर्तिश्चबलिमाश्रित्यतिष्ठति ॥ द्वितीयाशेषपृष्ठेवैक्षीराब्धौसागरोत्त 
मे ॥३४॥ सुप्यतेचहृषीकेशोयावच्चायातिकार्त्तिकी ॥ तावद्भवतितत्पुण्यंस
र्वपुण्योत्तमोत्तमं ॥३५॥ एतस्मात्कारणाद्राजन्कर्तव्याचप्रयत्नतः ॥ एकादशी
महापुण्यापवित्रापापहारिणी ॥३६॥ अस्यांप्रसुप्तोभगवानेत्यंगपरिवर्तनम्
॥एतस्यांपूजयेद्देवंत्रैलोक्यस्यपितामहम् ॥३७॥ दधिदानंप्रकर्तव्यंरौप्यतं
डुलसंयुतम् ॥ रात्रौजागरणंकृत्वामुक्तोभवतिमानवः ॥३८॥ एवंयःकुरुतेराज
न्नेकादश्याव्रतंशुभम् ॥ सर्वपापहरंचैवभुक्तिमुक्तिप्रदायकम् ॥३९॥ सदेव
लोकंसंप्राप्यभ्राजतेचंद्रमायथा ॥ शृणुयाच्चैवयोमर्त्यः कथांपापहरांपराम् ॥
अश्वमेधसहस्रस्यफलंप्राप्नोतिमानवः ॥४०॥ ॥ इतिश्रीस्कंदपुराणेभा
द्रपदशुक्लपरिवर्तिनीनामैकादशीमाहात्म्यंसमाप्तम् ॥ ॥अथाश्विनकृष्णै
कादशीकथा ॥ ॥युधिष्ठिरउवाच॥ ॥कथयस्वप्रसादेनममाग्रेमधुसूदन
॥आश्विनेकृष्णपक्षेतुकिन्नामैकादशीभवेत् ॥१॥ ॥श्रीकृष्णउवाच॥ ॥ 
आश्विनस्यासितेपक्षेइंदिरानामनामतः ॥ तस्याव्रतप्रभावेनमहापापंप्रणश्य-

ति ॥२॥ अधोयोनिगतानांचपितॄणांगतिदायिनीं ॥ शृणुष्वावहितोराजन्कथां
पापहरांपराम् ॥३॥ यस्याःश्रवणमात्रेणवाजपेयफलंलभेत् ॥ पुराकृतयुगेरा
जावभूवरिपुसूदनः ॥४॥ इंद्रसेनइतिख्यातःपुरींमाहिष्मतींप्रति ॥ सराज्यंपा
लयामासधर्मेणयशसाऽन्वितः ॥५॥ पुत्रपौत्रसमायुक्तोधनधान्यसमन्वितः ॥
माहिष्मत्यधिपोराजाविष्णुभक्तिपरायणः ॥६॥ जपन्गोविन्दनामानिमुक्तिदा
निनराधिपः ॥ कालंनयतिविधिवदध्यात्मस्यविचिंतकः ॥७॥ एकस्मिन्दिवसे
राज्ञिसुखासीनेसदोगते ॥ अवतीर्यागमद्धीमान्बंबरान्नारदोमुनिः ॥८॥ तमा
गतमभिप्रेक्ष्यप्रत्युत्थायकृतांजलिः ॥ पूजयित्वार्घविधिनाचासनेसन्न्यवेशय
त् ॥९॥ सुखोपविष्टःसमुनिःप्रत्युवाचनृपोत्तमम् ॥ कुशलंनवराजेंद्रससस्व
ंगेषुवर्तते ॥१०॥ धर्मेमतिर्वर्ततेतेविष्णुभक्तिरतस्तथा ॥ इतिवाक्यंतुदेवर्षेःश्रु
त्वाराजातमब्रवीत् ॥११॥ ॥राजोवाच॥ ॥त्वत्प्रसादान्मुनिश्रेष्ठसर्वत्रकु
शलंमम ॥ अद्यक्रतुक्रियाःसर्वाःसफलास्तवदर्शनात् ॥१२॥ प्रसादंकुरुविप्र
र्षेब्रूह्यागमनकारणम् ॥ इतिराज्ञोवचःश्रुत्वादेवर्षिर्वाक्यमब्रवीत् ॥१३॥ ॥

नारदउवाच ॥ ॥श्रूयतांराजशार्दूलमद्वचोविस्मयप्रदम् ॥ब्रह्मलोकादहंप्रा-
प्तोयमलोकंद्विजोत्तम ॥१४॥ सूर्यजेनार्चितोभक्त्याउपविष्टोवरासने ॥ धर्मशी
लःसत्यवांस्तुभास्करिंसमुपासते ॥१५॥ बहुपुण्यप्रकर्ताचव्रतवैकल्यदोषतः
॥सभायांश्राद्धदेवस्यमयादृष्टःपितातव ॥१६ ॥ कथितस्तेनसंदेशस्तंनिबोधज
नेश्वर ॥ इंद्रसेनइतिख्यातोराजामाहिष्मतीप्रभुः ॥१७॥ तस्याग्रेकथयब्रह्मन्
स्थितंमायमसन्निधौ ॥ केनापिचांतरायेणपूर्वजन्मोद्भवेनवै ॥१८॥ स्वर्गंप्रेषय
मांपुत्रइंदिराव्रतदानतः ॥इत्युक्तोऽहंसमायातःसमीपंतवपार्थिव ॥१९ ॥पितुः
स्वर्गतयेराजन्निंदिराव्रतमाचर ॥ तेनव्रतप्रभावेनस्वर्गंयास्यतितेपिता ॥२० ॥रा
जोवाच॥ ॥ कथयस्वप्रसादेनभगवन्निंदिराव्रतम् ॥विधिनाकेनकर्तव्यंकस्मि
न्पक्षेतिथौतथा ॥२१॥ नारदउवाच॥ ॥ शृणुराजन्हितंवच्मिव्रतस्यास्यवि
धिंशुभं॥ आश्विनस्यासितेपक्षेदशमीदिवसेशुभे ॥ २२ ॥ प्रातःस्नानंप्रकुर्वीत
श्रद्धायुक्तेनचेतसा ॥ततोमध्यान्हसमयेस्नानंकृत्वाबहिर्जले ॥२३॥ पितृ-
णांप्रीतयेश्राद्धंकुर्याच्छ्रद्धासमन्वितः ॥एकभक्तंततःकृत्वारात्रौभूमौशयी

स्तरात् ॥ २२ ॥ ॥ श्रीकृष्णउवाच ॥ ॥ मयाबालेनसबलिः प्रार्थितोबटुरू-
पिणा ॥ पदत्रयमितांभूमिंदेहिमेभुवनत्रयम् ॥ २३ ॥ दत्तंभवनितेराजन्नात्रका
र्याविचारणा ॥ इत्युक्तश्चमयाराजादत्तवांस्त्रिपदांभुवम् ॥ २४ ॥ संकल्पमात्रा
द्वृधेदेहस्त्वेविक्रमः परम् ॥ भूर्लोकेतुकृतौपादौभुवर्लोकेतुजानुनी ॥ २५ ॥ स्व
र्लोकेतुकटिंन्यस्यमहर्लोकेनथोदरम् ॥ जनलोकेतुहृदयंतपोलोकेचकंठकम्
॥ २६ ॥ सत्यलोकेमुखंस्थाप्यउत्तमांगंतथोर्ध्वतः ॥ चंद्रसूर्यग्रहाश्चैवभगणो-
योगसंयुतः ॥ २७ ॥ सेंद्राश्चैवनदादेवानागाः शेषादयः परे ॥ स्तुवंतोवेदसंभू-
तैः सूक्तैश्चविविधैस्तुमाम् ॥ २८ ॥ करेगृहीत्वातुबलिमब्रुवंवचनंतदा ॥ एकेन
पूरितापृथ्वीद्वितीयेनत्रिविष्टपम् ॥ २९ ॥ तृतीयस्यतुपादस्यस्थानंदेहिममान
घ ॥ एवमुक्तेमयासोपिमस्तकंदत्तवान्बलिः ॥ ३० ॥ ततोवैमस्तकेस्येकंपदंद
त्तमयातदा ॥ क्षिप्तोरसातलेराजन्दानवोममपूजकः ॥ ३१ ॥ विनयावनतंदृ
ष्ट्वाप्रसन्नोऽस्मिजनार्दनः ॥ बलेवसामिसततंसन्निधौतवमानद ॥ ३२ ॥ इत्य
वोचंमहाभागंबलिंवैरोचनं तदा ॥ नभस्यशुक्लपक्षेतुपरिवर्त्तिनिवासरे ॥ ३३ ॥

॥इंदिराव्रतमाहात्म्यंतवाग्रेकथितंमया॥३६॥ पठनाच्छ्रवणाच्चास्यसर्वपापैः प्रमु
च्यते॥ भुक्त्वेहनिखिलान्भोगान्विष्णुलोकेवसेच्चिरम्॥३७॥ ॥इतिश्रीब्रह्मवैव
र्तपुराणेआश्विनकृष्णैकादशीइंदिरामाहात्म्यंसमाप्तम्॥ ॥अथआश्विनशुक्लै-
कादशीकथा॥ ॥युधिष्ठिरउवाच॥ ॥ कथयस्वप्रसादेनभगवन्मधुसूदन॥इ-
षस्यशुक्लपक्षेतुकिंनामैकादशीभवेत्॥१॥ ॥श्रीकृष्णउवाच॥ ॥शृणुराजेंद्र
वक्ष्यामिमाहात्म्यंपापनाशनम्॥शुक्लपक्षेचाश्वयुजीभवेदेकादशीतुया॥२॥
पाशांकुशेतिविख्यातासर्वपापहरापरा॥ पद्मनाभाऽभिधानंतुपूजयेत्तत्रमान
वः॥३॥ सर्वाभीष्टफलप्राप्त्यैस्वर्गमोक्षप्रदंनृणां॥ तपस्तप्त्वानरस्तीव्रंचिरंसुनिय
तेंद्रियः॥४॥ यत्फलंसमवाप्नोतितन्नत्वागरुडध्वजम्॥ कृत्वापिबहुशःपापंनरो
मोहसमन्वितः॥५॥ नयातिनरकंघोरंनत्वापापहरंहरिं॥ पृथिव्यांयानितीर्थानि
पुण्यान्यायतनानिच॥६॥ तानिसर्वाण्यवाप्नोतिविष्णोर्नामानुकीर्तनात्॥देवं
शार्ङ्गधरंविष्णुंयेप्रपन्नाजनार्दनं॥७॥ नतेषांयमलोकश्चनृणांवैजायतेक्वचित् ५८
उपोष्यैकादशीमेकांप्रसंगेनापिमानवाः॥८॥ नयांतियातनांयाम्यांपापंकृत्वातु

दारुणं ॥ वैष्णवः पुरुषोभूत्वाशिवनिंदांकरोतियः ॥९॥ योनिंदेद्वैष्णवंलोकंस-
यातिनरकंध्रुवं ॥ अश्वमेधसहस्राणिराजसूयशतानिच ॥१०॥ एकादश्युपवा
सस्यकलांनार्हन्तिषोडशीं ॥ एकादशीसमंपुण्यंकिंचिल्लोकेनविद्यते ॥११॥ नेह
शंपावनंकिंचित्त्रिषुलोकेषुविद्यते ॥ यादृशंपद्मनाभस्यदिनंपातकहानिदम् ॥१२
॥ यावन्नोपोष्यतेजंतुःपद्मनाभदिनंशुभं ॥ व्याजेनापिकृताराजन्नदर्शयतिभा
स्करिं ॥१३॥ स्वर्गमोक्षप्रदाह्येषाशरीरारोग्यदायिनी ॥ सुकलत्रप्रदाह्येषाधन-
धान्यप्रदायिनी ॥१४॥ नगंगानगयाराजन्नकाशीनचपुष्करं ॥ नचापिकौरवंक्षे
त्रंपुण्यंभूपहरेर्दिनात् ॥१५॥ रात्रौजागरणंकृत्वासमुपोष्यहरेर्दिनं ॥ अनायासेन-
भूपालप्राप्यतेवैष्णवंपदं ॥१६॥ दशवैमातृकेपक्षेदशराजेंद्रपैतृके ॥ प्रियायाद
शपक्षेतुपुरुषानुद्धरेन्नरः ॥१७॥ चतुर्भुजादिव्यरूपानागारिकृतकेतनाः ॥ स्र-
ग्विणःपीतवस्त्राश्चप्रयांतिहरिमंदिरं ॥१८॥ बालत्वेयौवनत्वेचवृद्धत्वेपिनृपोत्त
म ॥ उपोष्यद्वादशींनूनंनैतिपापोपिदुर्गतिं ॥१९॥ पाशांकुशामुपोष्यैव आश्विने
चासितेनरे ॥ सर्वपापविनिर्मुक्तोहरिलोकंसगच्छति ॥२०॥ दत्वाहेमतिलान्भूमिं

 

गामन्नमुदकंनथा ॥ उपानहस्त्रछत्रादिनपश्यतियमंनरः ॥२१॥ यस्यपुण्यविही
नानिदिनान्यपगतानिच ॥ सलोहकारभस्त्रेवश्वसन्नपिनजीवति ॥२२॥ अवं-
ध्यंदिवसंकुर्याद्दरिद्रोपिनृपोत्तम ॥ समाचरन्यथाशक्तिस्नानदानादिकाःक्रियाः
॥२३॥ तडागारामसौधानांसत्राणांपुण्यकर्मणाम् ॥ कर्तारोनैवपश्यंतिधीरास्तांय
मयातनां ॥२४॥ दीर्घायुषाधनाढ्याश्चकुलीनारोगवर्जिताः ॥ दृश्यंतेमानवालोके
पुण्यकर्तारईदृशाः ॥२५॥ किमत्रबहुनोक्तेनयांत्यधर्मेणदुर्गतिं ॥ आरोहंतिदिवं
धर्मैर्नात्रकार्याविचारणा ॥२६॥ इतितेकथितंराजन्यत्पृष्टोऽहंत्वयाऽनघ ॥२७
॥ इतिश्रीब्रम्हवैवर्तपुराणेआश्विनशुक्लैकादशीपाशांकुशामाहात्म्यंसमाप्तम् ॥
अथकार्तिककृष्णैकादशीकथा ॥ ॥ युधिष्ठिरउवाच ॥ ॥ कथयस्वप्रसादे
नममस्नेहाज्जनार्दन ॥ कार्तिकस्यासितेपक्षेकिंनामैकादशीभवेत् ॥१॥ ॥
श्रीकृष्णउवाच ॥ ॥ श्रूयतांराजशार्दूलकथयामितवाग्रतः ॥ कार्तिकेकृष्णपक्षे
तुरमानाम्नीसुशोभना ॥२॥ एकादशीसमाख्यातामहापापहरापरा ॥ अस्याः
प्रसंगतोराजन्माहात्म्यंप्रवदामिते ॥३॥ मुचुकुंदइतिख्यातोबभूवनृपतिःपुरा॥ 

तच ॥ २४ ॥ प्रभातेविमलेजातेप्राप्तेचैकादशीदिने ॥ मुखप्रक्षालनंकुर्याद्दंतधा
वनपूर्वकम् ॥ २५ ॥ उपवासस्यनियमंगृण्हीयाद्भक्तिभावतः ॥ अद्यस्थित्वानिरा
हारःसर्वभोगविवर्जितः ॥२६॥ श्वोभोक्ष्येपुंडरीकाक्षशरणंमेभवाच्युत ॥ इत्येवं
नियमंकृत्वामध्यान्हसमयेतथा ॥२७॥ शालग्रामशिलाग्रेतुश्राद्धंकृत्वायथा-
विधि ॥ भोजयित्वाद्विजान्शुद्धान्दक्षिणाभिःसुपूजितान् ॥ २८ ॥ पितृशेषंस-
माघ्रायगवेदद्याद्विचक्षणः ॥ पूजयित्वाहृषीकेशंधूपगंधादिभिस्तथा ॥ २९ ॥ रा
त्रौजागरणंकुर्यात्केशवस्यसमीपतः ॥ ततःप्रभातसमयेसंप्राप्तेद्वादशीदिने ॥
३० ॥ अर्चयित्वाहरिंभक्त्याभोजयित्वाद्विजानथ ॥ बंधुदौहित्रपुत्राद्यैःस्वयंभुंजी
तवाग्यतः ॥ ३१ ॥ अनेनविधिनाराजन्कुरुव्रतमतंद्रितः ॥ विष्णुलोकंप्रयास्यंति
पितरस्तवभूपते ॥३२॥ इत्युक्त्वानृपतिंराजन्मुनिरंतरधीयत ॥ यथोक्तविधिना
राजाचकारव्रतमुत्तमम् ॥ ३३ ॥ अंतःपुरेणसहितःपुत्रभृत्यसमन्वितः ॥ कृतेव्रते
तुकौंतेयपुष्पवृष्टिरभूद्दिवः ॥३४॥ ततसितागरुडारूढोजगामहरिमंदिरम् ॥ इंद्रसे
नोपिराजर्षिःकृत्वाराज्यमकंटकं ॥ ३५ ॥ राज्येनिवेश्यतनयंजगामत्रिदिवंस्वयं

का·कृ सत्यमेतत्त्वयैवोक्तंकरिष्येऽहमुपोषणम् ॥ दैवेनविहितंयद्वैतत्तथैवभविष्यति ॥ ए·क
६० १६॥ इतिनिश्चित्यमतिंकृत्वाचकारव्रतमुत्तमं ॥ क्षुत्तृषापीडिततनुःसबभूवातिदुःखि
तः ॥१७॥ इतिचिंतयतस्तस्यह्यादित्योस्तमगाद्गिरिं ॥ वैष्णवानांनराणांसानि-
शाहर्षविवर्द्धिनी ॥१८॥ हरिपूजारतानांचजागरासक्तचेतसां ॥ बभूवनृपशार्दू
लशोभनस्यातिदुःसहा ॥१९॥ रवेरुदयवेलायांशोभनःपंचतांगतः ॥ दाहयामा
सराजातंराजयोग्यैश्चदारुभिः ॥२०॥ चंद्रभागानात्मदेहंददाहपितृवारिना ॥ कृ
त्वौर्ध्वदेहिकंतस्यतस्थौजनकवेश्मनि ॥२१॥ शोभनेननृपश्रेष्ठरमाव्रतप्रभावतः
॥ प्राप्तंदेवपुरंरम्यंमंदराचलसानुनि ॥२२॥ अनुत्तममनाधृष्यमसंख्येयगुणा
न्वितं ॥ हेमस्तंभमयैःसौधैरत्नवैडूर्यमंडितैः ॥२३॥ स्फटिकैर्विविधाकारैर्विचित्रै
रुपशोभितम् ॥ सिंहासनसमारूढःसुश्वेतछत्रचामरः ॥२४॥ किरीटकुंडलयु
तोहारकेयूरभूषितः ॥ स्तूयमानैश्चगंधर्वैरप्सरोगणसेवितः ॥२५॥ शोभनः
शोभतेतत्रदेवराडपरोयथा ॥ सोमशर्मेतिविख्यातोमुचकुंदपुरेवसन् ॥ तीर्थया ६०
त्राप्रसंगेनभ्रमन्विप्रोददर्शतम् ॥२६॥ नृपजामातरंज्ञात्वातत्समीपंजगामसः ॥

आसनादुत्थितः शीघ्रं नमश्चक्रे द्विजोत्तमम् ॥ २७॥ चकार कुशलप्रश्नं श्वशुरस्य नृपस्य च ॥ कांतायाश्चंद्रभागायास्तथैव नगरस्य च ॥ २८॥ ॥ सोमशर्मोवाच ॥ कुशलं वर्तते राजन् श्वशुरस्य गृहे तव ॥ चंद्रभागा कुशलिनी सर्वतः कुशलं पुरे ॥ २९॥ स्ववृत्तं कथ्यतां राजन् आश्चर्यं परमं मम ॥ पुरं विचित्रं रुचिरं न दृष्टं केन चित्क्वचित् ॥ ३०॥ एतदाचक्ष्व नृपते कुतः प्राप्तमिदं त्वया ॥ ॥ शोभन उवाच ॥ ॥ कार्तिकस्यासिते पक्षे नाम्ना चैकादशी रमा ॥ ३१॥ तामुपोष्य मया प्राप्तं द्विजेंद्र पुरमध्रुवम् ॥ ध्रुवं भवति येनैव तत्कुरुष्व द्विजोत्तम ॥ ३२॥ ॥ द्विजेंद्र उवाच ॥ ॥ कथमध्रुवमेतद्धि कथं हि भवति ध्रुवम् ॥ तत्त्वं कथय राजेंद्र तत्करिष्यामि नान्यथा ॥ ३३ ॥ शोभन उवाच ॥ मयैतद्धि हितं विप्र श्रद्धाहीनं व्रतोत्तमम् ॥ तेनाहमध्रुवं मन्ये ध्रुवं भवति तच्छृणु ॥ ३४ ॥ मुचुकुंदस्य दुहिता चंद्रभागा सुशोभना ॥ तस्यै कथय वृत्तांतं ध्रुवमेतद्भविष्यति ॥ ३५॥ तच्छ्रुत्वाथ द्विजवरस्तस्यै सर्वं न्यवेदयत् ॥ श्रुत्वाऽथ सा द्विजवचो विस्मयोत्फुल्ललोचना ॥ ३६॥ प्रत्यक्षमथवा स्वप्नमस्त्वयैतत्कथ्यते द्विज ॥ ॥ सोमशर्मोवाच ॥ ॥ प्रत्यक्षं पुत्रि ते

कांतोमयादृष्टोमहावने ॥३॥ देवतुल्यमनाधृष्यंदृष्टंतस्यपुरंमया ॥ अंध्र 
वंतेनतत्प्रोक्तंध्रुवंभवतितत्कुरु ॥३८॥ ॥चन्द्रभागोवाच॥ ॥ तत्रमांन
यविप्रर्षेपतिदर्शनलालसाम् ॥ आत्मनोव्रतपुण्येनकरिष्यामिपुरंध्रुवम् ॥
॥३९॥ आवयोर्द्विजसंयोगोयथाभवतितत्कुरु ॥ प्राप्यतेहिमहत्पुण्यंकृत्वा
योगंविमुक्तये ॥४०॥ इतिश्रुत्वासहतयासोमशर्माजगामह ॥ आश्रमंवाम
देवस्यमंदराचलसन्निधौ ॥४१॥ वामदेवोऽश्रृणोत्सर्ववृत्तांतंकथितंतयोः
॥अभ्यषिंचच्चंद्रभागांवेदमंत्रैरथोज्ज्वलाम् ॥४२॥ ऋषिमंत्रप्रभावेनविष्णु
वासरसेवनात् ॥ दिव्यदेहाबभूवासौदिव्यांगतिमवापह ॥४३॥ पत्युःसमी
पमगमत्प्रहर्षोत्फुल्ललोचना ॥ सहर्षःशोभनोऽतीवदृष्ट्वाकांतांसमागताम्
॥४४॥ समाहूयस्वकेवामेपार्श्वेतांसन्न्यवेशयत् ॥ साप्युवाचप्रियंहर्षाच्चंद्र
भागाशुभंवचः ॥४५॥ श्रृणुकांतहितंवाक्यंयत्पुण्यंविद्यतेमयि ॥ अष्टवर्षाधि
काजातायदाहंपितृवेश्मनि ॥४६॥ मयाततःप्रभृतिचकृतमेकादशीव्रतम् ॥ 
यथोक्तविधिसंयुक्तंश्रद्धायुक्तेनचेतसा ॥४७॥ तेनपुण्यप्रभावेनभविष्य-

देवेंद्रेणसमंयस्यमित्रत्वमभवन्नृप ॥४॥ यमेनवरुणेनैवकुबेरेणसमंतथा॥ बि-
भीषणेनएतस्यसखित्वमभवत्सह ॥५॥ विष्णुभक्तः सत्यसंधोबभूवनृपतिः स
दा ॥ तस्यैवंशासतोराजन्राज्यंनिहतकंटकं ॥६॥ बभूवदुहितागेहेचन्द्रभागास
रिद्वरा॥ शोभनायचसादत्ताचंद्रसेनसुतायवै ॥७॥ सकदाचित्समायातः श्वशुर
स्यगृहेनृप ॥ एकादशीव्रतमिदंसमायातंसुपुण्यदं ८ समागतेव्रतदिनेचंद्रभागा
त्वचिंतयत् ॥ किंभविष्यतिदेवेशममभर्तापिदुर्बलः ॥९॥ क्षुधानसहतेसोदुपि
ताचैवोग्रशासनः ॥ पटहस्ताड्यतेयस्यसंप्राप्तेदशमीदिने ॥ १०॥ नभोक्तव्यंनभो
क्तव्यंनभोक्तव्यंहरेर्दिने ॥ श्रुत्वापटहनिर्घोषंशोभनस्त्वब्रवीत्प्रियाम् ॥११॥
किंकर्तव्यंमयाकांतेदेहिशिक्षांसुशोभने ॥ कृतेनयेनमेसम्यक्जीवितंनविनश्य
ति॥१२॥ ॥चंद्रभागोवाच॥ ॥ मत्पितुर्वेश्मनिविभोभोक्तव्यंनापिकेनचित्
॥गजैरश्वैस्तथाचोष्ट्रैरन्यैः पशुभिरेवच॥१३॥ तृणमन्नंतथावारिनभोक्तव्यंहरे
र्दिने ॥ मानवैश्चकुतः कांतभुज्यतेहरिवासरे॥१४॥ यदित्वंभोक्ष्यसेकांततोगेहा
न्नयास्यतां ॥ एवंविचार्यमनसासुदृढंमानसंकुरु॥१५॥ ॥शोभनउवाच॥ ॥

॥ यावन्नायातिपापघ्नीकार्तिकेहरिबोधिनी ॥ २ ॥ तावद्गर्जन्तितीर्थानि ह्यास
मुद्रंसरांसिच ॥ यावत्प्रबोधिनीविष्णोस्तिथिर्नायातिकार्तिकी ॥ ३ ॥ अश्वमे
धसहस्राणिराजसूयशतानिच ॥ एकेनैवोपवासेनप्रबोधिन्यांलभेन्नरः ॥ ४ ॥
॥ नारदउवाच ॥ ॥ एकभुक्तेनकिंपुण्यंकिंपुण्यंनक्तभोजने ॥ उपवासेनकिंपु
ण्यंतन्मेब्रूहिपितामह ॥ ५ ॥ ॥ब्रह्मोवाच॥ ॥ एकभुक्तेनजन्मोत्थंनक्तेन
द्विजन्तुभेवम् ॥ सप्तजन्मभवंपापमुपवासेननश्यति ॥ ६ ॥ यद्दुर्लभंयदप्राप्यं
त्रैलोक्येनतुगोचरम् ॥ यदप्यप्रार्थितंपुत्रददातिहरिबोधिनी ॥ ७ ॥ मेरुमंदर
मात्राणिपापान्युग्राणियानितु ॥ एकेनैवोपवासेनदहतेपापहारिणी ८ ॥
पूर्वजन्मसहस्रैस्तुयद्दुष्कर्मउपार्जितं ॥ जागरेणप्रबोधिन्यांदहतेतूलराशिव
त् ॥ ९ ॥ उपवासंप्रबोधिन्यांयःकरोतिस्वभावतः ॥ विधिवन्मुनिशार्दूलयथो
क्तंलभतेफलं ॥ १० ॥ यथोक्तंसुकृतंयस्तुविधिवत्कुरुतेनरः ॥ स्वल्पंमुनिवर
श्रेष्ठमेरुतुल्यंभवेत्फलम् ॥ ११ ॥ विधिहीनंतुयःकुर्यात्सुकृतंमेरुमात्रकं ॥
अणुमात्रंनचाप्नोतिफलंधर्मस्यनारद ॥ १२ ॥ संध्याहीनेव्रतभ्रष्टेनास्तिकेहे

तुकेशठे ॥ नैतेषांतिष्ठतेदेहे धर्मशास्त्रविदूषके ॥१३॥ परदाररतेमूर्खेकृतघ्ने
वंशकेतथा ॥ धर्मोनतिष्ठतेदेहेएतेषामपिदेहिनां ॥१४॥ ब्राह्मणोवापिशूद्रोवा
सेवतेपरयोषितं ॥ ब्राह्मणींचविशेषेणचांडालसदृशावुभौ ॥१५॥ सभर्तृकां
वाविधवांब्राह्मणोब्राह्मणींयदि ॥ सेवतेमुनिशार्दूलसान्वयोयातिसंक्षयं ॥१६
॥परदाराभिगमनंकुरुतेयोद्विजाधमः ॥ संततिर्नैभवेत्तस्यफलंजन्मार्जितंन
हि॥१७॥ गुरुणासहविप्रैश्चयोऽहंकारेणवर्तते ॥ सुकृतान्नश्यतेशीघ्रंधनंना
प्नोतिसंततिम् ॥१८॥ आचारभ्रष्टदेहानांवृषलीगामिनांसुत ॥ यस्तेनसेव्यमा
नोपिधर्मस्तेषांपराङ्मुखः ॥१९॥ पापिन स्तेनरालोकेसङ्गतिंपतितैःसह ॥
येकुर्वंतिनृपश्रेष्ठतेगच्छन्तियमालये ॥२०॥ धर्मोनिष्ठोनृणांयेषांस्वागतासन-
भोजनः ॥ तेषांवैनश्यतेवत्सकीर्तिरायुःप्रजाःसुखम् ॥२१॥ साधूनामपमानं
तुयेकुर्वन्तिनराधमाः ॥ त्रिवर्गफलहीनास्तेदह्यन्तेनरकाग्निना॥ २२॥ कृत्वाऽ
वमानंसाधूनांयेद्दृष्यंतिनराधमाः ॥ वारयंतिनयेमूढास्तेपश्यंतिकुलक्षयं २३
आचारभ्रष्टदेहस्यहेतुकस्यशठस्यच ॥ ददतोजुह्वतोवापिगतिस्तस्यनिगद्य-

ते ॥ २४ ॥ तस्मान्मत्वाचरेत्किंचिदशुभंलोकगर्हितं ॥ सदाचारवता भाव्यंय
थाधर्मोननश्यति ॥ २५ ॥ येध्यायंतिमनोवृत्त्याकरिष्यामःप्रबोधिनीम् ॥ ते
षांविलीयतेपापंपूर्वजन्मशतोद्भवम् ॥ २६ ॥ समतीतंभविष्यंचवर्तमानंकुला
युतम् ॥ विष्णुलोकंनयत्याशुप्रबोधिन्यांतुजागरे ॥ २७ ॥ वसंतिपितरोहृष्टा
विष्णुलोकेत्वलंकृताः ॥ विमुक्तानारकैर्दुःखैःपूर्वकर्मसमुद्भवैः ॥ २८ ॥ कृ
त्वातुपातकंघोरंब्रह्महत्यादिकंनरः ॥ कृत्वातुजागरंविष्णोर्धौतपापोभवेन्मु
ने ॥ २९ ॥ दुःप्राप्यंयत्फलंरम्यैरश्वमेधादिभिर्मखैः ॥ प्राप्यतेतत्सुखेनैवप्रबो
धिन्यांतुजागरे ॥ ३० ॥ आप्लुत्यसर्वतीर्थेषुदत्वागाःकांचनंमहीम् ॥ नतत्फलम
वाप्नोतियत्कृत्वाजागरंहरेः ॥ ३१ ॥ जातःसएवसुकृतीकुलंतेनैवपावितम् ॥
कार्तिकेमुनिशार्दूलकृतायेनप्रबोधिनी ॥ ३२ ॥ यथाध्रुवंनृणांमृत्युर्धननाशस्त
थाध्रुवं ॥ इतिज्ञात्वामुनिश्रेष्ठकर्तव्यंवैष्णवंदिनं ॥ ३३ ॥ यानिकानिचतीर्थानि
त्रैलोक्येसंभवंतिच ॥ तानितस्यगृहेसम्यक्यःकरोतिप्रबोधिनीम् ॥ ३४ ॥ स-
र्वंकृत्यंपरित्यज्यतुष्ट्यर्थंचक्रपाणिनः ॥ उपोष्यैकादशींरम्यांकार्तिकेहरिबोधिनीं

तिपुरंध्रुवम् ।। सर्वकामसमृद्धंचयावदाभूतसंप्लवं ।।४८।। एवंसानृपशार्दूलर
मतेपतिनासह ।। दिव्यभोगादिव्यरूपादिव्याभरणभूषिता ।।४९।। शोभनो
पितयासार्द्धंरमतेदिव्यविग्रहः ।। रमाव्रतप्रभावेनमंदराचलसानुनि ।।५०।।
चिंतामणिसमाह्येषाकामधेनुसमाथवा ।। रमाभिधानानृपतेतवाग्रेकथिता
मया ।।५१।। ईदृशंचव्रतंराजन्येकुर्वंतिनरोत्तमाः ।। ब्रह्महत्यादिपापानिना
शंयांतिनसंशयः ।।५२।। एकादशीव्रतानांचपक्षयोरुभयोरपि ।। यथाशु-
क्लातथाकृष्णातिथिभेदंनकारयेत् ।।५३।। सेवितैकादशीनृणांभुक्तिमुक्ति
प्रदायिनी ।। धेनुः कृष्णातथाश्वेताउभयोःसदृशंपयः ।। ५४ ।। तथैवतुल्यफ
लदंस्मृतमेकादशीव्रतम् ।। एकादशीव्रतानांचमाहात्म्यंशृणुयान्नरः ।।५५।।
सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते ।।५६।। ।।इतिश्रीब्रह्मवैवर्त० कार्ति
ककृष्णैकादशीरमामाहात्म्यंसमाप्तं ।। ।।अथकार्तिकशुक्लैकादशीकथा
।। ब्रह्मोवाच ।। ।।प्रबोधिन्याश्चमाहात्म्यंपापघ्नंपुण्यवर्धनम् ।। मुक्तिप्रदं
सुबुद्धीनांशृणुष्वमुनिसत्तम ।। १ ।। तावद्गर्जंतिविप्रेंद्रगंगाभागीरथीक्षितौ

पहरापरा ॥ नाप्युपोष्यहरेर्भक्त्यादुर्लभंनभवेत्क्वचित् ॥ ४७ ॥ चंद्रसूर्योपरागेचय
त्फलंपरिकीर्तितम् ॥ तत्सहस्रगुणंप्रोक्तंप्रबोधिन्यांतुजागरात् ॥ ४८ ॥ स्ना
नंदानंजपोहोमः स्वाध्यायोऽभ्यर्चनंहरेः ॥ तत्सर्वंकोटितुल्यंतुप्रबोधिन्यांतु
यत्कृतम् ॥ ४९ ॥ जन्मप्रभृतियत्पुण्यंनरेणाभ्यर्जितंभवेत् ॥ वृथाभवतित
त्सर्वमकृत्वाकार्तिकव्रतम् ॥ ५० ॥ अकृत्वानियमंविष्णोःकार्तिकंयःक्षिपे
न्नरः ॥ जन्मार्जितस्यपुण्यस्यफलंप्राप्नोतिनारद ॥ ५१ ॥ तस्मात्त्वयाप्रयत्नेन
देवदेवोजनार्दनः ॥ उपासनीयोविप्रेंद्रसर्वकामफलप्रदः ॥ ५२ ॥ परान्नंवर्जये
द्यस्तुकार्तिकेविष्णुतत्परः ॥ परान्नवर्जनाद्दत्सचांद्रायणफलंलभेत् ॥ ५३ ॥
नतथातुष्यतेयज्ञैर्नदानैर्वागजादिभिः ॥ यथाशास्त्रकथालापैःकार्तिकेम
धुसूदनः ॥ ५४ ॥ येकुर्वंतिकथांविष्णोर्येशृण्वंतिसमाहिताः ॥ श्लोकार्द्धंश्लो
कपादंवाकार्तिकेगोशतंफलम् ॥ ५५ ॥ सर्वधर्मान्परित्यज्यमामेकंकेशवाग्र
तः ॥ शास्त्रावधारणंकार्यंश्रोतव्यंचसदामुने ॥ ५६ ॥ श्रेयसांलोभबुद्ध्यावा
यःकरोतिहरेःकथां ॥ कार्तिकेमुनिशार्दूलकुलानांतारयेच्छतम् ॥ ५७ ॥ नि-

त्यंशास्त्रविनोदेनकार्तिकंयःक्षिपेन्नरः॥ निर्दहेत्सर्वपापानियज्ञायुतफलंलभेत्॥५८
नियमेननरोयस्तुशृणुतेवैष्णवींकथां॥ कार्तिकेतुविशेषेणगोसहस्रफलंलभेत्॥
५९॥प्रबोधवासरेविष्णोः कुरुतेयोहरेःकथां॥ सप्तद्वीपवतीदानेतत्फलंलभतेमु
ने॥६०॥श्रुत्वाविष्णुकथांदिव्यांयेऽर्चयंतिकथाविदं॥ स्वशक्त्यामुनिशार्दूलते
षांलोकाःसनातनाः॥६१॥ ब्रह्मणोवचनंश्रुत्वानारदःपुनरब्रवीत्॥ नारदउ०॥
विधानंब्रूहिमेस्वामिन्नेकादश्याःसुरोत्तम॥६२॥ चीर्णेनयेनभगवन्यादृशंफल-
माप्नुयात्॥ नारदस्यवचःश्रुत्वाब्रह्मावचनमब्रवीत्॥६३॥ ब्राह्मेमुहूर्तेचोत्थाय
ह्येकादश्यांद्विजोत्तम॥स्नानंचैवप्रकर्तव्यंदंतधावनपूर्वकं॥६४॥ नद्यांतडागे-
कूपेवावाप्यांगेहेतथैवच॥केशवश्चैवसंपूज्यः कथायाःश्रवणंतथा॥६५॥ निय
मार्थेमहाभागइमंमंत्रमुदीरयेत्॥ एकादश्यांनिराहारःस्थित्वाहनिपरेह्यहं॥६६
॥भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाऽच्युत॥अमुंमंत्रंसमुच्चार्यदेवदेवस्यचक्रिणः
॥६७॥भक्तिभावेनतुष्टात्माह्युपवासंसमर्पयेत्॥ रात्रौजागरणंकार्यंदेवदेवस्यस
न्निधौ॥६८॥गीतंनृत्यंचवाद्यंचतथाकृष्णकथांमुने॥यःकरोतिसपुण्यात्मात्रै-

 

लोकत्रयोपरिसंस्थितः ॥६९॥ बहुपुष्पैर्बहुफलैः कर्पूरागरुकुंकुमैः ॥ हरेः पूजाविधान
व्या कार्तिक्यां बोधवासरे ॥ ७०॥ वित्तशाठ्यं न कर्तव्यं संप्राप्ते हरिवासरे ॥ यस्मात्पु-
ण्यमसंख्यातं प्राप्यते मुनिसत्तम ॥ ७१ ॥ फलैर्नानाविधैर्दिव्यैः प्रबोधिन्यां तु जा
गरे ॥ शंखतोयं समादाय यस्त्वर्घो दीयते जनार्दने ॥ ७२॥ यत्फलं सर्वतीर्थेषु सर्वदानेषु य
त्फलं ॥ तत्फलं कोटिगुणितं दत्वार्घं बोधवासरे ॥ ७३॥ अगस्त्यकुसुमैर्दिव्यैः पूजयेद्यो
जनार्दनं ॥ देवेंद्रोपि मुनिश्रेष्ठ करोति करसंपुटं ॥ ७४ ॥ न तत्करोति विप्रेंद्र तपसा तोषि
तो हरिः ॥ यत्करोति हृषीकेशो मुनिपुष्पैरलंकृतः ॥ ७५॥ बिल्वपत्रैश्च ये कृष्णं कार्ति
के कलिवर्धन ॥ पूजयंति महाभक्त्या मुक्तिस्तेषां मयोदिता ॥ ७६॥ तुलसीदलपुष्पै
श्च पूजयंति जनार्दनं ॥ कार्तिके सकलं वत्स पापं जन्मायुतं दहेत् ॥ ७७॥ दृष्टा स्पृष्टा
ऽथवा ध्याता कीर्तिता नमिता स्तुता ॥ रोपिता सिंचिता नित्यं पूजिता तुलसी शुभा ७८
नवधा तुलसीभक्तिं ये कुर्वंति दिने दिने ॥ युगकोटिसहस्राणि ते वसंति हरेर्गृहे ॥ ७९
॥ रोपिता तुलसी यावत्कुरुते मूलविस्तरं ॥ तावद्युगसहस्राणि तनोति सुकृतं मुने
॥८०॥ यावच्छाखाप्रशाखाभिर्बीजपुष्पदलैर्मुने ॥ रोपिता तुलसी पुंभिर्वर्धते वसु

म् ॥ ३५ ॥ सज्ज्ञानी सच्च योगी च स तपस्वी जितेंद्रियः ॥ भोगो मोक्षश्च नस्यास्ति ह्यु
पास्ते हरिबोधिनीम् ॥ ३६ ॥ विष्णुप्रियतरा ह्येषा धर्मसारस्य दायिनी ॥ सकृदेना
मुपोष्यैव मुक्तिभाक्च भवेन्नरः ॥ ३७ ॥ प्रबोधिनीमुपोषित्वा न गर्भे विशते नरः
॥ सर्वधर्मान्परित्यज्य तस्मात्कुर्वीत नारद ॥ ३८ ॥ कर्मणा मनसा वाचा पापं यत्स
मुपार्जितम् ॥ तत्क्षालयति गोविंदः प्रबोधिन्यां तु जागरे ॥ ३९ ॥ स्नानं दानं जपो-
होमः समुद्दिश्य जनार्दनम् ॥ नरैर्यत्क्रियते वत्स प्रबोधिन्यां तदक्षयम् ॥ ४० ॥ येऽ
र्चयंति नरास्तस्यां भक्त्या देवं च माधवं ॥ समुपोष्य प्रमुच्यंते पापैः शतजन्मभिः
॥ ४१ ॥ महाव्रतमिदं पुत्र महापापौघनाशनम् ॥ प्रबोधवासरं विष्णोर्विधिवत्समु
पोषयेत् ॥ ४२ ॥ व्रतेनानेन देवेशं परितोष्य जनार्दनम् ॥ विराजयन्दिशः सर्वाः प्र-
याति भवनं हरेः ॥ ४३ ॥ कर्तव्यैषा प्रयत्नेन नरैः कांतिमभीप्सुभिः ॥ द्वादशी हि पदं
श्रेष्ठं कार्तिके तु प्रबोधिनी ॥ ४४ ॥ बाल्ये यच्चार्जितं वत्स यौवने वार्धके तथा ॥ शत
जन्मकृतं पापं स्वल्पं वा यदि वा बहु ॥ ४५ ॥ शुष्कमार्द्रं मुनिश्रेष्ठ स्वगुह्यमपि नारद ॥
तत्क्षालयति गोविंदमस्यामभ्यर्च्य भक्तितः ॥ ४६ ॥ धनधान्यवहा पुण्या सर्वपा-

वर्णांश्चित्रगंधाढ्यांशातपत्रिकां॥योददातिजगन्नाथेश्वेतद्वीपालयेवसेत् ॥९४॥एवंसंप्र
ज्यरात्रौचकेशवंभुक्तिमुक्तिदं॥प्रातरुत्थायचब्रह्मन्गत्वातुसजलांनदीं॥९५॥न
त्वास्नात्वाजपित्वाचकृत्वापूर्वाण्हिक क्रियाः॥गृहेगत्वाचसंपूज्यःकेशवोविधिवन्न
रैः॥९६॥व्रतस्यपूरणार्थायब्राह्मणान्भोजयेत्सुधीः॥क्षमापयेच्चशिरसाभक्तियु-
क्तेनचेतसा॥९७॥गुरुपूजाततःकार्याभोजनाच्छादनादिभिः॥दक्षिणातेश्चदातव्या
तुष्ट्यर्थंचक्रपाणिनः॥ ९८॥ भूयसीचैवदातव्याब्राह्मणेभ्यःप्रयत्नतः॥नियमश्चैव
संत्याज्योब्राह्मणाग्रेप्रयत्नतः॥ ९९॥ कथयित्वाद्विजेभ्यस्तद्दद्याच्छक्त्याचदक्षिणां
॥नक्तभोजीनरोराजन्ब्राह्मणान्भोजयेच्छुभान्॥१००॥ अयाचितेवलीवर्दंस
हिरण्यंप्रदापयेत्॥अमांसाशीनरोयस्तुप्रदद्द्गांसदक्षिणां॥१॥धात्रीस्नायीनरो
दद्याद्दधिमाक्षिकमवच॥फलानांनियमेराजन्फलदानंसमाचरेत्॥२॥तैलस्थाने
घृतंदेयंघृतस्थानेपयःस्मृतं॥धान्यानांनियमेराजन्दीयंतेशालितंदुलाः॥३॥दद्या
द्भूशयनेशय्यांसतूलांसपरिच्छदां॥पत्रभोजीनरोराजन्भाजनंघृतसंयुतं॥४॥मौ
नेघण्टांतिलांश्चैवसहिरण्यंप्रदापयेत्॥दंपत्योर्भोजनंदेयंनिःस्नेहंसर्पिसात्कृतं॥५॥

धारणेनस्वकेशानामादर्शंदापयेद्बुधः ॥ उपानहौप्रदातव्यौउपानत्परिवर्जनात् ॥ ६ ॥
लवणस्यचसंत्यागेशर्कराचप्रदापयेत् ॥ नित्यंदीपप्रदोयस्तुविष्णोर्वाविबुधालये
॥ ७ ॥ सदीपंसघृतंताम्रंकांचनंवादशायुतं ॥ प्रदद्याद्विष्णुभक्तायसंपूर्णव्रतहेतवे
॥ ८ ॥ एकांतरोपवासेतुकुंभानष्टौप्रदापयेत् ॥ सवस्त्रान्कांचनोपेतान्सर्वान्सालंकृ
तान्शुभान् ॥ ९ ॥ सर्वेषामप्यलाभेतुयथोक्तकरणंविना ॥ द्विजवाक्यंस्मृतंराज
न्संपूर्णव्रतसिद्धिदं ॥ १० ॥ नत्वाविसर्जयेद्विप्रान्ततोभुंजीतचस्वयं ॥ यत्त्यक्तं
चतुरोमासान्समाप्तिंतस्यचाचरेत् ॥ ११ ॥ एवंयआचरेत्प्राज्ञःसोऽनंतफलमाप्नुया
त् ॥ अवसानेतुराजेंद्रवासुदेवपुरंव्रजेत् ॥ १२ ॥ यश्चाविघ्नंसमाप्यैवंचातुर्मास्यव्रतं
नृप ॥ सभवेत्कृतकृत्यस्तुनपुनर्मानुषोभवेत् ॥ १३ ॥ एतत्कृत्वामहीपालपरिपू
र्णंव्रतंभवेत् ॥ व्रतवैकल्यमासाद्यह्यंधःकुष्ठीप्रजायते ॥ १४ ॥ एतत्तेसर्वमाख्यात
यत्पृष्टोऽहमिहत्वया ॥ पठनाच्छ्रवणाद्वापिलभेद्गोदानजंफलं ॥ ११५ ॥ ॥ इतिश्री
श्रीस्कंदपुराणेकार्तिकशुक्लैकादशीप्रबोधिनीमाहात्म्यंसमाप्तम् ॥ युधिष्ठिरउ० ॥
मलिम्लुचस्यमासस्यकावाएकादशीभवेत् ॥ किंनामकोविधिस्तस्याःकथयस्वजना

अ॰शु॰ ६७

र्दन॥१॥ श्रीकृष्णउ॰॥ ममंमासस्ययापुण्याप्रोक्तानाम्नाचपद्मिनी॥ सोपोषितामया त्नेनपद्मनाभपुरंनयेत्॥२॥ मममासेमहापुण्याकीर्तिनाकल्मषापहा॥ तस्याःफलं- कथयितुंनशक्तश्चतुराननः॥३॥ नारदायपुराप्रोक्तंविधिनाव्रतमुत्तमं॥ पद्मिन्याः पापराशिघ्नंभुक्तिमुक्तिफलप्रदं॥४॥ श्रुत्वावाक्यंमुरारेस्तुप्रोवाचातिमुदान्वितः॥यु धिष्ठिरोजगन्नाथंविधिंपप्रच्छधर्मवित्॥५॥श्रुत्वाराज्ञस्तुवचनंप्रीत्युत्फुल्लांबुजेक्ष णः॥शृणुराजन्प्रवक्ष्यामिमुनीनामप्यगोचरं॥६॥दशमीदिवसेप्राप्तेव्रतारम्भोवि- धीयते॥कांस्यंमांसंमसूरांश्चचणकाःकोद्रवास्तथा॥७॥शाकंमधुपरान्नंचदशम्यां दशवर्जयेत्॥हविष्यान्नंचभुंजीतअक्षारलवणंतथा॥८॥भूमिशायीब्रह्मचारीभवे च्चदशमीदिने॥१०॥एकादशीदिनेप्रातरुत्थायसादरं॥ विधायचमलोत्सर्गं नकुर्याद्दंतधावनं॥कृत्वाद्वादशगंडूषान्शुचिर्भूत्वासमाहितः॥११॥ सूर्योदयेशुभे तीर्थेस्नानार्थंप्रव्रजेत्सुधीः॥गोमयंमृत्तिकांगृह्यतिलान्दर्भान्शुचिस्तथा॥११॥ चूर्णैरामलकीभूतैर्विधिनास्नानमाचरेत्॥उद्धृतासिवराहेणकृष्णेनशतबाहुना ॥१२॥ मृत्तिकेब्रह्मदत्तासिकाश्यपेनाभिमंत्रिता॥ त्वंमेकुरुपवित्रांगंलग्नानेत्रेशि

ए॰क॰ ६७

धानले ॥ ८१ ॥ कुलेतेषांतुयेजातायेभविष्यंतियेगनाः ॥ आकल्पयुगसाहस्त्रंतेषां-
वासोहरेर्गृहे ॥ ८२ ॥ कदंबकुसुमैर्देवंयेऽर्चयंतिजनार्दनं ॥ तेषांयमालयंनैवप्रसादा-
च्चक्रपाणिनः ॥ ८३ ॥ दृष्ट्वाकदंबकुसुमंप्रीतोभवतिकेशवः ॥ किंपुनःपूजितोविप्रसर्व
कामप्रदोहरिः ॥ ८४ ॥ यःपुनःपाटलापुष्पैर्वसंतेगरुडध्वजं ॥ अर्चयेत्परयाभक्त्यामु
क्तिभागीभवेद्धिसः ॥ ८५ ॥ बकुलाशोककुसुमैर्येऽर्चयंतिजगत्पतिं ॥ विशोकास्ते
भविष्यंतियावच्चंद्रदिवाकरौ ॥ ८६ ॥ येऽर्चयंतिजगन्नाथंकरवीरैःसितासितैः ॥
चतुर्युगानिविप्रेंद्रप्रीतोभवतिकेशवः ॥ ८७ ॥ मंजरींसहकारस्यकेशवोपरियेनराः
॥ यच्छंतितेमहाभागागोकोटिफलभागिनः ॥ ८८ ॥ दूर्वांकुरैर्हरेर्यस्तुपूजांकालेप्र
यच्छति ॥ पूजाफलंशतगुणंसम्यगाप्नोतिमानवः ॥ ८९ ॥ शमीपत्रैस्तुयेदेवंपूजयं
तिसुखप्रदम् ॥ यममार्गोमहाघोरोनिस्तीर्णस्तैस्तुनारद ॥ ९० ॥ वर्षकालेतुदेवेशं-
कुसुमैश्चंपकोद्भवैः ॥ येऽर्चयंतिनतेमर्त्याःसंसरेयुःपुनर्भवे ॥ ९१ ॥ कुंभीपुष्पंतुवि
प्रर्षेययच्छंतिजनार्दनं ॥ सुवर्णपलमात्रेनेलभतेवैफलंमुने ॥ ९२ ॥ सुवर्णकेतकीपु
ष्पंयोददातिजनार्दने ॥ कोटिजन्मार्जितंपापंदहतेगरुडध्वजः ॥ ९३ ॥ कुंकुमारुण

॥२५॥ नैवेद्येर्विविधैः शक्त्या तथा नीराजनादिभिः॥ धूपैर्दीपैः सकर्पूरैः पूजयेत्केशवं शिवं
॥२६॥ नृत्यं गीतं तदग्रे तु कुर्याद्भक्तिपुरःसरं॥ नालपेत्पतितान्पापान्तस्मिन्नहनि न स्पृशेत्
॥२७॥ नानृतं हि वदेद्वाक्यं सत्यपूतं वचो वदेत्॥ रजस्वलां न स्पृशेत न निंदेद्ब्राह्मणं गुरुं ॥२८
॥पुराणं पुरतो विष्णोः शृणुयात्सह वैष्णवैः॥ निर्जला सा प्रकर्तव्या याचस्तु क्लेमलिम्लुचे
॥२९॥ जलपानेन वा कुर्याद्दुग्धाहारेण नान्यथा॥ रात्रौ जागरणं कुर्याद्गीतवादित्रसंयुतं
॥३०॥ प्रथमे प्रहरे पूजा नारिकेलार्धमुत्तमां॥ द्वितीये श्रीफलैश्चैव तृतीये बीजपूरकैः॥
॥३१॥ चतुर्थे पूजयेत्पूगैर्नारिंगैश्च विशेषतः॥ प्रथमे प्रहरे पुण्यमग्निष्टोमस्य जायते॥३२
द्वितीये वाजपेयस्य तृतीये हयमेधजं॥ चतुर्थे राजसूयस्य जाग्रतो जायते फलं॥३३॥-
नातः परतरं पुण्यं नातः परतरा मखाः॥ नातः परतरा विद्या नातः परतरं तपः॥३४॥ पृथि
व्यां यानि तीर्थानि क्षेत्राण्यायतनानि च॥ तस्मात्तानि च दृष्टानि येना कारि हरेर्व्रतं॥३५॥
एवं जागरणं कुर्याद्यावत्सूर्योदयं भवेत्॥ सूर्योदये शुभे तीर्थे गत्वा स्नानं समाचरेत्॥३६
॥स्नात्वैवागत्य भावेन पूजयेद्देवमीश्वरं॥ पूर्वोदितेन विधिना भोजयेद्ब्राह्मणान्शुभान्
३७॥ कुंभादिकं च यत्सर्वं प्रतिमां केशवस्य च॥ पूजयित्वा विधानेन ब्राह्मणाय समर्पयेत्

॥३८॥ एवंविधंव्रतंयोवैकुरुतेभुविमानवः॥ सफलंजायतेतस्यव्रतंमुक्तिफलप्रदं॥३९॥
एतत्तेसर्वमाख्यातंयत्पृष्टोहंत्वयाऽनघ॥ मलिम्लुचस्यमासस्यशुक्लायाविधिमुत्तमं॥
४०॥व्रतानितेनचीर्णानिसर्वाणिनृपनंदन॥ पद्मिन्याःप्रीतियुक्तोयःकुरुतेव्रतमुत्तमं॥
४१॥ कृष्णायामलमासस्यविधिस्तस्यापिताहशः॥ परमासातुविज्ञेयासर्वपापक्षयंक
री॥४२॥अत्रतेकथयिष्यामिकथामेकांमनोरमां॥नारदायपुलस्त्येनविस्तरेणनिवेदि
तां॥४३॥कार्तवीर्येणकारायांनिक्षिप्तंवीरस्यरावणं॥ विमोचितःपुलस्त्येनयाचयित्वा
महीपतिं॥४४॥ तदाश्चर्यंतदाश्रुत्वानारदोदिव्यदर्शनः॥ पप्रच्छचयथाभक्त्यापुल-
स्त्यंमुनिपुंगवं॥४५॥दशाननेनविजिताःसर्वेदेवाःसवासवाः॥कार्तवीर्येणविजितःक
थंरणविशारदः॥४६॥ नारदस्यवचःश्रुत्वापुलस्त्योमुनिमब्रवीत्॥श्रृणुवत्सप्रवक्ष्या
मिकार्तवीर्यसमुद्भवं ॥४७॥पुराचेतायुगेराजन्माहिष्मत्यांबृहत्तरः॥ हैहयानांकुले
जातःकृतवीर्योमहीपतिः॥४८॥सहस्त्रंप्रमदास्तस्यनृपस्यप्राणवल्लभाः॥ नतासां
तनयंकंचिल्लेभेराज्यधुरंधरं॥४९॥यजन्देवान्पितृन्सिद्धान्प्राचिकित्सान्बृहन्नरान्
॥तेषांवाक्याद्व्रतंकुर्वन्नलब्धस्तनयस्तदा॥५०॥ सुतंविनातदाराज्यंनसुखायमही

पतेः ॥ क्षुधितस्ययथाभोगानभवंतिसुखप्रदाः ॥ ५१ ॥ विचार्यचित्तेनृपतिस्तपस्तसुं
मनोदधे ॥ तपसैवसदासिद्धिर्जायतेमनसेप्सिता ॥ ५२ ॥ इत्युक्त्वासहभार्यश्चचीरवा
साजटाधरः ॥ तपस्तसुंगृहंन्यस्यसविचार्यसुमंत्रिणे ॥ ५३ ॥ निर्गतंनृपतिंवीक्ष्यपद्मि
नीप्रमदोत्तमा ॥ हरिश्चंद्रस्यतनयाइक्ष्वाकुकुलसंभवा ॥ ५४ ॥ पतिव्रताप्रियंदृष्ट्वात
पस्तसुंकृतोद्यमं ॥ भूषणानिपरित्यज्यचीरमेकंसमाश्रयत् ॥ ५५ ॥ जगामपतिनासा
र्द्धंपर्वतेगंधमादने ॥ गत्वातत्रतपस्तेपेवर्षाणामयुतंनृपः ॥ नलेभेतनयंराज्येध्यायंदे
वंगदाधरं ॥ अस्थिस्नायुमयंकांतंदृष्ट्वासाप्रमदोत्तमा ॥ ५७ ॥ अनुसूयांमहासाध्वीं
पप्रच्छविनयान्विता ॥ भर्त्तुःप्रतपतःसाध्विवर्षाणामयुतंगतं ॥ ५८ ॥ तथानप्रसन्नो
भूत्केशवःकष्टनाशनः ॥ व्रतंममममहाभागेकथयस्वयथातथं ॥ ५९ ॥ येनप्रसन्नोभग
वान्ममभक्त्याप्रजायते ॥ येनमेजायतेपुत्रश्चक्रवर्त्तीबृहत्तरः ॥ ६० ॥ श्रुत्वातस्यास्तु
वचनंपतिव्रतपरायणा ॥ यंप्रव्रजंतंनृपतिंस्वयंप्रव्राजदीक्षितं ॥ ६१ ॥ तदाप्रोवाचसं
दृष्टापद्मिनींपद्मलोचनां ॥ स्नात्वामलिम्लुचेसुभ्रुमासद्वादशसंमतं ॥ ६२ ॥ त्रिंशाद्दि
नैश्चभवतिमासःपूर्णःशुभानने ॥ तन्मध्येद्वादशीयुग्मंपद्मिनीपरमातथा ॥ ६३ ॥

रोरुहे ।।१३।। हरिपूजनयोग्यंमांमृत्तिकेकुरुतेनमः ।। सर्वौषधिसमुत्पन्नंगवोदरमधिष्ठि
तं ।।१४।। पवित्रकरणंभूमेमेंपावयतुगोमयं ।। ब्रह्मष्ठीवनसंभूताधात्रीभुवनपावनी ।।
।।१५।। संस्पृष्टापावयांगंमेनिर्मलंकुरुतेनमः ।। देवदेवजगन्नाथशंखचक्रगदाधर ।।१६
।। देहिविष्णोममानुज्ञांतवतीर्थाविहहने ।। वारुणांश्चजपेन्मंत्रान्स्नानंकुर्याद्विधान
तः ।।१७।। गंगादितीर्थसंस्मृत्ययत्रकुत्रजलाशये ।। पश्चात्संमार्जयेद्गात्रंविधिनानृप
सत्तम ।।१८।। मुखेपृष्ठेचहृदयेबाह्वोःशिरसिचाप्यधः ।। परिधायसुखंवासःशुक्लंसु
चिह्नखंडितं ।। १९ ।। ततःकुर्याद्धरेःपूजांमहापापंविनश्यति ।। संध्यामुपास्यविधि
नातर्पयित्वापितॄन्सुरान् ।।२०।। हरेर्मंदिरमागम्यपूजयेत्कमलापतिं ।। स्वर्णमात्रंकृतं
देवंराधिकासहितंहरिं ।।२१।। पार्वत्यासहितंदेवंपूजयेद्विधिपूर्वकं ।।२१।। कुंभोपरिन्य
सेद्देवंताम्रपात्रेऽथमृन्मये ।। दिव्यवस्त्रसमायुक्तेदिव्यगंधानुवासिते ।।२२।। तस्योप
रिन्यसेत्पात्रंताम्ररौप्यंहिरण्मयं ।। तस्मिन्संस्थापयेद्देवंविधिनापूजयेत्ततः ।।२३।।
संस्थाप्यसलिलैःश्रेष्ठैर्गंधधूपाधिवासितैः ।। चंदनागरुकर्पूरैःपूजयेद्देवमीश्वरं ।।२४
।। नानाकुसुमकस्तूरीकुंकुमेनसितांबुजैः ।। तत्कालजातैःकुसुमैःपूजयेत्परमेश्वरं ।।

अ॰ रु॰ नुषैर्नगैर्दैत्यदानवराक्षसैः ॥ जेतुंशक्योजगन्नाथविनात्वांमधुसूदन ॥ ७६ ॥ इत्युक्तो ए॰ क॰
७० बाढमित्युक्त्वातत्रैवांतरधीयत ॥ नृपोपिसुप्रसन्नात्मात्हृष्टः पुष्टःप्रियायुतः ॥ ७७ ॥
समायात्स्वपुरंरम्यंनरनारीमनोरमं ॥ सपद्मिन्यांसुतंलेभेकार्तवीर्यमहाबलं ॥ ७८ ॥ न
तेनसदृशः कश्चित्त्रिषुलोकेषुमानवः ॥ तस्मात्सराजितः संख्येरावणोदशकंधरः ॥ ७९
॥ नतंजेतुंसमर्थोऽस्तित्रिषुलोकेषुकश्चन ॥ विनानारायणंदेवंचक्रपाणिंगदाधरं ॥
८० ॥ नत्वयाविस्मयः कार्योरावणस्यपराजये ॥ मलिम्लुचप्रसादेनपद्मिन्याश्चाप्युपो
षणात् ॥ ८१ ॥ दत्तोदेवाधिदेवेनकार्तवीर्योमहाबलः ॥ इत्युक्त्वाप्रययौविप्रः प्रसन्ने
नांतरात्मना ॥ ८२ ॥ श्रीकृष्णउ॰ ॥ एतत्तेसर्वमाख्यातंयत्पृष्टोऽहंत्वयानघ ॥ मलि
म्लुचस्यमासस्यशुक्लायाः संभवोमहान् ॥ ८३ ॥ येकरिष्यंतिमनुजास्तेयास्यंतिहरेः
पदम् ॥ त्वमेवंकुरुराजेन्द्रयदिचेष्टमभीप्ससि ॥ ८४ ॥ केशवस्यवचः श्रुत्वाधर्मराजो
ऽतिहर्षितः ॥ चक्रेव्रतंविधानेनबंधुभिः परिवारितः ॥ ८५ ॥ सूतउवाच ॥ एतत्तेसर्व
माख्यातंयत्पृष्टोऽहंपुराद्विज ॥ पुण्यंपवित्रंपरमंकिंभूयः श्रोतुमिच्छसि ॥ ८६ ॥ एवं ७०
विधंयेऽपिव्रतंमनुष्याभक्त्याकरिष्यंतिमलिम्लुचस्य ॥ उपोषितायैस्तुसुखप्रदा

त्रीयाश्शुक्लपक्षेभुवितेपिधन्याः॥८७॥ श्रोष्यन्तियेतस्यविधिंसमग्रंतेप्यंशभाजाम
नुजाःप्रशस्ताः॥ येवैपठिष्यंतिकथांसमग्रांतेवैगमिष्यंतिहरेर्निवासं॥८८॥ ॥
इत्यधिकशुक्लैकादशीकथासमाप्ता॥ ॥ अथाधिककृष्णैकादशीकथा॥
॥युधिष्ठिरउवाच॥ ॥मलिम्लु[illegible]स्यमासस्यकृष्णाकाकथ्यतेविभो॥किंनाम
कोविधिस्तस्याःकथयस्वजगत्पते॥१॥ ॥श्रीकृष्णउवाच॥ ॥परमेतिसमा-
ख्यातापवित्रापापहारका॥भुक्तिमुक्तिप्रदानृणांभोगदाच युधिष्ठिर॥२॥पू
र्वोक्तविधिनाकार्याशुक्लायाःसदृशेनवै॥पूजयेत्परयाभक्त्यानाम्नादेवंनरोत्तमे
॥३॥ अत्रतेकथयिष्यामिकथामेतांमनोरमां॥ कांपिल्यनगरेज[illegible]तांमुनीनामग्र-
तःश्रुतां॥४॥ आसीद्द्विजवरःकश्चित्सुमेधानामधार्मिकः॥ तस्यपत्नीपवि
त्राख्या[illegible]तिव्रत्यपरायणा॥५॥कर्मणाकेनचिद्विप्रोधनधान्यविवर्जितः॥ न-
क्वापि[illegible]तेभिक्षांयाचन्नपिनरान्बहून्॥६॥ नभोज्यंलभतेताहक्नवस्त्रंनेवमं
डनं॥रूपयौवनमाधुर्यैर्नारीसुश्रूषतेपतिं॥७॥अतिथिंपूजयेत्क्वापितदासास्तुधि
तागृहे॥तिष्ठत्येवविशालक्षीमम्लानमुखपंकजा॥८॥ विलोक्यभार्यांसुदतींक

र्षंतीस्वकलेवरं ॥ नभर्त्तारिंकश्चिन्नैवनास्त्यन्नमितिभाषते ॥ ९॥ विचार्यब्राह्मण
श्चिन्तेभार्यायाःप्रेमबंधनं ॥ निंदन्भाग्यंस्वकंविप्रःप्रोचेवाक्यंप्रियंवदां ॥१०॥
कांतेकरोमिकिंकार्यंनमयालभ्यतेधनं ॥ याचयामिनरान्भव्यान्नयच्छंतिचमे
धनं ॥ [illegible]॥ किंकरोमिक्कगच्छामित्वंमेकथयशोभने ॥ विनाधनेनसुश्रोणिगृहका
र्यंनसिद्ध्यति ॥१२॥ देह्याज्ञांपरदेशायगच्छामिधनलब्धये ॥ तस्मिन्देशेचयद्द्राव्यं
भाग्यंतत्रैवलभ्यते ॥१३॥ उद्यमेनविनासिद्धिःकर्मणांनोपलभ्यते [illegible]स्माद्बुधाःप्र
शंसंतिसर्वथैवशुभोद्यमं ॥१४॥ श्रुत्वाकांतस्यवचनंसाश्रुनेत्राविचक्षणा ॥ प्रोवा
चप्रांजलिर्भूत्वाविनयानतकंधरा ॥१५॥ त्वत्तोनास्तिसुविज्ञातात्वयाऽज्ञप्ताब्र
वीम्यहं ॥ हितैषिणोनराब्रूयुःशश्वदापद्गताअपि ॥१६॥ पूर्वदत्तंहिलभते सर्वकु
त्रमहीतले ॥ विनादानंनलभ्येतमेरौकनकपर्वते ॥१७॥ पूर्वदत्ताहियाविद्यापूर्वद
त्तंहियद्धनं ॥ पूर्वदत्ताहियाभूमिरिहजन्मनिलभ्यते ॥१८॥ यद्धात्रालिखितंभा
लेतत्तत्रैवहिलभ्यते ॥ विनादत्तेनकिंक्वापिलभ्यतेनैवकिंचन ॥१९॥ पूर्वजन्मनिवि
प्रेंद्रनमयानत्वयाक्कचित् ॥ सत्पात्राणांकरेदत्तंस्वल्पंभूर्यपिसद्धनं ॥२०॥ इहदे-

उपोष्यतत्प्रकर्तव्यंविधिनाजागरैः समं ॥ शीघ्रंप्रसन्नोभगवान् भविष्यतिसुतप्रदः ॥
६४॥ इत्युक्त्वाकथयत्सर्वंमयापूर्वोदितंनृप॥ विधिंव्रतस्यविधिवत्प्रसन्नाकर्दमांगजा
॥६५॥ श्रुत्वाव्रतविधिंसर्वंयथोक्तमनुसूयया॥ चक्रेचावैगीनत्सर्वंपुत्रप्राप्ति मभीप्स
ती॥ ६६॥ एकादश्यांनिराहारासदाजाताचनिर्मला॥ जागरेणयुताराज्ञोगीतनृत्यस
मन्विता॥६७॥ पूर्णेव्रतेन्चवैशीघ्रंप्रसन्नःकेशवःस्वयं॥ बभाषेगरुडारूढोवरंवरय
शोभने॥६८॥ श्रुत्वावाक्यजगन्धातुस्तुत्वाप्रीत्याशुविस्मिता॥ ययाचेऽद्यवरंब्रूहिमम
भर्तुर्द्रहत्तरं॥६९॥ पद्मिन्यास्तद्वचः श्रुत्वाकृष्णप्रीतः प्रियंवदः॥ त्वयाऽहंतोषितोभ
द्रेप्रत्युवाचजनार्दनः॥७०॥ मलिम्लुचश्चमासोऽसौनान्योमेप्रीतिदायकः॥ तन्मध्येए
कादशीरम्याममप्रीतिविवर्धना॥७१॥ सात्वयोपोषितासुभ्रुयथोक्तविधिनाशु
भे॥ तेनत्वयाप्रसन्नोऽहंकृतोस्मिसुभगानने॥७२॥ तवभर्तुःप्रदास्यामिवरंयन्
मनसेप्सितं॥ इत्युक्त्वानृपतिंप्राहविष्णुर्विश्वार्तिनाशनः॥७३॥ वरंवरयराजेंद्रय
त्तेमनसिकांक्षितं॥ संतोषितोऽहंप्रिययातवासिद्धिचिकीर्षया॥७४॥ श्रुत्वातद्वचनं
विष्णोःप्रसन्नोनृपसत्तमः॥ वव्रेसुतंमहाबाहुंसर्वलोकनमस्कृतं॥७५॥ नदेवैर्मा

गयान्मुनींद्राद्यत्वमत्रैवसमागतः॥३२॥ त्वत्प्रसादाद्दरिद्रंमेशीघ्रंनश्यत्यसंशयम्
॥केनोपायेनविप्रेंद्रदरिद्रंनश्यतिध्रुवं॥३३॥ कथयस्वकृपासिंधोव्रतंतीर्थंतपादि
कं॥श्रुत्वातस्याःसुशीलायाभाषितंमुनिपुंगवः॥३४॥ प्रोवाचप्रवरंचित्तेविचार्यव्र
तमुत्तमं॥सर्वपापौघशमनंदुःखदारिद्र्यनाशनं॥३५॥परमानामविख्याताविे
ष्णोस्तिथिरनुत्तमा॥मलिम्लुचेतुयाकृष्णाभुक्तिमुक्तिफलप्रदा॥३६॥तस्याउ
पोषणंकृत्वाधनधान्ययुतोभवेत्॥ विधिनाजागरैःसाकंगीनवा[illegible]संयुतं॥३७॥
धनदेनपुराचीर्णंव्रतमेतत्सुशोभनं॥ तदाहृष्टेनरुद्रेणधनानामधिपःकृतः ३८
हरिश्चंद्रेणचकृतंधनानामधिपःकृतः॥ पुनःप्राप्ताप्रियातेनराज्यंनिहतकंटकं३९
तस्मात्कुरुविशालाक्षिव्रतमेतत्सुशोभनम्॥ विधिनाविधियुक्तेनसमंजागर-
णेनच॥४०॥इत्युक्त्वातद्विधिंसर्वंकथयामासपांडवः॥प्रीत्यापरमसंतुष्टस्ततो
भक्त्याप्रसादतः॥४१॥पुनःप्रोवाचतंविप्रंपंचरात्रिव्रतंशुभं॥ यस्यानुष्ठानमा-
त्रेणभुक्तिमुक्तिश्चप्राप्यते॥४२॥ परमादिवसेप्रातःकृत्वापूर्वाण्हिकंविधिम्॥
कुर्यात्सुनियमान्शक्त्यापंचरात्रिव्रतादरात्॥४३॥प्रातःस्नात्वानिराहारोय-

स्तिष्ठेद्दिनपंचकम् ॥ सगच्छेद्वैष्णवंस्थानंपितृमातृप्रियासमम् ॥ ४४ ॥ एकाशन
स्तुयोभूयाद्दिनानांपंचकंनरः ॥ सर्वपापविनिर्मुक्तः स्वर्गलोकेमहीयते ॥ ४५ ॥ स्ना-
त्वायोभोजयेद्विप्रंदिनानांपंचकंनरः ॥ भोजितंतेनविधिनासदेवासुरमानुषम् ॥ ४६
पूर्णकुंभंसतोयेनयोददातिद्विजातये ॥ दत्तंतेनैवसकलंब्रम्हांडंसचराचरं ॥ ४७ ॥
तिलपात्रंतुयोदद्यात्स्नात्वापंचदिनंनरः ॥ सभुक्त्वाविपुलान्भोगान्सूर्यलोकेम-
हीयते ॥ ४८ ॥ ब्रह्मचर्येणयस्तिष्ठेद्दिनानांपंचकंनरः ॥ सस्वर्गेभुंजतेभोगानस्ववे
श्याभिःसमंमुदा ॥ ४९ ॥ एवंविधंव्रतंसाध्विकुरुत्वंपतिनाशुभे ॥ धनधान्ययु
ताभूत्वास्वर्गंयास्यसिसुव्रते ॥ ५० ॥ इत्युक्त्वासाव्रतंचक्रेकौंडिन्येनयथोदितं
॥ भर्त्रासमंभावयुतास्नात्वामासिमलिम्लुचे ॥ ५१ ॥ पंचरात्रव्रतेपूर्णेपरायाः
प्रियसंयुता ॥ सापश्यद्राजभवनादायांतंनृपनंदनम् ॥ ५२ ॥ दत्वानवीनंभावि
नंभव्यवस्तुसमन्वितम् ॥ वासयामासविधिनाविधिनाप्रेरितःस्वयम् ॥ ५३ ॥
दत्वाग्रामंवृत्तिकरंब्राह्मणायसुमेधसे ॥ प्रसन्नस्तपसाराजातंस्तुत्वास्वगृहंय
यो ॥ ५४ ॥ मलिम्लुचस्यमासस्यपरायाःपरमादरात् ॥ कृष्णाख्युपोषणात्स-

 

द्यः पंचरात्रव्रतेनच ॥ ५५ ॥ सर्वपापविनिर्मुक्तः सर्वसौख्यसमन्वितः ॥ भु-
क्त्वाभोगान्प्रियासार्द्धमंतेविष्णुपुरंययौ ॥ ५६ ॥ येकरिष्यंतिमनुजाः परायाव्रत
मुत्तमम् ॥ पंचरात्रभवंपुण्यंमयावक्तुंनशक्यते ॥ ५७ ॥ पुष्कराद्यानि तीर्थानि
गंगाद्याः सरितस्तथा ॥ धेनुमुख्यानिदानानितेनचीर्णानिसर्वथा ॥ ५८ ॥ गया
श्राद्धंकृतंतेनपितरः परितोषिताः ॥ व्रतानितेनचीर्णानिव्रतखंडोदितानिवै ॥
॥ ५९ ॥ द्विपदांब्राह्मणः श्रेष्ठोगौर्वरिष्ठाचतुष्पदां ॥ देवानांवासवः श्रेष्ठस्तथामा-
सोमलिम्लुचः ॥ ६० ॥ मलिम्लुचेपंचरात्रिः पद्मायाःपापहारिणी ॥ पंचरा-
त्रेचपरमापद्मिनीपापशोषणी ॥ ६१ ॥ साध्यशक्त्यैवकर्तव्यायथाशक्त्याविच-
क्षणैः ॥ मानुषंजन्मरासाद्यनस्नातोयैर्मलिम्लुचः ॥ ६२ ॥ तेजन्मघातिनोनून-
नंनोपोष्यहरिवासरे ॥ चतुरशीतिलक्षाणिलभ्यंतेयोनिसंकटे ॥ ६३ ॥ प्राप्यते
मानुषंजन्मदुर्लभंपुण्यसंचयैः ॥ तस्मात्कार्यंप्रयत्नेन परमायाव्रतंशुभं ॥ ६४
॥ ॥ श्रीकृष्णउवाच ॥ ॥ एतत्तेसर्वमाख्यातंयत्पृष्टोऽहंत्वयानघ ॥ मलि-
म्लुचस्यमासस्यपरमायाः समुद्भवम् ॥ ६५ ॥ तत्सर्वंतेसमाख्यातंकुरुष्वाव-

शेपरेषापिदत्तंसर्वत्रलभ्यते ॥ अन्नमात्रंतुविश्वेशोविनादत्तेनयच्छति ॥ २१ ॥ त-
स्मादत्रैवविप्राग्र्यस्थातव्यंभवतामया ॥ भवद्भिनानतिष्ठामिक्षणमात्रंमहामुने ॥
२२ ॥ नमातानपिताभ्रातानश्वश्रूःश्वशुरोजनाः ॥ नसत्कुर्वीतितं केपिस्वजनाश्च
पुरेगताः ॥ २३ ॥ भर्तृहीनांविनिंदंतिदुर्भगेतिवदंतितां ॥ तस्मादत्रस्थिरोभूत्वावि
हरस्वयथासुखं ॥ २४ ॥ भवतोभाग्ययोगेनमामिश्चात्रभविष्यति ॥ श्रुत्वातस्या
स्तुवचनंस्थितस्तत्रविचक्षणः ॥ २५ ॥ तावत्तत्रसमायातःकौंडिन्योमुनिसत्तमः
॥ दृष्ट्वासमागतंहृष्टःसुमेधा द्विजसत्तमः ॥ २६ ॥ सभार्यःसहसोत्थायननाम-
शिरसासकृत् ॥ धन्योस्म्यनुगृहीतोऽस्मिसफलंजीवितंमम ॥ २७ ॥ यद्दृष्टोऽसि
महद्भाग्यादित्युवाचमुनीश्वरं ॥ दत्वासुविष्टरंतस्मैपूजयामासतंद्विजं ॥ २८ ॥ भो
जयित्वाविधानेनपप्रच्छप्रमदोत्तमा ॥ विद्वन्केनप्रकारेणदारिद्र्यस्यक्षयोभवेत्
॥ २९ ॥ विनादत्तंकथंलभ्येद्धनंविद्यांकुटुंबिनीम् ॥ मांमेभर्त्तापरित्यज्य गंतुका-
मोद्यवर्तते ॥ ३० ॥ अन्यदेशपराल्लोकान्याचितुंपरपत्तने ॥ रक्षितोऽस्तिमयावि
घ्नहेतुभिःकैर्महत्तरैः ॥ ३१ ॥ नादत्तंलभ्यतेकिंचिदित्युक्त्वासनिवारितः ॥ ममभा

हितोनृप ॥ ६६ ॥ श्रुत्वैतद्यदुपतिनोदितं महात्म्यं तच्चक्रे व्रतमनुजैः प्रियासमेतः ॥ भुक्त्वाऽसौ दिवि भुवि दुर्लभांश्च भोगान्नीतोऽसौ सुरवरमंदिरं सुहृष्टः ॥ ॥ ६७ ॥ येप्येवं भुवि मनुजा मलिम्लुचस्य सुस्नाताः शुभविधिना समाचरंति ॥ ते भुक्त्वा दिवि विभवं सुरेन्द्रतुल्यं गच्छेयुस्त्रिभुवनवंदितस्य गेहम् ॥ ६८ ॥

इति श्री अधिककृष्णैकादशीपरमामाहात्म्यं समाप्तम् ॥ ॥ छ ॥

॥ श्रीकृष्णार्पणमस्तु ॥ ॥ शुभमस्तु ॥ ॥ छ ॥

इदं पुस्तकं मुंबापुर्यां भगीरथात्मजेन हरिप्रसादेन जगदीश्वराख्य शिलायंत्रे मुद्रापितम्
शकाब्दाः १८०३ वृषनामसंवत्सरे माघशुक्ल ४ भौमवासरः संवत १९३८

॥ श्रीराजमान्यराजेश्री [illegible] जोशी स्येदं पुस्तकं ॥ [illegible] ॥

॥ श्रीरस्तु ॥ [illegible] ॥

इत्येकादशीमाहात्म्यं समाप्तम्

पुस्तकमदः श्रीकृष्णजोशी र.मनग.

Ekadashi Mahatamaye;
Jagdeshwar Mudranalaya. — Mumbai,
1880, Sanwat 1938

24003